# shrIrAmatApinIyopaniShadAnandanidhiTIkA by Anandavana

# આનન્દવનવિરચિતા શ્રીરામતાપિનીયોપનિષદાનન્દનિધિટીકા

## Document Information

Text title : Ramatapini Upanishad with AnandanidhiTIkA by Anandavana

File name : rAmatApinITIkA.itx

Category : upanishhat, raama, upaniShat, rAma, atharvaveda, vyAkhyA

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description-comments : 55 / 108; Atharva Veda - Vaishnava upanishad

Latest update : October 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2025

*sanskritdocuments.org*

# આનન્દવનવિરચિતા શ્રીરામતાપિનીયોપનિષદાનન્દનિધિટીકા

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીરામાય નમઃ ॥

શ્રીરામપૂર્વતાપિની ।

આનન્દવનકૃતયા રામકાશિકાખ્યયા વ્યાખ્યયા સહિતા ।

સત્યં સત્યતયા હિ યસ્ય નિખિલં રજ્જૌ યથા કુણ્ડલી

યસ્યાનન્દતયા પ્રપઞ્ચરચના સાનન્દથુર્ભ્રાજતે ।

યચ્ચિદ્રૂપતયા ચિદાત્મકમિવાઽઽભાતિ પ્રપઞ્ચાદિકં

સત્યાનન્દચિદાત્મકં શ્રુતિવચોગીતં ભજે રાઘવમ્ ॥

એકેનૈવ કરેણ શિષ્યશિરસિ વ્યાપારિતેન ક્ષણા-

દાવિચ્છેદમતુચ્છપ્રસ્યતિ તમઃસઙ્ઘાતમાભ્યન્તરમ્ ।

તસ્યૈતસ્ય ગુરોરપૂર્વદિવસાધીશસ્ય પાદામ્બુજ-

દ્વન્દ્વાધિશ્રવણીઃ પરાગકણિકા ભક્ત્યા નતામસ્તમામ્ ॥

આસીદ્વાસિષ્ઠવંશ્યો નૃહરિરિતિ પુરા કેશવાહ્વસ્ય સૂનુસ્તસ્માત્કૃષ્ણાહ્વયોઽભૂદ્ધરણિસુરવરઃ પત્તને કુણ્ડિનાખ્યે ।

તસ્માત્સૂનુર્ગુણાબ્ધિઃ સમજનિ કમલામ્બઃ પ્રભુત્વાદ્યતીનામાનન્દાદ્યઃ સ રામોપનિષદિ વિદધે સાધુ ટીકાં વનાખ્યઃ ॥

શ્રીરામોપનિષદ્વૃત્તિં વિધાસ્યે રામકાશિકામ્ ।

રામભક્ત્યા પ્રયુક્તોઽહં રામાવાપ્ત્યૈ તદર્થિનામ્ ॥

## અથ પ્રથમોપનિષત્ ।

ઇહ ખલુ સુખદુઃખલાભાલાભયોરન્યતરસ્ય પુરુષાર્થત્વાવગમાત્કેવલનિખિલદુઃખજાલમાયાઽપારસંસારપારાવારપર્યટનપરિશ્રાન્ સુમનસામુભયવિધસ્યાપિ પુરુષાર્થસ્યાઽનુપલમ્ભાદ્દર્શપૂર્ણમાસાદિ- વેદવિહિતકર્મનિર્માણં નિર્માય પ્રવૃત્તાનાં સ્વર્ગસુખલાભેઽપિ તસ્ય ક્ષયિત્વસાતિશયત્વાદિદોષોન્મેષ- રૂપિતત્વેન પુરુષાર્થત્વાઽનુપપત્તેઃ સ્વર્ગાદાવપ્યનભિરતિમાસેદુષાં પ્રચુરતરદુઃખપટલવિપરિલોપનિત્યનિરતિ- શયાનન્દપ્રતિલમ્ભલક્ષણપુરુષાર્થમપેક્ષમાણાનાં દુઃખમયસ્ય સંસારસ્યાવિદ્યાવિદ્યમાનત્વાદવિદ્યાવિચ્છેદમન્તરેણાગ્ચ્છેદાઽસમ્ભવાદવિદ્યાયાશ્ચ બ્રહ્માત્મૈકત્વસાક્ષાત્કારરૂપવિદ્યૈ શ્રીરામાખ્યાં બ્રહ્મવિદ્યાં રમણીયતરામુપજનયિતું શ્રીરામતાપિનીયોપનિષત્પૂર્વોત્તરસગુણનિર્ગુણોપાસનભેદેનાઽધિકારિતારતમ્ । તત્ર ચોપનિપૂર્વાત્સદેર્નિષ્પન્નસ્ય ક્વિબન્તસ્યોપનિષત્પદસ્ય મુખ્યતઃ શ્રીરામચન્દ્રબ્રહ્મવિદ્યાપરત્વેઽપિ

બ્રહ્મવિદ્યાર્થાયાં શ્રુતૌ લક્ષણયા પ્રવૃત્તિઃ । નહ્યભિધૈવ શબ્દસ્ય વૃત્તિર્ન લક્ષણેતિ વક્તું યુક્તમ્ । વૃદ્ધૈરુભયોરપિ શબ્દવૃત્તિત્વેન સ્વીકારાત્ । નન્વેવમસ્તુ શ્રીરામતાપિનીયમપ્યુપનિષત્, તથાપિ નેયં વ્યાખ્યાનમર્હતિ પ્રાચીનૈરેવાઽઽચાર્યૈર્વ્યાકૃતત્વાત્ । સત્યમ્, તથાપિ પ્રાચીનવ્યાખ્યાયા વિક્ષિપ્તવિસ્તૃતદુરવગાહતયાઽલસપ્રાણાનાં મન્દમતીનામનુગ્રાહ્યતયા વિક્ષિપ્તા ચ સઙ્ક્ષિપ્તસુબોધા ચ શ્રીરામપૂર્વતાપિની- યોપનિષદો વ્યાખ્યેયં સઙ્ખ્યાવતાં હૃદયઙ્ગમાઽઽરભ્યતે । અત્ર ચોત્તમાધિકારિણાં સગુણોપાસનામન્તરેણૈવ નિર્ગુણસ્ય પ્રતિપત્તું શક્યત્વેઽપિ મન્દાધિકારિભિસ્તામન્તરેણૈવ પ્રતિપત્તુમશક્યત્વાત્ “બ્રહ્મણો રૂપકલ્પને’ત્યાદિના સગુણોપાસનાં વદિષ્યંસ્તયા પ્રાપ્તવ્યં નિર્ગુણં રામનામ નિરુક્તિવ્યાજેન ષડ્ભિઃ શ્લોકરૂપાભિઃ કણ્ડિકાભિર્નિરૂપયતિ-ચિન્મય ઇત્યાદિના ।

ૐ ચિન્મયેઽસ્મિન્મહાવિષ્ણૌ જાતે દશરથે હરૌ ॥
રઘોઃ કુલેઽખિલં રાતિ રાજતે યો મહીસ્થિતઃ ॥ ૧॥
સ રામ ઇતિ લોકેષુ વિદ્વદ્ભિઃ પ્રકટીકૃતઃ ॥
રાક્ષસા યેન મરણં યાન્તિ સ્વોદ્રેકતોઽથવા ॥ ૨॥

નનુ “રમન્તે યોગિન” ઇત્યસ્યામેવ કણ્ડિકાયાં નિર્ગુણમુપલભ્યતે, નતુ પ્રાચીનાસુ કણ્ડિકાસુ । તાસુ ચ “જાતે દશરથ” ઇત્યાદિના સગુણસ્યૈવ પ્રતીતેઃ । મૈવમ્, સગુણનિર્ગુણયોઃ પ્રધાનભૂતસ્ય નિર્ગુણસ્યૈવ નિરૂપણૌપયિકત્વેન સગુણસ્ય પ્રત્યાયનાત્ । નનુ તર્હિ સગુણનિર્ગુણે રૂપે નિરૂપયતીતિ સંહતિર્વક્તવ્યા । ન વક્તવ્યા, પ્રધાનાપ્રધાનયોઃ પ્રધાનસ્યૈવાઽઽદર્તવ્યત્વાત્ । પ્રધાનં ચેહ નિર્ગુણમપ્રધાનં સગુણમ્ । નનુ તર્હ્ય- પ્રધાનત્વાદેવ સઙ્ગુણં ન નિરૂપણીયમ્ । મૈવમ્, પ્રધાનનિરૂપણાર્થત્વેનાઽપ્રધાનનિરૂપણેઽપિ દોષાભાવાત્ । યદાહુરાચાર્યાઃ-

અધ્યારોપાપવાદાભ્યાં નિષ્પ્રપઞ્ચં પ્રપઞ્ચ્યતે ।

ઇતિ । ચિન્મયે- ચિદ્ઘને । અત્ર ચ પ્રાચુર્યાર્થે મયટ્ । નતુ વિકારાર્થે, ચિતેર્નિર્વિકારત્વાત્ । નચ નિર્વિકારત્વમ- પ્રમાણકમ્ । “ન જાયતે મ્રિયતે” ઇત્યાદિશ્રુતેરેવાત્ર પ્રમાણત્વાત્ । સ્વાર્થે ચાયં મયટ્ । તેન ચિન્મય ઇત્યનેન ચિદ્રૂપત્વમુક્તં સ્યાત્ । તથા ચ કાણાદાક્ષપાદાદિભિર્યદાત્મનશ્ચિદ્ગુણત્વમજલ્પિ, તચ્ચૂર્ણિતં ભવતિ । અસ્મિન્- ’અયમસ્મી”ત્યનુભવાદપરોક્ષે । તદુક્તં ભટ્ટપાદૈઃ-

ઇદમઃ પ્રત્યક્ષગતં સમીપતરવર્તિ ચૈતદો રૂપમ્ ।
અદસસ્તુ વિપ્રકૃષ્ટં તદિતિ પરોક્ષે વિજાનીયાત્ ॥

ઇતિ । યદિ પરોક્ષઃ સ્યાદાત્મા, તદા તસ્ય જડત્વેન પ્રકાશત્વાઽનુપપત્તૌ જગદાન્ધ્યં પ્રસજ્યેતેતિ ।

“અન્ધસ્યેવાન્ધલગ્નસ્ય વિનિપાતઃ પદે પદે”

ઇતિ ન્યાયાત્ । તસ્ય દેશકાલાવચ્છેદમપનેતું વિશિનષ્ટિમહાવિષ્ણાવિતિ । “વેવેષ્ટિ વ્યાપ્નોતી’તિ વિષ્ણુઃ । “વિષ્લૃવ્યાપ્તા’વિતસ્ય ધાતોઃ ષ્ણુપ્રત્યયાન્તસ્ય રૂપમ્ । મહાંશ્ચાસૌ વિષ્ણુશ્ચેતિ તથા । વિષ્ણુરિત્યેવોક્તૌ ગગનાદેરપિ સર્વભૂતસંયોગિતાલક્ષણવ્યાપકત્વાઙ્ગીકારાત્તાદૃશં વિષ્ણુત્વમસ્ય મા પ્રભાઙ્ક્ષીદિતિ મહત્ત્વેન વિભુત્વં વિશેષ્યતે । મહાવિષ્ણુરિતિ મહત્ત્વેન ચ વિશેષિતં વિષ્ણુત્વં પરિચ્છેદત્રયશૂન્યત્વે પર્યવસ્યતિ । નહ્યાત્મા દેશતઃ પરિચ્છિન્નઃ, સર્વત્રૈવ સત્ત્વાત્ । નાપિ કાલતઃ સર્વદૈવ સત્ત્વાત્ । નાપિ વસ્તુતઃ, કસ્યચિદપિ વસ્તુનસ્તદ્વ્યતિરેકેણાઽસત્ત્વાત્ । યદ્વા “વિશતિ વ્યશ્નોતી”તિ વા વિષ્ણુઃ । વિશતેર્વ્યશ્નોતેર્વેતિ યાસ્કવચનાત્ । અયમર્થઃ- વ્યાપકત્વપર્યવસાયી મહાંશ્ચાસૌ વિશ્ચેતિ મહાવિઃ મહાપક્ષી । વિશબ્દસ્ય પક્ષિવાચકત્વાત્, જીવાત્મા । પરમાત્મન ઇવ જીવાત્મનોઽપિ

“દ્વાસુપર્ણે’ત્યાદિશ્રુત્યોપચારવૃત્ત્યા પક્ષિત્વસ્યાઽભિધાનાત્ । મહાવેર્જીવાત્મનઃ કરુણામૃતં સ્નુતં પ્રસ્નુતં યેન સ મહાવિષ્ણુઃ । નનુ સ્નુશબ્દ એવ મહાવિષ્ણુપદેઽસ્તિ ન સ્નુતશબ્દઃ, તત્ કથમેવં વ્યાખ્યા । સ્નુતશબ્દે તકારલોપસ્ય છાન્દસત્વેનાઽનુપ- પત્ત્યભાવાત્ ।

યો મહાન્ પૂજિતો વ્યાપી મહાવેઃ કરુણામૃતમ્ ।

સ્નુતં યેન જટાયોશ્ચ મહાવિષ્ણું નમામ્યહમ્ ॥

ઇતિ હનુમદ્વચનાત્ । અયં ચ વિષ્ણુશબ્દ ઉગ્રાદિપદાનામપ્યુપલક્ષણમ્ । નચાઽસ્ય તૈઃ સહ સમ્બન્ધાભાવાત્તદુપલક્ષણત્વમનુપપન્નમિતિ વાચ્યમ્, અસ્ય તેષાં ચ શ્રીનૃસિંહમન્ત્રરાજે સમવેતત્વાત્ । એવં ચ શ્રીનૃસિંહશ્રીરામચન્દ્રયોરભેદોઽભિહિતો ભવતિ । નરવિગ્રહસામ્યેઽપિ સિંહાસ્યત્વં કાર્યાનુરોધેન । ઈદૃશેઽસ્મિન્ જાતે- જન્મભાજિ સતિ । નનુ જાત ઇત્યયુક્તમ્, પરસ્ય બ્રહ્મણો જન્માઽભાવાત્ । “ન જાતો ન જનિષ્યત” ઇતિ શ્રુતેઃ, “ન જાયતે મ્રિયતે વે’તિ સ્મૃતેશ્ચ, “આત્મા ન જાયતે વિભુત્વાદાકાશવ’દિત્યનુમાનાચ્ચેતિ ચેત્ । સત્યમ્, વસ્તુતો જન્માઽભાવેઽપિ લોકાઽનુગ્રહકામ્યયા પ્રાતિભાસિકજન્મસ્વીકારાત્ । યદ્વા જાતે આવિર્ભૂતે ઇતિ વ્યાખ્યેયમ્ । નનુ જાતશબ્દસ્ય જન્મવાચિન આવિર્ભાવાર્થત્વમયુક્તમિતિ ચેત્ । ન, લક્ષણયા તત્ત્વોપપત્તેઃ । અસ્તુ વા મુખ્યત એવ, જાતશબ્દ આવિર્ભાવાર્થો ભવિષ્યતિ । “જનીપ્રાદુર્ભાવે” ઇતિ સ્મરણાત્ । નનુ સ્વયમ્પ્રકાશ-સ્વાત્મન આવિર્ભાવો ન ઘટતે । આવિર્ભાવો હિ નામ-પ્રાગપ્રકાશસ્ય પશ્ચાત્પ્રકાશઃ । નચ નિત્યસ્ય સ્વપ્રભવસ્ય પ્રાગપ્રકાશઃ પશ્ચાત્પ્રકાશ ઇતિ સમ્ભવતિ । ઉચ્યતે- નિત્યપ્રકાશમપિ બ્રહ્મ અનાદ્યનિર્વાચ્યાઽવિદ્યયાઽઘટમાન-ઘટનપટીયસ્યા અપ્રકાશમિવ સમ્પાદ્યતે । વિદ્યયા તુ તસ્યામપનોદિતાયામાવિર્ભૂતમિવ ભવતિ । તતો નાનુપપત્તિઃ ।

ભક્તાનુજિઘૃક્ષયા ભગવતા જન્મ સ્વીકૃતમિત્યુક્તં, તદયુક્તમ્ । વિકૃત્યસહત્વાત્ । તથાહિ-પ્રાગસતઃ સત્તાસમવાયઃ, કારણસમવાયો વા જન્મ? નાદ્યઃ, નિત્યસતઃ પ્રાગસત્ ઇત્થંશભાવેન તદ્વિશિષ્ટ- જન્માનુપપત્તેઃ । નાન્ત્યઃ, નિષ્કારણસ્ય કારણસમવાયાયોગાત્ । કિઞ્ચ કારણસમવાયઃ- કારણમાત્રસમવાયો વા, સમવાયિકારણસમવાયો વા? નાદ્યઃ, ઘટાદીનાં જન્માભાવપ્રસઙ્ગાત્ । નહિ તેષાં નિમિત્તકારણે કુલાલાદૌ અસમવાયિકારણેઽવયવસંયોગે ચ દૃષ્ટ ઇષ્ટો વા સમવાયઃ । ન દ્વિતીયઃ, કારણમાત્રવિરહિણઃ સમવાયિકારણસમવાયવાચોયુક્તેરવકાશાભાવાત્ । પ્રધ્વંસજન્મન્યવ્યાપ્તેશ્ચ । ઉચ્યતે- દેહસમ્બન્ધ એવ જન્મ । ભગવતશ્ચ લોકાનુજિઘૃક્ષયા દેહસમ્બન્ધઃ શ્રુતિસ્મૃતિપુરાણેતિહાસપ્રસિદ્ધઃ । નનુ તર્હ્યઙ્કુરાદીનાં દેહસમ્બન્ધવિરહિણાં અજન્મતૈવ પ્રસજ્યેત । સ્યાદેવં, યદિ જન્મમાત્રસ્યૈતલ્લક્ષણં સ્યાત્ । નત્વેવં, કિન્તર્હ્યા-ત્મજન્મનએવ । આત્મનો ઘટાદિવત્સ્વરૂપતો જન્મરહિતસ્યાપિ દેહસઙ્ગતિલક્ષણજન્માઙ્ગીકારેઽપ્યનુપ-પત્ત્યભાવાત્ । તદુક્તં અક્ષચરણોપજીવિભિઃ- “ઉત્પત્તિર્દેહસઙ્ગતિ’રિતિ ।

નન્વયોનિજવ્યતિરિક્તદેહસઙ્ગતેરેવેયં જનકાપેક્ષા । તસ્માજ્જનકો વક્તવ્ય ઇત્યતસ્તમાહ-દશરથેઇતિ । “દશભી રથૈરેક એવ યુધ્યતીતિ” દશરથસ્તસ્મિન્ । નનુ રામસ્ય કૌશલ્યાદશરથોભયજન્મત્વે સતિ કેવલદશરથ-જન્યત્વાભિધાને યુવનાશ્વસ્ય માન્ધાતૃજન્માભિધાનવત્કારણં ન પશ્યામઃ । માત્રપેક્ષયા પિતુઃ પ્રાધાન્યમેવ કારણમિતિ ચેત્, “એભ્યો માતા ગરીયસીતિ” પિત્રાદિભ્યો માતુરેવ પ્રાધાન્યસ્મરણાત્ । સત્યમ્, તથાપિ માત્રવયવાપેક્ષયા ભૂયસામેવ પિત્રવયવાનાં પુત્રે સઙ્ક્રમાદિહ પિતૃમાત્રસઙ્કીર્તનમ્ । તદાહ પરમર્ષિઃ-

“પુમાન્ પુંસોઽધિકે શુક્રે સ્ત્રી ભવત્યધિકે સ્ત્રિયઃ”

ઇતિ । કિઞ્ચ શ્રુતિરપિ પિતુઃ પ્રાધાન્યમાહ- “આત્મા વૈ પુત્રનામાસીતિ’। નચાયમાત્મશબ્દો માતાપિત્રો-રુભયોરપિ સ્વરૂપસ્ય પુત્રનામકત્વં દર્શયતીતિ વાચ્યમ્, શ્રુતિવ્યાખ્યાનરૂપઃ યા સ્મૃત્યાઽપિ પિતૃરૂપસ્યૈવ પુત્રનામકત્વપ્રતિપાદનાત્ ।

“પિતૈવ પુત્રરૂપેણ જાયતે શ્રુતિવાગ્ યતઃ”

ઇતિ હિ સ્મૃતિઃ । અયમેવાર્થઃ પાદ્મેઽપિ દૃશ્યતે-

દ્વૌ ગુરૂ પુરુષસ્યેહ પિતા માતા ચ ધર્મતઃ ।

તયોરપિ પિતા શ્રેયાન્ બીજપ્રાધાન્યદર્શનાત્ ॥

ઇતિ । નનુ તર્હિ “એભ્યો માતા ગરીયસી” ઇત્યેતદનવકાશં સ્યાત્ । ન સ્યાત્, માતુર્ગર્ભધારણાદિક્લેશાદિ-સહિષ્ણુત્વાભિપ્રાયેણ પ્રાધાન્યવ્યપદેશોપપત્તિરિતિ । મનુષ્યાન્તરવદેવ મનુષ્યાવતારસ્ય શ્રીરામચન્દ્રસ્યાપિ પ્રસક્તં પરમાર્તિપરાકર્તૃત્વાભાવં વારયતિ-હરાવિતિ । “પરમાર્તિં હરતીતિ” હરિસ્તસ્મિન્ । “ભિદ્યત” ઇત્યાદિશ્રુતિરસ્મિન્નર્થેઽનુસન્ધેયા ।

તથાચ શ્રીમદ્ભાગવતેઽપિ-

લોકત્રયસ્ય મહતીમહરદ્ય આર્તિં

સ્વાયમ્ભુવેન મનુના હરિરિત્યનૂક્તઃ ।

ઇતિ । વસ્તુતોઽપિતૃકસ્ય પિતરમિવ પરમાર્થતઃ કુલરહિતસ્યાપિ કુલં નિર્દિશતિ- રઘોઃ કુલ ઇતિ । એવં જન્મકુલરહિતસ્યાપિ કુલજન્મની આવિદ્યકે અનયા શ્રુત્યાઽભિહિતે ।

સ્મૃતિરપ્યાહ-

ચૈત્રમાસે નવમ્યાં તુ શુક્લપક્ષે રઘૂત્તમઃ ।

પ્રાદુરાસીત્ પુરા બ્રહ્મન્! પરં બ્રહ્મૈવ કેવલમ્ ॥

ઇતિ । “રઘોઃ કુલે દશરથે ચિન્મયેઽસ્મિન્ મહાવિષ્ણૌ હરૌ જાતે સતિ વિદ્વદ્ભિઃ આત્મતત્વજ્ઞૈર્લોકેષુ સ રામ ઇતિ પ્રકટીકૃતઃ” ઇતિ યોજના । યો- હરિ રાતિ- દદાતિ અભીષ્ટમનભીષ્ટં ચ સ્વકર્માનુસારેણ, મહીસ્થિતઃ સન્ રાજતે મહીસ્થઃ સન્નિતિ વા । એતેન રામનામ્નો દ્વે નિરુક્તી જ્ઞાતવ્યે । એકા- રાતીત્યત્રત્યે રાક્ષરે, મહીસ્થિત ઇત્યત્રત્વે મકારે ચ યોજિતે સતિ રામો ભવતીતિ । અપરા-રાજતેર્ધાતો રાક્ષરે મહીશબ્દગતમકારે ચ યોજિતે સતિ ભવતીતિ । પદદ્વયગતૈકાક્ષરગ્રહણેન પદદ્વયપ્રતિપાદ્યોઽર્થઃ કથં પ્રતિપત્તવ્ય ઇતિ ચેત્, “અપ્યક્ષર- સામાન્યાન્નિર્બ્રૂયા’દિતિ યાસ્કવચનાદિતિ બ્રૂમઃ । યદ્વા મહીપદગતમકારાસંસ્પર્શેન રાતીતિ રામ ઇત્યેવ નિર્વક્તવ્યમ્ । તર્હિ રામ ઇત્યત્રત્યો મકારો વ્યર્થઃ સ્યાદિતિ ચેન્ન, મકારાભાવે કર્તૃત્વસ્ય લાભાભાવાત્ । કર્તરિ હ્યૌણાદિકો મકારપ્રત્યયો વિહિતોઽસ્તિ । અથવા “રા દીપ્તૌ” ઇતિ ધાતોઃ ક્વિપિ “રા” ઇત્યેવ નિષ્પદ્યતે । મઃ શિવઃ ચન્દ્રો વેધાઃ । “મઃ શિવશ્ચન્દ્રમા વેધા” ઇત્યભિધાનાત્ । રાશ્ચાસૌ મશ્ચેતિ રામઃ । શિવાદ્યાત્મકત્વં ચ સર્વાત્મકત્વાદસ્યોપપદ્યતે ।

વિધાન્તરેણ રામનામ નિર્વક્તિ-રાક્ષસાઇતિ । “યેન હેતુના રાક્ષસાઃ સ્વોદ્રેકતો મરણં યાન્તિ સ રામ” ઇત્યન્વયઃ । રાક્ષસા-રાવણાદયઃસ્વોદ્રેકતઃ- સ્વસ્ય શક્રાદ્યતિક્રમહેતુભૂતાદુદ્રેકત આધિક્યાત્ । નહિ ભગવાનુદ્રેકમાત્રાત્તાન્ મારિતવાન્, અપિતુ શક્રાદ્યતિક્રમકરાત્તસ્માત્ । “રા” ઇત્યનેન રાક્ષસા લક્ષ્યન્તે, “મ” ઇત્યનેન ચ મરણં યાન્તીતિ ।

એકદેશેન સમુદાયલક્ષણયા બહુલમુપલમ્ભાત્ । અથવા સ્વશબ્દેન ભગવન્તં પરામૃશ્ય તસ્યોદ્રેકતઃ સર્વાતિશયત્વેન રાક્ષસા મ્રિયન્તે ઇતિ વ્યાખ્યેયમ્ । નચ ભગવત ઉદ્રેકોઽપ્રામાણિકઃ । "અત્યતિષ્ઠદ્દશાઙ્ગુલ'મિતિ શ્રુતેસ્તત્ર પ્રમાણત્વાત્ ॥ ૧-૨॥

નિરુક્ત્યન્તરમાહ-રામનામેતિ ।

રામનામ ભુવિ ખ્યાતમભિરામેણ વા પુનઃ ॥
રાક્ષસાન્ મર્ત્યરૂપેણ રાહુર્મનસિજં યથા ॥ ૩॥
પ્રભાહીનાંસ્તથા કૃત્વા રાજ્યાર્હાણાં મહીભૃતામ્ ॥
ધર્મમાર્ગં ચરિત્રેણ જ્ઞાનમાર્ગં ચ નામતઃ ॥ ૪॥
તસ્ય ધ્યાનેન વૈરાગ્યમૈશ્વર્યં યસ્ય પૂજનાત્ ॥
તથા રામસ્ય રામાખ્યા ભુવિ સ્યાદથ તત્ત્વતઃ ॥ ૫॥

અભિરામેણ- સુન્દરેણ વપુષા તસ્ય રામનામ ભુવિ- ભૂશબ્દોપલક્ષિતલોકત્રયે ખ્યાતમ્ । અત એવપૂર્વમપ્યુક્તં - લોકેષ્વિતિ । ઇમમેવાર્થં હૃદિ નિધાય કાલિદાસોઽપિ કવિઃ રચયતિ સ્મ-

રામ ઇત્યભિરામેણ વપુષા તસ્ય ચોદિતઃ ।
નામધેયં ગુરુશ્ચક્રે જગત્પ્રથમમઙ્ગલમ્ ॥

ઇતિ । પ્રકારાન્તરેણ રામાખ્યાં નિર્વક્તિ- "રાક્ષસા'નિત્યાદિના "ભુવિ સ્યા"દિત્યન્તેન । અયમત્ર યોજનાપ્રકારઃ -રાહુઃ પર્વસન્ધૌ મનસિજં યથા પ્રભાહીનં કરોતિ, તથા રાક્ષસાન્ રાવણાદીન્ મર્ત્યરૂપેણ મનુષ્યાત્મના પ્રભાહીનાન્ કૃત્વા રાજ્યાર્હાણાં મહીભૃતાં સૂર્યસોમવંશ્યાનાં રાજ્ઞાં ચરિત્રાદિભિશ્ચતુર્ભિર્ધર્મમાર્ગાદિચતુષ્ટયં રાતિ ભગવાનિતિ હેતોઃ શ્રીરાઘવસ્ય ભુવિ રામાખ્યા સ્યાદિતિ । મનસિજશ્ચન્દ્રઃ । "ચન્દ્રમા મનસો જાત" ઇતિ શ્રુતેઃ । રાક્ષસૈર્હિ સૂર્યસોમવંશ્યાનાં રાજ્ઞાં રાજ્યાપહારેણ ધર્મજ્ઞાનવૈરાગ્યૈશ્વર્યહીનતા જાતા । શ્રીરામેણ તુ રાક્ષસાન્ હત-વતા રાજ્ઞાં સ્વસ્વરાજ્યે ચ સ્થિતિં સમ્પાદિતવતા સ્વચરિત્રાદિના ધર્માદિકં સમ્પાદિતમ્ । તદાહ વાલ્મીકિઃ-

"રાજવંશાન્ શતગુણાન્ સ્થાપયિષ્યતિ રાઘવઃ"

ઇતિ । પારમેશ્વરેણ ચરિત્રાદિના કથં રાજ્ઞાં ધર્માદિસિદ્ધિરિતિ ચેદુચ્યતે- ચરિત્રં નામ સદાચારઃ, સ ચ ધર્મહેતુઃ । તથાચ રાજાનોઽપિ શ્રીરામસ્ય ચરિત્રમાકલયન્તસ્તત્કૃપયૈવ તાદૃશચરિત્રભાજોઽભવન્ । પરમાત્મપરરામનામ્નોઽનવરતમર્થતોઽનુસન્ધાનેન જ્ઞાનભાજો (જ્ઞાન?)ધ્યાનેન નિદિધ્યાસનાઽપરપર્યાયેણ પરમાનન્દમનુભવન્તો વૈરાગ્યં- સ્રક્ચન્દનસુન્દરીપ્રભૃતિવિષયપરિષદભિલાષવિરહં ચ ભજન્તઃ પૂજનાત્- ગુર્વાદિનમસ્કારપુરઃસરયા વિસ- ર્જનાન્તયા વૈષ્ણવાગમોક્તયા સપર્યયા ઐશ્વર્યં ચાઽભજન્ । અત્ર ચ રામનામ્નસ્તિસ્રો નિરુક્તયોઽનુસન્ધેયાઃ । એકા-'રાહુર્મનસિજં યથે"તિ દૃષ્ટાન્તવાક્યસ્થપદદ્વયાદિભૂતસ્ય "રા" ઇત્યસ્ય "મ" ઇત્યસ્ય ચાક્ષરદ્વયસ્ય સંયોજનેન । અપરા તુ "રાક્ષસાન્ મર્ત્યરૂપેણે'તિ દાર્ષ્ટાન્તિકવાક્યગતયો "રામ" ઇત્યક્ષરયોઃ । તૃતીયા તુ- "રાજ્યાર્હાણાં મહીભૃતા'મિતિ વાક્યગતયોઃ ।

નનુ "પ્રભાહીનાન્ કૃત્વે'તિ ક્ત્વાપ્રત્યયો નોપપદ્યતે, ક્રિયાન્તરાનુપાદાનાત્ । નહિ ક્રિયાન્તરમનુપાદાય ક્ત્વા શક્યપ્રયોગઃ । તથા સતિ વ્રજતીત્યનુપાદાય ભુક્ત્વેત્યસ્ય કેવલસ્યૈવ પ્રયોગાપત્તેઃ । મૈવમ્, રાતીત્યસ્ય ક્રિયાન્તરસ્યોપાદાનાત્ । નનુ તર્હિ "કૃત્વા રાતી"તિ વાક્યં પર્યવસ્યતિ । એવમપ્યનુપપત્તિઃ, પ્રભાહીનાન્

કૃત્વા રાતીતિ "રા'ધાત્વર્થદાનક્રિયાયા અનિવર્તમાનત્વાત્ । સ હિ સેતુબન્ધાદિના રાવણાદીન્ પ્રભાહીનાન્ કૃત્વા પ્રાણૈર્વ્યયોજયત્, નતુ રાજ્ઞાં ધર્માદિકં સમપાદયત્ । સત્યમ્, તથાપિ ન ક્ત્વાનુપપત્તિઃ । નહ્યાનન્તર્યાર્થે ક્ત્વા વિહિતઃ, કિં તર્હિ પૌર્વાપર્યેણ । નચ પૌર્વાપર્યં ક્રિયયોરવ્યવધાનેનૈવ ભવતિ, અપિતુ વ્યવધાનેન ચ । અત એવ પૌર્વાપર્યમાત્રેપાણિનિઃક્ત્વાપ્રત્યયં સસ્માર - "સમાનકર્તૃકયોઃ પૂર્વકાલે ક્ત્વે'તિ ।

ધર્મમાર્ગં જ્ઞાનમાર્ગમિત્યત્ર માર્ગશબ્દ ઉપાયપરઃ । ઉભયત્રાપિ કર્મધારયઃ । ધર્મશ્ચાસૌ માર્ગશ્ચ, જ્ઞાનં ચાસૌ માર્ગશ્ચેતિ । ધર્મેણ હિ સુખમુપેયતે, જ્ઞાનેન ચાઽજ્ઞાનનિવૃત્તિઃ । તદાહુઃ શ્રીશઙ્કરભગવત્પૂજ્યપાદાઃ - "યતો જ્ઞાનમજ્ઞાનસ્ય નિવર્તક'મિતિ । ધર્મસ્ય માર્ગં જ્ઞાનસ્ય માર્ગમિતિ ન ષષ્ઠીસમાસો યુક્તઃ । એતત્સમાનકક્ષતયોપન્યસ્તયોર્વૈરાગ્યૈશ્વર્યયોરપ્યુપાયોપદિદિક્ષયા માર્ગશબ્દપ્રયોગાપત્તેઃ । તથેતિ તદ્વત્ત્વોક્તેશ્ચ । યથાઽખિલં રાતિ તથા ધર્માદિકમપીતિ દ્વિતીય "તથા" શબ્દાર્થઃ ।

વિધાન્તરેણાપિ નિર્વક્તિ-અથ તત્ત્વત ઇતિ । તસ્ય ભાવસ્તત્ત્વમ્, તસ્માદ્રામત્વાદિત્યર્થઃ । "રશ્ચાસૌ અશ્ચાસૌ મશ્ચે"તિ રામઃ । ર-ઇત્યગ્નિઃ, અ-ઇતિ વિષ્ણુઃ, મ- ઇતિ શિવ એતત્ત્રયરૂપત્વાદ્રામઃ । અનેન રેફાઽકારમકાર-દેવતાત્મકત્વમસ્યૈવોક્તં સ્યાત્ । નહિ સર્વાત્મકસ્ય ત્ર્યાત્મકત્વમયુક્તમ્ । અથવા ઉક્તા નિરુક્તીરુપસંહરતિ- અથ તત્ત્વત ઇતિ । યસ્માદેવમ્, અથ તત્ત્વતો રામાખ્યા સ્યાત્ । અવ્યયાનામનેકાર્થત્વાદથશબ્દોઽત્ર હેત્વર્થઃ । અયમાશયઃ-રેફઃ સ્વપ્રકાશં બ્રહ્મ વક્તિ, "રાદીપ્તા'વિત્યસ્ય ધાતોરાશ્રયણાત્ । મકારો માયા । તથાચ માયાવચ્છિન્નસ્વપ્રકાશં બ્રહ્મ રામપદાર્થઃ । તદેવ જગત્કારણમ્ । અનવચ્છિન્નસ્ય કારણત્વાનુપપત્તેઃ । જગત્કારણત્વાદેવ ચ જગદાત્મકં બ્રહ્મ, કાર્યકારણયોર્ભેદાભાવાત્ । અત એવં "સર્વં ખલ્વિદં બ્રહ્મે"તિ શ્રુતિઃ । નનુ સર્વં બ્રહ્મેતિ સર્વમનૂદ્ય બ્રહ્માત્મતાવિધિઃ, અથવા બ્રહ્માઽનૂદ્ય સર્વાત્મતાવિધિઃ? નાદ્યઃ, મિથ્યાત્વેનાઽભિમતસ્ય સર્વસ્ય બ્રહ્માત્મતાયામમિથ્યાત્વાપત્તેઃ । નહિ બ્રહ્મ મિથ્યા । ન દ્વિતીયઃ, બ્રહ્મણો મિથ્યાત્વાપત્તેઃ । નહિ મિથ્યાભૂતાત્સર્વસ્માદભિન્નમમિથ્યા ભવિતુમર્હતિ ।

અત્રોચ્યતે- સર્વમનૂદ્ય તસ્ય બ્રહ્માત્મતા વિધીયતે । નચ બ્રહ્માત્મતાયાં સર્વસ્ય સત્યત્વાપત્તિર્દોષાય । સર્વસ્યાપિ બ્રહ્માત્મના સત્યત્વસ્યેષ્ટત્વાત્ । તર્હિ "પ્રપઞ્ચો મિથ્યે'તિ વાચોયુક્તિરયુક્તા સ્યાદિતિ ચેન્ન, સ્વરૂપતો મિથ્યાત્વસ્ય બ્રહ્મરૂપેણ સત્યભૂતત્વસ્યાઽપ્યપ્રત્યૂહત્વાત્ । નહિ સ્વરૂપેણ મિથ્યાભૂતમપિ રજતં શુક્તિરૂપેણાપિ મિથ્યા ભવતિ । નનુ તર્હિ "સુવર્ણં કુણ્ડલ'મિત્યત્રાપિ કેનચિદ્રૂપેણ સત્યત્વં કેનચિદ્રૂપેણ મિથ્યાત્વમાપદ્યેતેતિ ચેન્નૈવમ્, વૈષમ્યાત્ । તત્ર હિ સુવર્ણકુણ્ડલાંશયોરન્યતરસ્યાપિ બાધાભાવાદ્વિનૈવ બાધં સામાનાધિકરણ્યપ્રયોગાત્ । સર્વં બ્રહ્મેત્યત્ર ચ સર્વસ્ય સ્વરૂપતો બાધ્યતયા બાધે સામાનાધિકરણ્ય- પ્રયોગાઽનુપપત્તિઃ । ચારઃ સ્થાણુરિતિ વત્ । યદ્વા "અથ તત્ત્વત" ઇતિ "રમન્ત" ઇત્યગ્રિમનામનિરુક્ત્યા સમ્બધ્યતે ॥ ૩-૫॥

પૂર્વં સગુણપરતયા રામનામ નિરુચ્ય સગુણોપાસનોપેયાનિર્ગુણબ્રહ્મપરતયા નિર્વક્તિ-રમન્ત ઇત્યાદિના । અથવા શબ્દાર્થો દ્વિવિધઃ, વાચ્યો લક્ષ્યશ્ચેતિ । તત્ર વાચ્યપરત્વેન રામનામ નિરુચ્ય લક્ષ્યપરત્વેનાપિ નિર્વક્તિ -રમન્ત ઇત્યાદિના ।

રમન્તે યોગિનોઽનન્તે નિત્યાનન્દચિદાત્મનિ ॥

ઇતિ રામપદેનાસૌ પરં બ્રહ્માઽભિધીયતે ॥ ૬॥

ઇતિ- અનેન પ્રકારેણ યન્નિરુક્તં રામપદં, તેનાઽસૌ-દાશરથિઃ પરં બ્રહ્મ- પરમાત્મૈવાભિધીયતે । ઇતિશબ્દપરામૃષ્ટ

નિરુક્તિપ્રકારં દર્શયતિ-રમન્ત ઇતિ । યોગઃ-ચિત્તવૃત્તેર્બાહ્યવિષયેભ્યો નિરોધઃ । “યોગશ્ચિત્તવૃત્તિનિરોધ” ઇતિ સૂત્રયામાસ ભગવાન્ પતઞ્જલિઃ । સ એષામસ્તી’તિ યોગિનઃ રમન્તે-ક્રીડન્તિ, તત્પરાઃ સન્તો હૃષ્યન્તીત્યર્થઃ । રતિ ર્નામ ઇષ્ટાર્થસંયોગજા ક્રીડેત્યાહુરાચાર્યાઃ । કુત્ર, અનન્તે-અન્તઃ પરિચ્છેદસ્તદ્રહિતે । નહ્યસ્ય દેશતો દીપપ્રભાયા ઇવ પરિચ્છેદઃ, સર્વત્ર સત્ત્વાત્ । નાપિ કાલતઃ, વિદ્યુત ઇવ સદા સત્ત્વાત્ । નાપિ વસ્તુતઃ, સ્થલે જલે વા તદતિરેકેણ કસ્યચિદપ્યભાવાદિત્યવોચામ । અથ મતમ્, સર્વસ્યાપિ તદતિરેકેણાઽસત્ત્વે યોગિનોઽપિ કથં સ્યુઃ । નહિ તે સર્વસ્માદતિરિક્તાઃ । અતિરેકે વા સિદ્ધં નઃ સમીહિતમ્ । અસ્માભિર્હિ રમણક્રિયાયાં કર્તૃવિરહં પ્રતિપાદયિતુમનન્તપદાર્થપર્યાલોચનાતો યોગિવિરહ ઉપન્યસ્યતે । સ ચ અસત્સર્વાન્તર્ગતત્વહેતુકઃ । અથ યોગિવિરહાભાવાય અસત્સર્વાન્તર્ગતત્વં યદિ નેષ્યતે, તર્હ્યનન્તર્ગતત્વં બ્રાહ્મત્વે વા પર્યવસ્યેત્તુચ્છત્વે વા । પ્રથમે- બ્રહ્માત્મનાં યોગિનાં બ્રહ્મણિ રમણાનુપપત્તિઃ । નહિ સ્વયમેવ સ્વસ્મિન્ રમતે, રમકરમણીયભાવસ્ય ભેદગર્ભત્વાત્ । ચરમે-રમણં કિમાશ્રયં સ્યાદિતિ ।

અત્રાઽભિદધ્મહે- કિં સર્વસ્યાપિ તદતિરેકેણાઽસત્ત્વં પારમાર્થિકમભિપ્રેત્યાઽયમાક્ષેપઃ ક્રિયતે વ્યાવહારિકં વા? આદ્યમઙ્ગીકુર્મઃ । નચાઙ્ગીકારે પરમતમનિરસ્તં સ્યાદિતિ વાચ્યમ્ । સિદ્ધસાધનત્વેન નિરાસાત્, તસ્ય ચાઽસિદ્ધૌ પર્યવસાનાત્ । યદાહુઃ અક્ષચરણોપજીવિનઃ-

“આશ્રયાસિદ્ધતા હેતોઃ સિદ્ધધર્મસ્ય સાધને”

ઇતિ । ન દ્વિતીયઃ, વ્યાવહારિકસ્ય નિરાસાઽયોગાત્ । નહિ પ્રપઞ્ચો વસ્તુતોઽસન્નપિ વ્યવહારતોઽપ્યસન્નિતિ વક્તું શક્યતે । નનુ બ્રહ્મણ ઉક્તમનન્તત્વમયુક્તમ્, દૃશ્યત્વેન બ્રહ્મણો વિનાશાનુમાનાદિત્યત આહ-નિત્યેતિ । નચ નિત્યત્વમપ્રામાણિકમ્ । “સર્વગતશ્ચ નિત્ય” ઇતિ શ્રુતેઃ । અત એવ દૃશ્યત્વાનુમાનમતીતકાલમસિદ્ધં ચ । દૃગ્વિષયં હિ દૃશ્યત્વમ્ । નચ બ્રહ્મણો દૃગ્વિષયતા, સ્વપ્રકાશસ્ય તદનુપપત્તેઃ । નચ સ્વયમ્પ્રકાશત્વમસિદ્ધમ્, “અત્રાયં પુરુષઃ સ્વયઞ્જ્યોતિ’રિતિ શ્રુતેઃ ।

નનુ ન બ્રહ્મણિ રમણં પુરુષાર્થઃ, સુખાપ્તિરૂપત્વસ્ય દુઃખનિવૃત્તિરૂપત્વસ્ય ચાભાવાત્ । નહિ બ્રહ્મ સુખરૂપમ્, સુખસ્ય ગુણત્વાદ્બ્રહ્મણશ્ચ દ્રવ્યત્વાત્ । નચ દ્રવ્યગુણયોરભેદઃ સમ્ભવતિ, વિરુદ્ધધર્માક્રાન્તત્વાત્ । અન્યથા મિહિરતિમિરયોરપ્યભેદાપત્તિઃ । નાપિ દુઃખનિવૃત્તિરૂપમ્, ભાવરૂપસ્ય બ્રહ્મણોઽભાવરૂપ- ત્વાઽનુપપત્તેઃ । અન્યથા ભાવોઽભાવશ્ચેતિ પદાર્થદ્વૈવિધ્યોપન્યાસસ્યોન્મત્તપ્રલપિતત્વાપત્તેરિત્યત આહ-આનન્દેતિ । અયમાશયઃ -બ્રહ્મણ આનન્દત્વેન તસ્મિન્ રમણમાનન્દાવાપ્તિરૂપતયા પુરુષાર્થ એવ । સ્યાદેતદેવમ્, યદિ બ્રહ્મણ આનન્દરૂપતા સ્યાત્ । નચ બ્રહ્મણ આનન્દાત્મકતાઽસ્તિ પ્રમાણાભાવાત્ । મૈવમ્, “આનન્દં બ્રહ્મણો રૂપ’મિતિ શ્રુતેરેવ પ્રમાણત્વાત્ । નનુ આનન્દોઽસ્તીત્યાનન્દઃ । “અર્શ- આદિભ્યો’ઽજિતિ મત્વર્થીયાઽચ્પ્રત્યયાન્તો હ્યયમાનન્દશબ્દઃ । અન્યથા નિયતપુંલ્લિઙ્ગસ્યાઽઽનન્દશબ્દસ્ય “આનન્દ’મિતિ નપુંસકત્વેન પ્રયોગાનુપપત્તેઃ । તત્કથમાનન્દરૂપં બ્રહ્મોચ્યતે । નનુ બહુલગ્રહણાલ્લિઙ્ગવ્યત્યયેન “આનન્દ’મિતિ નપુંસકતોપપત્સ્યતે । મૈવમ્, સત્યાં ગત્યામીદૃશપરિહારોપન્યાસાનવકાશાત્ ।

અત્રોચ્યતે-’આનન્દો બ્રહ્મે”ત્યાદિ શ્રૂયમાણબહુતરશ્રુત્યનુરોધેનાઽઽનન્દમિતિ નપુંસકતાયાં છાન્દસત્વેનૈવોપપાદનીયત્વાવશ્યમ્ભ । “આત્મા આનન્દરૂપઃ પરપ્રેમાસ્પદત્વા’દિત્યનુમાનાચ્ચ । નતુ યથા જ્ઞાનમાત્મગુણસ્તથાઽઽનન્દોઽપિ સ્યાત્, અન્યથા જ્ઞાનમપિ નાત્મગુણઃ સ્યાદિત્યત આહ-ચિદિતિ । નહિ ચિદપરપર્યાયં જ્ઞાનમપ્યસ્માભિરાત્મગુણત્વેનેષ્યતે,

યેનૈવ દૃષ્ટાન્તાવષ્ટમ્ભેનાऽऽનન્દસ્યાપ્યાત્મગુણત્વમાચષ્ટે ભવાન્ । તથાऽऽચક્ષાણશ્ચ “અસિદ્ધમસિદ્ધેન સાધયતો મહાનૈયાયિકત્વ’મિતિ વચનસ્યવિષયત્વાન્નનિવર્તતે । નચ જ્ઞાનસ્યાત્મરૂપતાયાં માનાભાવઃ, “સત્યં જ્ઞાન’મિતિ શ્રુતેર્માનત્વાત્ । નચેયમુપચરિતાર્થા શ્રુતિઃ, મુખ્યાર્થે બાધાભાવાત્ । અજ્ઞાનાત્મકત્વે વા આત્મનો જાડ્યં પ્રસજ્યેત । તથાચ જગદાન્ધ્યમસઙ્ગ ઇત્યુક્તમેવ । નહિ જડેનાત્મના જડઃ પ્રપઞ્ચઃ શક્યપ્રકાશનઃ । તથા સતિ પટો જડં ઘટં પ્રકાશયેત્ । અત એવાત્મનો જડસ્વાભાવાય જ્ઞાનાત્મકત્વમકામેનાऽપ્યેષિતવ્યમ્ । આત્મપદમન્તે શ્રૂયમાણં નિત્યાદિપદૈઃ પ્રત્યેકમેભિઃ સમ્બધ્યતે- નિત્યાત્મનિ આનન્દાત્મનીતિ । અત્રાસ્મશબ્દઃ સ્વરૂપવચનઃ ।

નનુ “નિત્યમાનન્દશ્ચિદ્બ્રહ્મે’તિ સામાનાધિકરણ્યપ્રયોગેણૈવ નિત્યાદીનાં બ્રહ્મસ્વરૂપત્વોપપત્તાવાત્મશબ્દો વ્યર્થ ઇતિ ચેન્ન વ્યર્થઃ । યદિ હિ વૈયર્થ્યમભિધેયરાહિત્યમ્, તન્ન । સ્વરૂપાર્થતાયા ઇદાનીમેવ નિવેદિતત્વાત્ । અહો! મહતીયં ભવતો વિસ્મરણશીલતા, યદિદાનીમેવ નિવેદિતમપ્યર્થં નાસ્માર્ષીત્ । અર્થ પ્રયોજનરાહિત્યમ્, એતદપિ ન । સામાનાધિકરણ્યપ્રાપ્તસ્યૈવ સ્પષ્ટીકરણાર્થત્વાત્ । અથવા જીવબ્રહ્મણોઃ સ્પષ્ટ એવ ભેદઃ । સંસારિત્વાऽસંસારિત્વાદિવિરુદ્ધધર્માક્રાન્તત્વાદિત્યત આહ- આત્મનીતિ । આત્મભૂતે નતુ જીવાવ્યતિરિક્તે । વ્યતિરેકે “તત્ત્વમસ્યા’દિવચનનિચયવ્યાકોપાપત્તેઃ નચ તસ્યાન્યપરત્વમ્, ઉપક્રમોપસંહારૈકરૂપ્યાદિષડ્વિધતાત્પર્યલિઙ્ગત્વાત્ । વિરુદ્ધધર્મસંસર્ગલક્ષણો હેતુરનૈકાન્તિકઃ । બિમ્બપ્રતિબિમ્બયોરસ્ય સત્ત્વેऽપિ ભેદલક્ષણસ્ય સાધ્યસ્યાભાવાત્ । નનુ તયોરપિ ભેદો દૃશ્યતે । દૃશ્યતામ્ । તર્હિ અનૈકાન્તિકત્વોદ્ભાવન- મુન્મત્તપ્રલપિતં સ્યાત્ । ન સ્યાત્, પારમાર્થિકભેદાભાવાભિપ્રાયેણ તદુદ્ભાવનાત્ । અથ વિરુદ્ધધર્મસંસર્ગેણ જીવબ્રહ્મણોરપારમાર્થિક એવ ભેદઃ સિષાધયિષિતસ્તત્કથં સવ્યભિચારતેતિ । મૈવમ્, સિદ્ધસાધ્યતાપત્તેઃ । અઙ્ગીકુર્મ એવં હિ વયમપિ । તયોરપારમાર્થિકભેદમેવમઙ્ગીકુર્વતા પારમાર્થિકભેદસ્ય સ્વસિદ્ધાન્તસ્ય પરિત્યજનાત્ । ક્વચિત્ “સત્યાનન્દે’ત્યપિ પાઠઃ । તત્ર “સત્યમબાધ્યં બાધ્યં મિથ્યે’તિ આચાર્યૈઃ સત્યશબ્દાર્થોપપાદનાદિતિ ।

નન્વેતે સત્યાદયઃ શબ્દા એકમર્થમભિદધત્યનેકં વા? ન પ્રથમઃ, એતેષાં પર્યાયતાપત્તેઃ । એકાર્થાભિધાયકતૈવ હિ પર્યાયતા । પર્યાયત્વે સહપ્રયોગોऽનુપપન્નઃ સ્યાત્ । યદાહુઃ-

પર્યાયાણાં પ્રયોગો હિ યૌગપદ્યં તુ નેષ્યતે”

ઇતિ । ઇહ ચ સહપ્રયોગઃ સ્ફુટમેવ દૃશ્યતે-’નિત્યાનન્દચિદાત્મની’તિ । નતુ ક્વેહ સહપ્રયોગઃ, નિત્યાદિપદાનાં ક્રમેણૈવોચ્ચારણાત્ । મૈવમ્, નહિ યુગપદુચ્ચારણં સહપ્રયોગઃ । અપિતુ તર્હિ એકસ્યૈવાર્થસ્ય પ્રતિપત્ત્યર્થં તદ્વાચકાનેકશબ્દપ્રયોગઃ । સ ચાનુપપન્નઃ, એકેનૈવ કૃતત્વાદિતરાનર્થક્યાદિતિ । ન દ્વિતીયઃ, વિકલ્પાસહત્વાત્ । કિં પરસ્પરમસમ્બદ્ધાનનેકાર્થાનભિદધ્યુઃ સમ્બદ્ધાન્ વા? નાદ્યઃ, દશદાડિમાદિપદાનામિવ વાક્યત્વેનાऽનુપાદેયત્વાપત્તેઃ । નાન્ત્યઃ, સમ્બદ્ધા અનેકેऽર્થા એકમેવ વિશિષ્ટ- મનેકં વા? નાદ્યઃ નિત્યાદિપદવેદનીયબ્રહ્મણો વૈશિષ્ટ્યાપત્તેઃ । નચ તસ્ય તદિષ્યતે, અખણ્ડૈકરસત્વાત્ । ન દ્વિતીયઃ, વાક્યભેદાપત્તેઃ । અર્થૈકત્વેન હ્યેકવાક્યતા ભવતિ । તદુક્તં પરમર્ષિણા- “અર્થૈકત્વાદેકં વાક્ય’મિતિ ।

અત્ર બ્રૂમઃ-સત્યાદિપદાનામનેકાર્થત્વં યન્નિરાકાર્ષીઃ, તદસ્મદભિમતમેવાऽऽકાર્ષીઃ । યત્ત્વેકાર્થત્વપક્ષં પ્રત્યાક્ષેપસ્તન્ન સહામહે । પર્યાયત્વાપત્તેરિતિ ચેન્ન । કિમેકાર્થત્વમાત્રેણ પર્યાયત્વમાપાદયસિ, અભિધેયાર્થૈક્યેન વા? નાદ્યઃ, “પ્રકૃષ્ટપ્રકાશશ્ચન્દ્ર” ઇત્યત્ર પ્રકૃષ્ટપ્રકાશપદયોઃ પ્રકર્ષપ્રકાશત્વલક્ષ્યવાચ્યાર્થદ્વારા

લક્ષ્યભૂતચન્દ્રપ્રાતિપદિકરૂપૈકાર્થપરયોરપિ પર્યાયત્વાનુપલમ્ભાત્ । ન દ્વિતીયઃ, અભિધેયાનામર્થાનામૈક્યં ચભવતોઽપસિદ્ધાન્તઃ । તયોરપારમાર્થિક- ભેદભિન્નત્વાત્ । તર્હ્યનેકાર્થત્વપક્ષોક્તદોષાપત્તિરિતિ ચેન્ન, અભિધેયાઽનેકાર્થદ્વારૈકાખણ્ડૈકરસબ્રહ્મપરત્વે તદનુપપત્તેઃ । નનુ કિમિદમર્થસ્યાખણ્ડત્વમ્? નિરવયવત્વમિતિ ચેત્તર્હિ "શબ્દગુણવિશિષ્ટમાકાશ" મિત્યાદેરપિ વાક્યસ્યાખણ્ડાર્થત્વપ્રસઙ્ગઃ । નિત્યત્વમિતિ ચેત્તર્હિ "પરમાણવઃ સત્યાત્માનઃ સન્તી" ત્યાદ્યાનામપિ વાક્યાનાં તત્ત્વપ્રસઙ્ગઃ । નિર્વિભાગાર્થત્વમિતિ ચેત્, કિમિહ વિભાગો ગુણવિશેષો ભેદો વા? નાદ્યઃ, "રૂપરસગન્ધસ્પર્શા ગુણ" ઇત્યાદેરપિ વાક્યસ્ય નિર્વિભાગાર્થત્વેનાખણ્ડાર્થત્વાપત્તેઃ । નહિ રૂપાદીનાં વિભાગોઽસ્તિ, વિભાગસ્ય ગુણત્વેન દ્રવ્યમાત્રનિષ્ઠસ્ય ગુણાધિકરણરૂપાદિષુ સમવાયાયોગાત્ । નાપિ દ્વિતીયઃ, "પદાર્થાનાં ભેદોઽસ્તી"ત્યાદેરપિ વાક્યસ્યાખણ્ડાર્થત્વાપત્તેઃ । નહિ ભેદસ્ય ભેદોઽસ્તિ, અનવસ્થાનાત્ । નાપિ અવિશિષ્ટાર્થત્વં બ્રહ્મણઃ સત્ત્વાદિવિશિષ્ટસ્યાઽવિશિષ્ટત્વાનુપપત્તેઃ । તસ્માત્ સત્યાદિપદાનાં બ્રહ્મણિ પ્રયુજ્યમાનાનામખણ્ડાર્થત્વમિતિ વચો રિક્તમેવેતિ ।

અત્રાઽભિધીયતે- અપર્યાયાનેકશબ્દપ્રકાશિતમવિશિષ્ટમિત્યખણ્ડલક્ષણમભિમતમસ્માકમ્ । તચ્ચ બ્રહ્મણિ વર્તતે । તદ્ધિ અપર્યાયૈરેવ સત્યાદિપદૈઃ પ્રકાશ્યતે । નચ વિશિષ્યતે કેનચિદ્ધર્મેણ, તસ્ય નિર્ધર્મકત્વાત્ । અત એવાહુઃ-

અવિશિષ્ટમપર્યાયાનેકશબ્દપ્રકાશિતમ્ ।
એકં વેદાન્તનિષ્ણાતા અખણ્ડં પ્રતિપેદિરે ॥

"ઇતિ । "તત્ત્વમસ્યા'દેઃ કથમખણ્ડાર્થત્વમિતિ ચેત્, ઉપાધિભેદભિન્નસ્યાર્થસ્યૈકત્વપ્રતિપાદકત્વાદિતિ બ્રૂમઃ । એતદપ્યભિહિતમાચાર્યૈઃ-

ઉપાધિભેદભિન્નોઽર્થો યેનૈકઃ પ્રતિપાદ્યતે ।
તદપિ સ્યાદખણ્ડાર્થં મહત્ખં કુમ્ભકં યથા ॥

ઇતિ । નનુનિત્યત્વાદિધર્મવિશિષ્ટનિત્યાદિરૂપધર્મિપ્રવર્તમાનતાનિત્યાદિપદાર્થઃ, તત્કથં નિત્યાદિપદાનામખણ્ડપરત્વમિતિ । મૈવમ્, અન્યત્ર ધર્માવશિષ્ટે ધર્મિણિ પ્રવર્તમાનાનાં પદાનામખણ્ડપરત્વાભાવેઽપિ બ્રહ્મણિ પ્રવર્તમાનાનાં બ્રહ્મણ્યખણ્ડપરત્વાભ્યુપગમસ્યાવશ્યકત્વાત્ । તત્કસ્ય હેતોઃ, બ્રહ્મણો નિર્ધર્મકત્વાત્ । અથ સધર્મકમેવ બ્રહ્મ કિં ન સ્યાત્, અદ્વૈતભઙ્ગપ્રસઙ્ગાદિતિ બ્રૂમઃ । નહિ ધર્મો ધર્મી ચેતિ દ્વૈતે જાગ્રતિ અદ્વૈતમુલ્લસિતું શક્નોતિ । નચાઽદ્વૈતાનુલ્લાસે કિં નશ્છિન્નમિતિ વાચ્યમ્, તત્પ્રતિપાદકશ્રુતીનાં પ્રામાણ્યસ્ય છિન્નત્વાત્ । નન્વેવમિષ્ટમેવ નશ્ચેષ્ટિતં સ્યાત્ । નહિ વયમ- દ્વૈતશ્રુતીનાં પ્રામાણ્યસભ્યુપગચ્છમામઃ । કથં હિ દ્વૈતવાદિનસ્તાસાં પ્રામાણ્યમભ્યુપગચ્છેયુરિતિ । સત્યમેવમ્ । સ્વાઙ્ગીકૃતદ્વૈતાનુરોધાદેવ કિમદ્વૈતશ્રુતીનાં પ્રામાણ્યં ભવતા નાભ્યુપેયમ્? આહોસ્વિદભૂષામદ્વૈતે તાત્પર્યાભાવાત્? નાદ્યઃ, કાચાદિદોષરૂષિતલોચનેનાપિ સ્વપ્રતીતરજતભુજગાદ્યનુરોધેન "નેદં રજતં નાયં ભુજગ" ઇત્યાદિપ્રત્યયાનામપિ પ્રામાણ્યાનભ્યુપગમાપાતાત્ । તત્કિમિદાનીં દ્વૈતપ્રતીતી રજતાદિપ્રતીતિ- વદ્વિભ્રમઃ? કઃ સન્દેહઃ । બાધવિધુરાયા દ્વૈતપ્રતીતેઃ કથં વિભ્રમત્વમિતિ ચેન્નૈવમ્, બાધવિધુરત્વરહેતોરસિદ્ધત્વાત્ । સન્તિ હિ ભેદપ્રત્તીતેરપરોક્ષત્વાદિયૌક્તિકબાધાઃ, તેચેહ વિસ્તરભિયા નોપન્યસ્યન્તે । નાપિ દ્વિતીયઃ, અદ્વૈતે તાત્પર્યાભાવસ્યાઽસિદ્ધત્વાત્ । નહિ તાત્પર્યલિઙ્ગેષુ સત્સ્વપિ તાત્પર્યવિરહઃ શક્યાભિધાનઃ । નચ તાત્પર્યલિઙ્ગાનિ ન સન્તિ, ઉપક્રમોપસંહારૈકરૂપ્યાદીનાં ષણ્ણામપિ તેષાં શ્રુતિશિખરવચનનિચયેષૂપ- લમ્ભાત્ । અપિચ બ્રહ્મણ્યભ્યુપગમ્યમાના ધર્માસ્તતો ભિન્ના

અભિન્ના ભિન્નાભિન્ના વા? આદ્યે સમ્બન્ધોઽસ્તિ ન વા? ન ચેત્, ન તે બ્રહ્મધર્માઃ સ્યુઃ । અસમ્બન્ધેઽપિ તદ્ધર્મત્વે-સર્વઃ સર્વધર્મઃ સ્યાત્ । અસ્તિચેત્, તત્ર વક્તવ્યમ્-સમ્બન્ધસ્ય સમ્બન્ધિભ્યાં સહ સમ્બમ્ધોઽસ્તિ ન વા? ન ચેત્, કથં સમ્બન્ધિતા સ્યાત્ । અસ્તિ ચેત્, તસ્યાપિ સમ્બન્ધાન્તરાભાભાવે તદીયત્વાનુપપત્તૌ સમ્બન્ધાન્તરસ્યાઽવશ્યાભ્યુપગમ્યત્વેઽનવસ્થાપાતાત્ । દ્વિતીયે-ધર્મ્યેવ ન ધર્મ ઇત્યસ્મદભિમતસિદ્ધિઃ । ઇદમેવાભિપ્રેત્ય પ્રથમભાષ્યવ્યાખ્યાનાવસરે પઞ્ચપાદિકાચાર્યૈરભિહિતં - “આનન્દો વિષયાનુભવો નિત્યત્વં ચેતિ સન્તિ ધર્મા” ઇત્યાદિના । તૃતીયસ્તુ વિરોધગ્રસ્તતયાઽનુપપન્ન એવ । નહિ ભેદોઽભેદશ્ચ સહાવસ્થાતું શક્નુતઃ । તસ્માન્નિર્ધર્મકમેવ બ્રહ્મેતિ તત્ર પ્રવર્તમાનાનામુક્તન્યાયેનાખણ્ડાર્થત્વમેષ્ટવ્યમ્ ॥ ૬॥

એવં રામપદનિરુક્તિવ્યાજેન નિર્ગુણબ્રહ્મ “ચિન્મય” ઇત્યા’દ્યભિધીયત” ઇત્યન્તેન પ્રતિપાદ્ય તદેવ સગુણત્વેન કલ્પિતમિત્યાહ - “ચિન્મયસ્યે” ત્યાદિભિશ્ચતસૃભિઃ કણ્ડિકાભિઃ ।

ચિન્મયસ્યાદ્વિતીયસ્ય નિષ્કલસ્યાઽશરીરિણઃ ॥

ઉપાસકાનાં કાર્યાર્થં બ્રહ્મણો રૂપકલ્પના ॥ ૭॥

ચિન્મયસ્ય- ચિદેકરસસ્ય અદ્વિતીયસ્ય- સજાતીયવિજાતીયસ્વગતભેદશૂન્યસ્ય નિષ્કલસ્ય-વસ્તુતો માયારહિતસ્ય । દશરથાદાવિર્ભૂતત્વેન શરીરિત્વશઙ્કાં વારયતિ-અશરીરિણઃ- માયાવિરાહિણોઽહઙ્કારા-ભાવાન્માયાકાર્યદેહાઽનાકલિતસ્યૈવમ્ભૂતસ્ય શ્રીરામશબ્દાભિધેયસ્ય પરસ્ય વસ્તુનો રૂપકલ્પના- ચતુર્ભુજાદિવક્ષ્યમાણરૂપકલ્પના ક્રિયતે ।

નન્વિયં કલ્પના નાવકલ્પતે ફલવૈકલ્યાદત આહ-ઉપાસકાનામિતિ । નનુ કિમિદં કાર્યમ્ । ફલમિતિ બ્રૂમઃ । કથં કાર્યપદં ફલે પ્રવર્તતે । કૃતિવિષયત્વાત્ । નનુ તર્હિ ભારવહનાદિકમપિ ફલં સ્યાત્, નહિ તસ્ય કૃત્યવિષયત્વમસ્તિ । અસ્તુ ભારવહનાદેરપિ કૃતિવિષયત્વમ્, નૈતાવતાપિ તસ્ય ફલત્વાપત્તિઃ । કૃત્યુદ્દેશત્વરૂપસ્ય વિષયત્વ-સ્યાઽભાવાત્ । કૃત્યુદ્દેશત્વમેવ ચ ફલત્વમિતિ નાનુપપત્તિઃ । નનૂપાસકા ઇહ સગુણોપાસકા ઉત નિર્ગુણોપાસકાઃ? પ્રથમે- તેષાં કસ્મૈ ફલાય રૂપકલ્પના? કિં સગુણસ્ય પ્રાપ્તયે નિર્ગુણસ્ય વા?આદ્યે- સગુણં પારમાર્થિકમપારમાર્થિકં વા? પ્રથમેઽપિ - તયોર્ભેદઃ પારમાર્થિકોઽસ્તિ ન વા? પ્રથમેઽદ્વૈત- ભઙ્ગપ્રસઙ્ગઃ । ન દ્વિતીયઃ, સગુણત્વં નિર્ગુણત્વં ચોભયં પારમાર્થિકમઙ્ગીકૃત્ય સગુણનિર્ગુણયોઃ પારમાર્થિક- ભેદાનઙ્ગીકારે વિરોધાપત્તેઃ । અથ અપારમાર્થિકમેવ સગુણં રૂપમિતિ પક્ષં શ્રેયાંસં મન્યસે, તથાપિ ન તાદૃશરૂપાવાપ્તિઃ ફલકોટૌ નિવેષ્ટું શક્નોતિ । અપારમાર્થિકરૂપાવાપ્તેઃ કેનચિદનભિલષ્યમાણત્વાત્ । નાપિ નિર્ગુણત્વપ્રાપ્તયે રૂપકલ્પનેતિ પક્ષઃ । સગુણોપાસકાનાં નિર્ગુણપ્રાપ્ત્યનુપપત્તેઃ । નો ખલુ ચિત્રાકારીર્યાદ્યનુષ્ઠાયિનો જ્યોતિષ્ટોમાદિસાધ્યસ્વર્ગાદ્યવાપ્તિઃ । અથોપાસકશબ્દેન નિર્ગુણરૂપનિષ્ઠા એવ વિવક્ષિતાસ્તર્હિ તેષામપિ ફલાયૈવ રૂપં પરસ્ય બ્રહ્મણઃ કલ્પનીયમ્ । તઞ્ચ ફલં ન પશ્યામઃ । ન તાવત્સગુણાવાપ્તિઃ, તદર્થં તૈરુપાયાનનુષ્ઠાનાત્ । અનનુષ્ઠિતોપાયાનામભ્યુપેયપ્રાપ્તાવતિપ્રસઙ્ગાત્ । અસ્તુ વા યથા તથા, તથાપ્યુચ્ચાભિલાષિણાં નીચાવાપ્તિઃ કથં નામ ફલતામાકલયેત્? અથ નિર્ગુણાવાપ્તિરેવ ફલમિતિ મન્યસે, ન । તસ્યા ગગનકુસુમાયમાનત્વાત્ । ગગનકુસુમાયમાનત્વાભાવેઽપિ વા દુર્લભત્વાત્ । નહિ દૃઢતરસંસારવાસનાવાસિતમનાઃસૌલભ્યેનાકલયિતુંશક્નોતિ । નચાઽત્યન્તદુર્લભસ્ય ફલત્વમુપપદ્યતે । મહારાજેન ભુજ્યમાનસ્યાપિ રાજ્યસ્ય રાજ્યપ્રાપકાઽદૃષ્ટ- વિરહિતાનપિ પ્રતિ ફલત્વાપત્તેઃ । તસ્માત્ “ઉપાસકાનાં કાર્યાર્થ”મિત્યનુપપન્નમેવેતિ ।

અત્રોચ્યતે- ઉપાસકશબ્દેનેહ ન નિર્ગુણનિષ્ઠા અભિધીયતે, કિં તર્હિ સગુણનિષ્ઠા । “બ્રહ્મણો રૂપકલ્પના” ઇત્યુક્તેઃ । નહ્યુપાસનાય કલ્પિતરૂપોપાસના નિર્ગુણનિષ્ઠા ભવિતુમર્હતિ । નચ સગુણોપાસનાયાઃ ફલાભાવઃ, સગુણપ્રાપ્તેઃ ફલત્વાત્ । નનુ સગુણમપારમાર્થિકં અપારમાર્થિકં ચ ન ફલં ભવિતુમર્હતીત્યુક્તમ્ । સત્યમ્, તથાપિ તસ્ય વ્યાવહારિકપારમાર્થિકત્વાઙ્ગીકારેણ ફલત્વમુપપદ્યત એવ । નહિ વ્યવહારતઃ સત્યં સ્વર્ગાદિકં ન દર્શપૂર્ણમાસાદેઃ ફલમ્ । નનુ સાંસારિકાણામનિત્યમપિ સ્વર્ગાદિકમસ્તુ, મુમુક્ષૂણાં નિત્યનિરતિશયફલાર્થિનાં કથમીદૃશસગુણપ્રાપ્તિઃ ફલમિતિ । ભવેદેવમ્, યદિ સગુણપ્રાપ્તિઃ પરમં ફલમિતિ બ્રૂમઃ । કિં તર્હિ અવાન્તરફલમિતિ વદામઃ । કિં તર્હિ પરમફલમ્? નિત્યનિરતિશયાનન્દનિર્ગુણાવાપ્તિઃ । નત્વસ્યાઃ સગુણોપાસના-સાધ્યત્વમનુપપન્નમ્ । અન્તઃકરણશુદ્ધિદ્વારા તદુપપત્તેઃ । શ્રૂયતે “હિ- “તમેતં વેદાનુવચનેન” ઇતિ । નનુ તર્હિ અન્તઃકરણશુદ્ધિદ્વારાઽન્યત્ર વિનિયુક્તાયાઃ સગુણોપાસનાયા નિર્ગુણપ્રાપ્ત્યુપાયતા નોપપદ્યતે । નહ્યન્યત્ર વિનિયુક્તમન્યત્ર શક્યવિનિયોગમ્ ।

મૈવમ્, સંયોગપૃથક્ત્વેન તદુપપત્તેઃ । તથાચાઽઽહ પરમર્ષિઃ- “એકસ્ય તૂભયત્વે સંયોગપૃથક્ત્વ” મિતિ । નનુ અભિલષિતફલં નિત્યં રૂપકલ્પના ચાઽનિત્યા, તયા તદવાપ્તિઃ કથં ફલમ્ । નહિ ગન્ધર્વનગરરાજ્યાભિષિક્તેન સુતેન મુખસમ્પત્તિર્વન્ધ્યાયાઃ । ન, બ્રહ્મવ્યતિરિક્તસત્યત્વાઙ્ગીકારે દ્વૈતાપત્તિઃ । નનુ દ્વૈતભીત્યા પ્રમાત્રાદિસત્યત્વમનઙ્ગીકુર્વતઃ શાસ્ત્રાનર્થક્યં દુર્વારમિતિ ચેન્ન, યુક્તિભિરસ્ય ચોદ્યસ્ય પરિહરણીયત્વાત્ । તથાહિ-પ્રમાતર્યસતિ પ્રાપ્તવ્યસ્ય પ્રાપ્તિઃ સતિ વા? નાદ્યઃ, પ્રાપ્તુરભાવે પ્રાપ્તિક્રિયાયા એવાનુપપત્તેઃ । નહિ છેત્તુરભાવે છિદિક્રિયા સત્યપિ ચ્છેત્તવ્યે વૃક્ષાદૌ દૃષ્ટચરી । અતઃ સતિ પ્રમાતરિ પ્રાપ્તવ્યસ્ય પ્રાપ્તિરિતિ વક્તવ્યમ્ । તદા શ્રુત્યાચાર્યાદિરૂપકલ્પનાયા અસ્ત્યેવ સત્યત્વમ્ । તત્તુ પ્રાતીતિકં, વ્યાવહારિકં, પારમાર્થિકં ચેતિ ત્રિવિધમ્ । તત્ર પારમાર્થિકં નામ - સત્યસતિ વા પ્રમાતરિ સર્વથા બાધરહિતત્વમ્, તદ્બ્રહ્મણ એવ । સતિ પ્રમાતર્યબાધ્યત્વં વ્યાવહારિકમ્, યથાઽઽકાશાદેઃ । સતિ પ્રમાતરિ બાધ્યત્વં પ્રાતીતિકમ્, યથા પ્રતિબિમ્બાદૌ । તદસ્ત્યેવ રૂપકલ્પનાયાઃ । તસ્યાં ચાર્થક્રિયાકારિત્વમપિ યુક્તમ્ । ભાસ્કરપ્રતિબિમ્બ, તસ્કરપદાન્વેષણ, સ્વપ્નકામિન્યાદીનાં ભાસ્કરતસ્કરોપસ્કરાદિપ્રાપ્તિહેતુત્વાત્ ।

યદા કર્મસુ કામ્યેષુ સ્ત્રિયં સ્વપ્નેષુ પશ્યતિ ।
સમૃદ્ધિં તત્ર જાનીયાત્તસ્મિન્ સ્વપ્નનિદર્શને ॥

ઇતિ શ્રુતેઃ । બન્ધ્યાસુતાદેસ્તુચ્છત્વાન્ન દૃષ્ટાન્તતા ।

તથાચોક્તં વાર્તિકકૃદ્ભિઃ-

અક્ષમા ભવતઃ કેયં સાધકત્વપ્રકલ્પને ।
કિં ન પશ્યસિ સંસારં તત્રૈવાઽજ્ઞાનકલ્પિતમ્ ॥

ઇતિ । તસ્માદ્રૂપકલ્પનયોપાસકસ્ય શ્રીરામાખ્યસ્ય પરબ્રહ્મણોઽવાપ્તિઃ સુલભેત્યલમતિકુતર્કેણ ॥ ૭॥

સામાન્યેનોક્તાયા રૂપકલ્પનાયા વિશેષમન્તરેણાપર્યવસાનાદ્વિશેષે પર્યવસાનમાહ-રૂપસ્થાનામિતિ ।

રૂપસ્થાનાં દેવતાનાં પુંસ્ત્ર્યઙ્ગાસ્ત્રાદિકલ્પના ॥
દ્વિચત્વારિષડષ્ટાઽઽસાં દશ દ્વાદશ ષોડશ ॥ ૮॥
અષ્ટાદશાઽમી કથિતા હસ્તાઃ શઙ્ખાદિભિર્યુતાઃ ॥

સહસ્રાન્તાસ્તથા તાસાં વર્ણવાહનકલ્પના ॥ ૯॥
શક્તિસેનાકલ્પના ચ બ્રહ્મણ્યેવં હિ પઞ્ચધા ॥
કલ્પિતસ્ય શરીરસ્ય તસ્ય સેનાદિકલ્પના ॥ ૧૦॥

રૂપમિહ સગુણં હિરણ્યગર્ભાદિશબ્દિતમ્ । “બ્રહ્મણો રૂપકલ્પને’તિ કલ્પનાવિષયત્વેનોક્તસ્ય રૂપસ્ય નિર્ગુણત્વાનુપપત્તેઃ । અતો રૂપકલ્પનેત્યુક્તમ્ । તસ્યૈવ રૂપસ્ય પ્રત્યભિજ્ઞાનાત્સાન્નિધ્યાચ્ચ “રૂપસ્થાનામિ”ત્યત્રાપિ ગ્રહણમુચિતમ્ । રૂપે તિષ્ઠન્તીતિ રૂપસ્થાસ્તાસાં દેવતાનાં યથારુચિ વિષ્ણ્વાદીનાં પુંસ્ત્ર્યઙ્ગાસ્ત્રાદિકલ્પના- પુમાન્ “વિષ્ણુઃ શિવો બ્રહ્મે”ત્યાદિરૂપેણ સ્ત્રી “લક્ષ્મીર્ગૌરી સરસ્વતી’ત્યાદિરૂપેણ અઙ્ગાનિ હૃદયાદ્યાત્મના અસ્ત્રાણિ સુદર્શનાદ્યાત્મના આદિપદગૃહીતાઽઽવૃતિદેવતાત્મના ચ કલ્પના સ્યાત્ । કિઞ્ચ દ્વ્યાદિસહસ્રાન્તા હસ્તાઃ શઙ્ખાદિભિરાયુધૈર્યુતા અમી આસાં-કલ્પિતદેવતાનાં કથિતા-ઉક્તાઃ શ્રુત્યનુરોધેન કલ્પવિદ્ભિઃ । અત્ર ચ “રૂપસ્થાના’મિત્યાદિ “સહસ્રાન્તા” ઇત્યન્તૈકા કલ્પના, તથા- તેનૈવ પ્રકારેણ શુક્લાદિવર્ણકલ્પના દ્વિતીયા, ગરુડાદિવાહનકલ્પના તૃતીયા, ચતુર્થી વિષ્વક્સેનાદિસેનાકલ્પના, વિમલાદિશક્તિકલ્પના પઞ્ચમી । એવં પઞ્ચવિશિષ્ટાં સઙ્ખ્યાં વાચકશબ્દેનોપસંહરતિ- બ્રહ્મણિ- શ્રીરામે એવમ્- ઉક્તેન પ્રકારેણ । હિશબ્દઃ પ્રસિદ્ધિદ્યોતકઃ । પઞ્ચધા- પઞ્ચભિઃ પ્રકારૈઃ કલ્પના ભવતીત્યર્થઃ ।

અનેન વિષ્ણુશિવાદિસાધારણદેવતાકલ્પના દર્શિતા । ઇદાનીં પ્રકૃત્ય શ્રીરામાખ્યસ્યૈવ પરસ્ય બ્રહ્મણ ઉપાસનોપયોગિનીં કલ્પનામનુસન્ધત્તે-’કલ્પિતસ્ય શરીરસ્ય તસ્ય સેનાદિકલ્પને’ત્યર્ધેન । તસ્ય શરીરસ્યેતિ વ્યધિકરણે ષષ્ઠ્યૌ । તસ્ય- શ્રીરામસ્ય યત્ શરીરં કલ્પિતં વક્ષ્યમાણચતુર્ભુજાદિરૂપેણ, તસ્ય સેનાદિકલ્પના ભવતિ । વર્ણાદિરાદિશબ્દાર્થઃ । નચેયં કલ્પના- નિરર્થિકા, ઉપાસનાર્થત્વાદિતિ બ્રૂમઃ ॥ ૮-૧૦॥

નનૂપાસનમિદં ન રૂપકલ્પનામાત્રેણ સિધ્યતિ, કિન્તુ મન્ત્રાનુષ્ઠાનેન । અતો વક્ષ્યમાણં રામમન્ત્રાનુષ્ઠાનં કર્તવ્યં ચેત્તર્હિ બ્રહ્માદિદેવતામન્ત્રાનુષ્ઠાનમવજ્ઞાતં સ્યાદત આહ-બ્રહ્માદીનામિતિ ।

બ્રહ્માદીનાં વાચકોઽયં મન્ત્રોઽન્વર્થાદિસંજ્ઞકઃ ॥
જપ્તવ્યો મન્ત્રિણા નૈનં વિના દેવઃ પ્રસીદતિ ॥ ૧૧॥

અયમિત્યનેન વક્ષ્યમાણષડક્ષરો મન્ત્રરાજઃ પ્રતિસન્ધીયતે । બ્રહ્માદીનાં દેવતાનાં શ્રીરામાદ્ભેદાભાવેન શ્રીરામમન્ત્રો બ્રહ્માદિવાચક એવ । અતો રામમન્ત્રાનુષ્ઠાનેન બ્રહ્માદિમન્ત્રાનુષ્ઠાનમપિ ભવતિ, ઇતિ ન ભવતિ બ્રહ્માદિમન્ત્રાનુષ્ઠાનાવજ્ઞેતિ ભાવઃ । મન્ત્રરાજસ્ય સર્વેભ્યો મન્ત્રેભ્ય ઉત્કર્ષાદિ દર્શયિષ્યન્ વિશિનષ્ટિ અન્વર્થાદિસંજ્ઞક ઇતિ । સર્વાન્ અર્થાન્-આકાશાદીન્ વાચ્યાત્વાચકત્વેનાઽનુગતવતી આદિઃ - શ્રેષ્ઠા સંજ્ઞા રામાનામરૂપા યસ્મિન્ સ તથા । “શેષાદ્વિભાષે”તિ બહુવ્રીહૌ કપ્રત્યયઃ । અનેન બ્રહ્માદિમાત્રવિષયત્વેન પ્રાપિતમસ્ય મન્ત્રસ્ય વાચકત્વસઙ્કોચં સર્વાર્થવાચકત્વોપન્યાસેન વારયતિ । નન્વેવમસ્તુ મન્ત્રરાજો બ્રહ્માદિવાચકઃ સર્વત્રસ્તુવાચકો વા, તથાપિ પ્રવૃત્તિનિવૃત્ત્યન્યતરાનુપદેશાદ્વાચકત્વપ્રતિપાદકવચનસ્ય ન શાસ્ત્રત્વં સ્યાત્ । યદાહુઃ-
પ્રવૃત્તિર્વા નિવૃત્તિર્વા નિત્યેન કૃતકેન વા ।
પુંસાં યેનોપદિશ્યેત તચ્છાસ્ત્રમભિધીયતે ॥

ઇતિ । તત્રાહ- જપ્તવ્ય ઇતિ । લિઙ્લોટ્તવ્યપ્રત્યયા હિ વિધાયકાઃ । અતો “જપ્તવ્ય” ઇત્યયં તવ્યપ્રત્યયાન્તો વિધિરેવ । અત એવ તદ્વિધિપ્રતિપિપાદયિષયૈવોપન્યસ્તં વાચકત્વપ્રતિપાદકં વચનં

પુરુષપ્રવૃત્તિપર્યવસાયિતયા શાસ્ત્રં ભવતીતિ ભાવઃ । નનુ “જપ્તવ્ય” ઇતિ ન વિધિઃ, વિધિત્વે પ્રમાણાભાવાત્ । તવ્ય- પ્રત્યય એવ પ્રમાણમિતિ ચેન્ન, તસ્ય વ્યભિચારાત્ । કથમિતિ ચેત્, “વિષ્ણુરુપાંશુ યષ્ટવ્ય” ઇત્યાદીનાં વિધિત્વે પ્રામાણ્યાનભ્યુપગમાત્ । કુતો ન પ્રામાણ્યમભ્યુપગમ્યતે ઇતિ ચેત્, વિષ્ણ્વાદિયાગવિધીનામભ્યુપગમે વાક્યભેદાપત્તેઃ । વાક્યૈક્યાસમ્ભવે વાક્યભેદો ન દોષાયેતિ ચેત્ - ભવેદેવમ્, યદિ વાક્યૈક્યાસમ્ભવઃ સ્યાત્ । નચેહ વાક્યૈક્યાસમ્ભવઃ, વાક્યૈક્યસ્યાવશ્યકત્વાત્ । કુતોઽસ્યાવશ્યકત્વમિતિચેત્, ઉપક્રમોપસંહારૈકરૂપ્યતાત્પર્યલિઙ્ગૈનૈકવાક્યત્વમતીતેર્દુર્બાધત્વાત્ । “જામિ વા એતદ્યજ્ઞસ્યે’ત્યત્ર હિ જામિતાદોષેણોપક્રમઃ અજામિત્વાયેતિ પ્રતિસમાધીયમાનો જામિતાદિદોષેણૈવોપસંહારઃ । નન્વેવં “યષ્ટવ્ય” ઇત્યાદૌ વિધિવિરહશ્ચેત્તવ્યપ્રત્યયસ્ય કા ગતિઃ? વિધિસ્વરૂપત્વમિતિ બ્રૂમઃ । નન્વેવં “જપ્તવ્ય” ઇત્યત્રાપિ વિધિવિરહે વિધિસ્વરૂપત્વમસ્તુ । મૈવમ્, વિધિત્વે બાધાભાવાદ્વિધિવિરહવાચોયુક્તેરનુપપત્તેઃ । તસ્માત્ શ્રોતવ્ય ઇતિવત્ જપ્તવ્ય ઇત્યપિ વિધિરેવ । નત્વનાગતોત્પાદ્યભાવનાવિષયો વિધિઃ । સ ચ ન વિષયભૂતભાવનાનભ્યુપગમે શક્યાભ્યુપગમઃ । વિષયાભાવે વિષયિણાત્મલાભાસમ્ભવાત્ । અતો વિષયભૂતા ભાવના અવશ્યાભ્યુપગન્તવ્યા । સા ચ “કિં કેન કથમ્” ઇત્યંશત્રયવતી । તત્ર કિં ભાવયેદિત્યાકાઙ્ક્ષાયાં મોક્ષં ભાવયેત્ । કેન કથં બ્રહ્મચર્યાદિભિરુપકૃત્ય ।

નતુ ભાવના ભવનપ્રયોજકો વ્યપારઃ, સ ચ પ્રયત્નઃ પરિસ્પન્દો વા । અત્ર જપવિધૌ ન તાવત્પુરુષપ્રયત્નો ભાવના । ભવિતુમર્હતિ, ભાવ્યાભાવાત્ । નનુ “મોક્ષો ભાવ્ય” ઇત્યુક્તમ્, સત્યમુક્તમ્ । નિત્યસ્ય તસ્ય ભાવ્યત્વં ન સમ્ભવતીતિ બ્રૂમઃ । નહિ મોક્ષસ્ય નિત્યત્વે કસ્યાપિ વિપ્રતિપત્તિરસ્તિ । અત એવ ન પરિસ્પન્દો ભાવનેત્યપિ સુવચમ્ । માનસજપાવ્યાપ્તેશ્ચ । નહિ માનસેન જપેન મોક્ષે ભાવ્યે શરીરપરિસ્પન્દોઽપેક્ષ્યતે । તસ્માદ્ભાવનાયા અસમ્ભવાત્તદ્વિષયકો વિધિરિહ ન સમ્ભવતીતિ ।

અત્રોચ્યતે- કિં મોક્ષસ્ય ઘટાદેરિવ પારમાર્થિકં ભાવ્યત્વં ન સમ્ભવતીત્યભિધત્સે? કિં વાઽનાદ્યનિર્વાચ્યાવિદ્યાતિરોહિતસ્ય મોક્ષસ્ય શ્રીરામસાક્ષાત્કારાવાન્તરવ્યાપારવતા જપેનાભિવ્યક્તિલક્ષણમપિ ભાવ્યત્વં ન સમ્ભવતીતિ । આદ્યે-સમ્પ્રતિપત્તિરેવોત્તરમ્ । નહિ વયં ન મોક્ષસ્ય નિત્યત્વમભ્યુપગચ્છામઃ । દ્વિતીયં તુ ન સહામહે । નહિ મોક્ષસ્યાભિવ્યક્તિલક્ષણભાવ્યત્વાઙ્ગીકારે નિત્યત્વવ્યાઘાતઃ । તસ્માદ્ભાવ્યસદ્ભાવેન ભાવનાસદ્ભાવાત્તદ્વિષયો વિધિરવશ્યાભ્યુપગન્તવ્ય ઇતિ સિદ્ધમ્ । પ્રયોગશ્ચ “જપ્તવ્ય ઇત્યયં વિધિઃ અંશત્રયવત્ત્વાત્ દર્શપૂર્ણમાસાભ્યાં યજેતે’તિવત્ । નચ ત્રિતન્તુકપટેનાઽનૈકાન્તિકતા શઙ્ક્યા, અંશશબ્દેનેહ “કિઙ્કેનકથમા’મેવાત્ર વિવક્ષિતત્વાત્ । નચ પટસ્ય ભાવનાયા ઇવ “કિઙ્કેનકથ” મંશવત્તા સમ્ભાવિની । નચ કિમાકાઙ્ક્ષોપશમકભાવ્યાંશાભાવાદસિદ્ધો હેતુરિતિવાચ્યમ્, સમ્પ્રત્યેવ ભાવ્યસ્ય પ્રતિપાદિતત્વાદિતિ ।

નનુ કોઽયં વિધિરિત્યસ્ય વિધિરેવેત્યુત્તરમ્, કો ઘટ ઇત્યસ્યઘટ એવેત્યુત્તરમનુસરતીતિ ચેત્-અથ કથમિદમુત્તરમ્, યદુદાહરણોપન્યાસેન વિધિપ્રશ્નોત્તરસ્યાભાવસત્ત્વમાપાદયતિ । જિજ્ઞાસિતાર્થવિષયાનવબોધાઽનવધૂનનાદિતિ બ્રૂમઃ । નહિ જિજ્ઞાસિતસ્ય ઘટસ્યાનવબોધો ઘટ ઇત્યભિધાનમાત્રેણ શક્યાવધૂનનઃ ।

અત્ર બ્રૂમઃ - પ્રશ્નવાક્યગતો વિધિશબ્દો વિધિમાહ, ઉત્તરવાક્યગતસ્તુ તદ્વિશેષમ્ । અપૂર્વત્વેન વિશેષિતો હિ વિધિરુત્તરવાક્યગતવિધિપદાર્થઃ અતો વિધિરેવેત્યુત્તરં નાનુપપન્નમિતિ । મૈવમ્, જપ્તવ્ય ઇતિ વિધેરપૂર્વવિધિત્વસ્યાશક્યાભિધાનત્વાત્ । અત્યન્તાપ્રાપ્તપ્રાપણં હ્યપૂર્વવિધિઃ । નચ જપ્તવ્ય ઇત્યનેનાત્યન્તમપ્રાપ્તં

જપસ્ય મોક્ષસાધનત્વં પ્રાપ્યતે । "જપ્યેનૈવ તુ સંસિદ્ધિ'રિત્યાદિના પ્રાપ્તત્વાત્ । નચ પ્રાપ્તે વાઽપૂર્વવિધિરિતિ વક્તું શક્યતે, "વિધિરત્યન્તમપ્રાપ્તે" ઇતિ તલ્લક્ષણાભિધાનાત્ । અથ નિયમવિધિરસ્તુ । મૈવમ્, નિયમો હિ પક્ષે પ્રાપ્તસ્યાપ્રાપ્તપક્ષાન્તરપ્રાપણમિષ્યતે । નચ જપ્તવ્ય ઇત્યત્રૈતલ્લક્ષણમિતિ, યેનાયં નિયમવિધિઃ સ્યાત્ । મોક્ષસ્ય હિ ન જપવ્યતિરેકોપાયસાધ્યતાપક્ષોઽસ્તિ, યેન તં પરિત્યજ્ય મોક્ષો જપોપા-યસાધ્યત્વપક્ષેઽવસ્થાપ્યતે । યથા હિ ભોજનસ્ય દિગન્તરાવચ્છેદં યદૃચ્છયા પ્રાપ્તં પરિહાયાઽપ્રાપ્તપૂર્વદિગવચ્છેદપક્ષે પ્રાપ્યતે તત્ "પ્રાઙ્મુખોઽન્નાનિભુઞ્જીતે'તિ, ન તથેહેતિ વૈષમ્યમ્ । "નિયમઃ પાક્ષિકે સતી'તિ તલ્લક્ષણાભિધાનાત્ । તર્હિ પરિસઙ્ખ્યૈવ ભવતુ પ્રકારાન્તરાભાવાદિતિ ચેત્, ઇદમપિ ન સુન્દરમ્ । તલ્લક્ષણલક્ષિતસ્ય હિ તત્ત્વં વક્તવ્યમ્ । અન્યથા ઘટસ્યાપિ પટત્વાપત્તેઃ । નચ જપ્તવ્યમિત્યત્ર પરિસઙ્ખ્યાલક્ષણમસ્તિ । તત્ખલુ - એકસ્યાનેકત્ર પ્રાપ્તસ્યાન્યતો વિનિવૃત્ત્યર્થમેકત્ર પુનર્વચનં પરિસઙ્ખ્યેતિ । નચ જપ્તવ્ય ઇત્યત્રૈતલ્લક્ષણં યોજયિતું શક્યતે । તથાહિ- ગર્દભાભિધાન્યાદાનેઽશ્વાભિધાન્યાદાને ચ "ઇમામગૃભ્ણન્ રશનામૃતસ્યે'સ્યસ્ય મન્ત્રસ્ય રશનાપ્રકાશનસામર્થ્યલક્ષણેન લિઙ્ગેન વિનિયોગે પ્રાપ્તે "ઇત્યશ્વાભિધાનીમાદત્તે" ઇતિ બ્રાહ્મણ-વાક્યં વિધિરૂપમશ્વાભિધાન્યાદાને વિનિયુઙ્ક્તે ગર્દભાભિધાન્યાદાનાદ્વિનિવર્તનાય । અન્યથા બ્રાહ્મણવાક્યસ્ય લૈઙ્ગિકાર્થાનુવાદિત્વેનાપ્રામાણ્યાપત્તેર્વિધિત્વભઙ્ગપ્રસઙ્ગાત્ । નચ લિઙ્ગાદીનામભાવાદ્બ્રાહ્મણવાક્યં ન વિધિઃ, આદત્તે ઇત્યસ્ય પઞ્ચમલકારત્વેનાત્ર વિધેરાવશ્યકત્વાત્ । એવમત્ર મોક્ષસ્ય જપતદિતરોભયસાધ્યત્વપ્રાપ્તૌ જપસાધ્યતાભિધાનં સાધનાન્તરસાધ્યત્વનિવૃત્ત્યર્થં ભવતીતિ પરિસઙ્ખ્યા સ્યાત્ । તથાચ નાસ્તિ, તસ્માન્ન પરિસઙ્ખ્યાવિધિરિતિ સ્થિતમ્ ।

"તત્ર ચાન્યત્ર ચ પ્રાપ્તૌ પરિસઙ્ખ્યેતિ ગીયતે"

ઇતિ તલ્લક્ષણસ્યોક્તત્વાત્ । અતો જપ્તવ્ય ઇત્યસ્ય ત્રિવિધવિધ્યનન્તર્ભાવાદ્વિધ્યન્તરાભાવાચ્ચ ન વિધિનાઽપિ જપ્તવ્ય ઇતિ શક્યાભિધાનમિતિ પ્રાપ્તમ્ ।

અત્રોચ્યતે- યદુક્તમ્- ન નિયમવિધિર્નચ પરિસઙ્ખ્યાવિધિરિતિ, તદનુમન્યામહે । યત્તુ-નાપૂર્વવિધિરિતિ, તત્તુ ન મૃષ્યામઃ । જપ્તવ્ય ઇત્યસ્ય પ્રમાણાન્તરાપ્રાપ્તં યદ્રામમન્ત્રસ્ય મોક્ષસાધનત્વં તત્પ્રાપકત્વાત્ । નચ "જપ્યેનૈવ હિ સંસિદ્ધ્યે'દિત્યાદિના તત્પ્રાપ્તમિતિ વાચ્યમ્। "જપ્યેને'ત્યાદેઃ સ્મૃતિત્વેન જપ્તવ્ય ઇતિ પ્રાપણીયાર્થપ્રાપકત્વોપપત્તેઃ । નહિ શ્રુતિઃ સ્મૃતિપ્રાપિતમર્થં પ્રાપયતિ, કિં તર્હિ સ્મૃતિરેવ શ્રુતિમાપિતાર્થપ્રાપિકા । મન્વાદયો હિ સ્મર્તારઃ શ્રુતિતોઽવગતમેવાર્થં સ્મૃત્યોપનિબધ્નન્તિ । ઇતરથા હિ તદ્વચનાનામફલત્વેન કલ્પિતત્વાપત્તેઃ । નહિ પૌરુષેયાણાં વચનાનાં, વૈફલ્યે પ્રામાણ્યં દૃષ્ટમિષ્ટં વા । નચ શ્રુતાવપ્યયં પ્રસઙ્ગઃ, તસ્યા અપૌરુષેયત્વાત્ । પૌરુષયત્વે ચ પુરુષસ્ય સમ્ભાવિતરાગાદિદોષતયા તત્પ્રણીતાયા અપ્રામાણ્યાપત્ત્યવશ્યમ્ભાવાત્ । તસ્માત્ પ્રમાણાન્તરાપ્રાપ્તાર્થપ્રાપકત્વેન "જપ્તવ્ય" ઇત્યયમપૂર્વવિધિરિતિ સિદ્ધમ્ ।

જપવિધેરધિકારિવિરહેઽનુપપત્તેરધિકારિણમાહ-મન્ત્રિણેતિ । ગુરુતો ગૃહીતમન્ત્રેણેત્યર્થઃ । જપ્તવ્ય ઇતિ વૈધસ્ય જપસ્ય વિપક્ષે બાધકપ્રદર્શનેનાઽવશ્યકર્તવ્યતાં દ્રઢયતિ- નૈનં વિનેતિ । એનં-રામમન્ત્રજપં વિના દેવો -દ્યોતનાત્મકઃ સ્વયમ્પ્રકાશો રામો ન પ્રસીદતિ । સવિલાસાવિદ્યાલક્ષણમકાઽપગમેન સ્વાભિન્નતયા ન પ્રકાશત ઇત્યર્થઃ ॥ ૧૧॥

નનુ ક્રિયાભેદોઽસ્તિ ન વા? નાદ્યઃ, અદ્વૈતમઙ્ગપ્રસઙ્ગાત્ । ન દ્વિતીયઃ । ક્રિયાભેદાભાવેન તદ્ગર્ભસ્યોપાસનસ્યાનુપપત્તેરત આહ- ક્રિયેત્યાદિના ।

ક્રિયાકર્મેજ્યકર્તૃણામર્થં મન્ત્રો વદત્યથ ॥
મનનાન્ત્રાણનાન્મન્ત્રઃ સર્વવાચ્યસ્ય વાચકઃ ॥ ૧૨॥
ક્રિયા ચ કર્મ ચ ઇજ્યશ્ચ કર્તા ચ તાનિ તથા તેષામ્ । ક્રિયા - મન્ત્રોપાસના, કર્મ- તદઙ્ગભૂતં હોમાદિ; ઇજ્યઃ- યજનીયો ભગવાન્ રામઃ, કર્તા-ઉપાસકઃ એતેષામર્થનિવૃત્તિં ભેદાપાકરણરૂપાં મન્ત્રો વદતિ । સર્વાત્મરામપરસ્ય મન્ત્રસ્યેતરભેદપ્રપઞ્ચનિવૃત્તિનાન્તરીયકત્વાત્ ।
“અર્થોઽભિધેયરૈવસ્તુપ્રયોજનનિવૃત્તિષુ”
“ઇતિ” કોશકારઃ । અધુના રામમન્ત્રશબ્દનિરુક્તિં દર્શયન્ “બ્રહ્માદીના’મિત્યત્ર સ્પષ્ટમુક્તં સર્વવાચકત્વં વિશદયતિ-અથેતિ । અથ - ગુરૂપદેશાનન્તરં યન્મનનં-તત્વસ્યાનુચિન્તનં તસ્માત્, ત્રાણં રક્ષણં સહેતુકાત્સંસારાદુપાસકસ્ય તસ્ય કરણં ત્રાણનં તસ્માચ્ચેતિ વ્યાખ્યેયમ્ । અન્યથા ત્રાણાદિયેવ વક્તવ્યં સ્યાત્ । યદાહુઃ શઙ્કરભગવત્પૂજ્યપાદાઃ-
“મનનાત્તત્ત્વપદસ્ય ત્રાયત ઇતિ મન્ત્રમુચ્યતે ભયતઃ”
ઇતિ । તત્ત્વપદસ્યેત્યબાધ્યસ્વરૂપસ્યેત્યર્થઃ ॥ ૧૨॥
બ્રહ્માદિભેદપ્રપઞ્ચઃ શ્રીરામાદ્ભિન્નતયા નિરૂપયિતુમશક્યો વાચ્યઃ, મન્ત્રરાજો વાચક ઇત્યુભયવિશિષ્ટસ્ય શ્રીરામસ્ય બાહ્યપૂજોપયોગિ યન્ત્રં શરીરત્વેન નિરૂપયતિ-સોભયસ્યેતિ ।
સાભયસ્યાઽસ્ય દેવસ્ય વિગ્રહો યન્ત્રકલ્પના ॥
વિના યન્ત્રેણ ચેત્પૂજા દેવતા ન પ્રસીદતિ ॥ ૧૩॥
યન્ત્ર કલ્પના- કલ્પ્યમાનં યન્ત્રં વક્ષ્યમાણં વિગ્રહઃ શરીરમિત્યર્થઃ । શઙ્ખચક્રાદિમત્ત્વેન કલ્પિતં શરીરમ્, તસ્મિન્નેવ પૂજોપપત્તૌ કિં યન્ત્રેણેતિ તત્રહિ - વિનેતિ । અલૌકિકે હ્યર્થેશાસ્ત્રમેવ પ્રમાણમિતિ ભાવઃ । પ્રસીદતીતિ વ્યાકૃતમ્ । ઇતિશબ્દઃ પ્રથમોપનિષત્સમાપ્તૌ ॥ ૧૩॥
ઇતિ શ્રીરામચન્દ્રચરણાનુગૃહીતપરમહંસપરિવ્રાજકાચાર્ય-આન્દવનવિરચિતાયાં શ્રીરામપૂર્વતાપિનીયટીકાયાં રામકાશિકાયાં પ્રથમોપનિષત્
સમાપ્તા ।

## અથ દ્વિતીયોપનિષત્ ।

નૈનં વિના દેવઃ પ્રસીદતી’તિ “દેવતા ન પ્રસીદતી’ત્યનયોર્દેવદેવતાશબ્દયોઃ શ્રીરામસ્ય પરમાત્મનો જ્ઞાનાધારતયા દ્યોતનાત્મકત્વોપસ્થાપકત્વેનાપિ ચરિતાર્થયોર્ન નિયમેન સ્વયમ્પ્રકાશોપસ્થાપકત્વં સિધ્યતીત્યનન્યથાસિદ્ધેન શબ્દેન સ્વયમ્પ્રકાશત્વસાધનવ્યાજાદુપક્ષિપ્તસ્ય માયાઽનુપહિતસ્ય પ્રકૃતસ્યૈવ રામનામધેયસ્ય પરમાત્મનસ્ત્રિગુણાત્મકમાયોપાધિવશાજ્જગત્સૃષ્ટિસ્થિતિલયકારણેન વિરાઠિરણ્યગર્ભાઽવ્યાકૃતા-વસ્થાયોગિત્વં દર્શયન્નૈવ રામનામપરમાત્માઽભિન્નસ્ય મન્ત્રરાજાવયવસ્ય રેફાઽકારમકારાક્ષસ્ત્રયાત્મકસ્ય બીજસ્યાર્થં દર્શયિતું દ્વિતીયામુપનિષદમારભતે- સ્વભૂરિત્યાદિના ।
સ્વભૂર્જ્યોતિર્મયોઽનન્તરૂપી સ્વેનૈવ ભાસતે ॥

જીવત્વેનેદમોં યસ્ય સૃષ્ટિસ્થિતિલયસ્ય ચ ॥ ૧॥

નનુ ઘટાદિવદ્રામસ્ય વસ્તુત્વાત્સકારણતા સ્યાત્ । રામસ્ય દશરથં પિતરમભ્યુપગચ્છતામવશ્યાભ્યુપગન્તવ્યા સેત્યાશઙ્ક્યાહ - સ્વભૂરિતિ । નનુ “સ્વયમેવ ભવતી’તિ સ્વભૂઃ, “સ્વત એવ ભવતી’તિ વા? નાદ્યઃ, ભવતેઃ કારણમન્તરેણ ભવનાનુપપત્તેઃ । ઉપપત્તૌ વા સર્વદા ભવનાપત્તેઃ, નિયામકાભાવાત્ । કારણમેવ હિ કાર્યસ્ય કાદાચિત્કત્વે નિયામકમ્ । નચ સ્વયમેવ ભવતીતિ બ્રુવતા કારણમિષ્યતે । ન દ્વિતીયઃ, સ્વસ્યૈવ સ્વં પ્રતિ કારણત્વે વિરોધાત્ । કારણત્વં નિયતપૂર્વભાવિત્વં કાર્યત્વં ચ નિયતપશ્ચાદ્ભાવિત્વમ્ । નચ તદેવ સ્વં પ્રતિ પૂર્વભાવિ પશ્ચાદ્ભાવિ ચ ભવિતુમર્હતિ । તસ્માત્ “સ્વભૂ’રિત્યુક્તિરયુક્તેતિ ।

અત્રોચ્યતે- ઉભયથાપિ નાનુપપત્તિઃ । નચ સ્વયમેવ ભવતીતિ વિગ્રહવાક્યસ્ય વિના કારણમુત્પદ્યત ઇત્યર્થઃ, કિં તર્હિ સ્વસત્તાયાં કારણં નાપેક્ષત ઇત્યર્થઃ । નહિ નિત્યસ્ય કારણાપેક્ષા સમ્ભવતિ । નાપિ “સ્વસ્માદેવ ભવતી’ત્યસ્યાપિ વાક્યસ્ય સ્વસ્ય સ્વયં કારણમિત્યર્થઃ, યેન વિરોધઃ । કિં તર્હિ કારણાન્તરાન્નોત્પદ્યત ઇત્યર્થઃ । તર્હિ સ્વસ્માદુત્પદ્યત ઇતિ પ્રાપ્તમેવેતિ ચેન્ન, “સ્વયં દાસાસ્તપસ્વિન” ઇત્યત્રેવાઽત્રાપ્યાક્ષેપાઽનવકાશાત્ । તસ્માત્ સ્વભૂરિયનેન અકારણત્વમેવ વિવક્ષિતમ્ । નચ સકારણત્વાનુમાનવ્યાકોપઃ, વસ્તુસ્વહેતોર- નૈકાન્તિકત્વાત્ । અસ્તિ હ્યાકાશાદૌ વસ્તુત્વં નાસ્તિ સકારણત્વમિતિ । યદિ કશ્ચિત્ બ્રૂયાત્- આકાશાદયોઽપિ પક્ષતુલ્યા ઇતિ તં પ્રતિ વસ્તુત્વસ્યાપ્રયોજકત્વમુદ્ભાવનીયમ્ । ઘટાદૌ સકારણતાયાઃ પરિચ્છિન્નત્વપ્રયુક્તત્વાત્ । નચ પક્ષીકૃતે ભગવતિ પરિચ્છિન્નતા । કિં ચ દૃષ્ટાન્તસ્ય સાધનવૈકલ્યેનાપિ નેદમનુમાનં સાધુ । નહિ વસ્તુત્વં ઘટાદૌ સમસ્તિ, પરિચ્છિન્નત્વાત્ “અતોઽન્યદાર્ત’મિતિ શ્રુતેશ્ચ । યથોક્તમ્- દશરથઃ પિતેતિ રામસ્ય સકારણત્વમિતિ, તત્ર વક્તવ્યમ્- કિં શરીરસ્ય સકારણત્વમુત તદધિષ્ઠાતૃરામસ્ય? આદ્યમભ્યુપગચ્છામઃ । નહિ તદભ્યુપગમે કિમપ્યભિલષિતમપગમિષ્યતિ । દ્વિતીયં તુ ન સહામહે, શરીરાધિષ્ઠાતૃણામશેષાણામપ્યાત્મનાં સકારણત્વાપત્તેઃ । સકારણત્વનિષેધકબહુત્તરનિગમવચનનિચયોપલમ્ભાદપિ ન ભગવતઃ સકારણત્વવાચોયુક્તિર્યુક્તિમતી । તસ્માન્ન સકારણો ભગવાનિતિ “સ્વભૂ’રિતિ યુક્તમુક્તમિતિ ॥

તસ્ય સ્વપુત્રો ઘટાદિવત્ પરપ્રકાશ્યતાં વ્યાવર્તયતિ-જ્યોતિર્મય ઇતિ । જ્યોતિરેવ જ્યોતિર્મય ઇતિ સ્વાર્થિકો મયટ્ । જ્યોતીરૂપ ઇત્યર્થઃ । મયટો વિકારાર્થત્વં હિ ન સમાશ્રયિતું યુક્તમ્, વસ્તુતઃ કાર્યકારણત્વવિરહિતસ્ય જ્યોર્તિર્વિકારિત્વેન કાર્યત્વાપત્તેઃ । તસ્ય પરિચ્છેદં વારયતિ-અનન્તરૂપીતિ । અનન્તાનિ રૂપાણ્યસ્ય સન્તીતિ તથા । સર્વાત્મક ઇત્યર્થઃ । અયમર્થઃ પૂર્વમનેકશ ઈરિતોઽપ્યત્ર પુનરીર્યતે, શ્રુતેસ્ત્રાર્થે તાત્પર્યપ્રદર્શનાત્ । અભ્યાસો હિ તાત્પર્યલિઙ્ગમિષ્યતે । યદાહુઃ- “ઉપક્રમોપસંહારાવભ્યાસ” ઇત્યાદિ । નનુ ન “જ્યોતિર્મય” ઇત્યનેન સ્વયમ્પ્રકાશતાપ્રાપ્ત્યવશ્યમ્ભાવઃ, સૂર્યાદીનાં જ્યોતિષ્ટ્વેઽપિ સ્વપ્રકાશત્વાભાવાત્ । નનુ સ્વયં પ્રકાશન્તે સૂર્યાદયઃ, ન । ઘટાદિવત્તેષામપિ જ્ઞાનપ્રકાશ્યત્વાત્ । નનુ ઘટાદયઃ સ્વપરિસ્ફુરણે તેજોઽપેક્ષન્તે ન સૂર્યાદય ઇત્યસ્તિ વિશેષ” ઇતિ ચેત્, કો બ્રૂતે નાસ્તીતિ । સૂર્યાદીનાં ન ઘટાદિવત્ જ્ઞાનેન પ્રકાશ્યત્વં વિહન્તું શક્યતૈતિઃ । અતો જ્યોતીરૂપત્વેન કથં સ્વપ્રકાશતાસિદ્ધિઃ પરમાત્મન ઇત્યત્રાહ- સ્વેનૈવેતિ । સ્વયમ્પ્રકાશશ્ચિન્માત્ર ઇત્યર્થઃ ।

નનુ સ્વપ્રકાશત્વમતિદુર્લભમ્, તલ્લક્ષણાવિરહાત્ । લક્ષણતો હિ વસ્તુસિદ્ધિમિચ્છન્તિ લાક્ષણિકાઃ । લક્ષણં ચ ન ભવતા સ્વપ્રકાશસ્ય સ્વવાચિ । “સ્વસત્તાયાં પ્રકાશાવ્યતિરેકિત્વમેવ સ્વપ્રકાશાર્થ ઇતિ ચેન્ન, સુખાદાવતિવ્યાપ્તેઃ । નહિ સુખાદિકં સ્વસત્તાયાં ઘટાદિવત્ પ્રકાશવ્યતિરેકિઃ । સમાનજાતીય- પ્રકાશાઽપ્રકાશ્યત્વમિતિ ચેન્ન । કિમિદં

સમાનજાતીયપ્રકાશાપ્રકાશ્યત્વં વિજાતીયપ્રકાશપ્રકાશ્યત્વે પર્યવસ્યતિ, ન વા? પ્રથમે- ન સ્વપ્રકાશત્વસિદ્ધિઃ । નહિ પ્રકાશ્યત્વં સ્વપ્રકાશતાં ન વિનિહન્તિ । પ્રકાશ્યસ્ય પ્રકાશવિષયત્વાવ્યતિરેકાત્, વિષયત્વસ્ય જડત્વનાન્તરીયકત્વાત્ । ન ચેત્, દીપાદાવતિવ્યાપ્તિઃ । નહિ દીપાદિ સજાતીયેન દીપાદિના પ્રકાશ્યતે । દીપાદિઃ સ્વપ્રકાશ એવેતિ ચેન્ન, તસ્ય ચક્ષુરાદિવિષયત્વાત્ વિષયસ્ય સ્વપ્રકાશતાનુપપત્તેઃ । અપિચ સત્તયા સજાતીયેન પ્રકાશેન પ્રકાશ્યત્વમ્, અવાન્તરજાત્યા વા? આદ્યે- સામાન્યાદાવતિવ્યાપ્તિઃ । નહ્યનુવૃત્તપ્રકાશાદિના પ્રકાશ્યસ્યાપિ સામાન્યાદેઃ સજાતીયેન પ્રકાશેન પ્રકાશ્યત્વમસ્તિ, ઉત્તરત્રિકસ્ય નિર્જાતિત્વેન કસ્મિન્નપિ પ્રકાશેન તજ્જાતીયત્વસ્ય વક્તુમશક્યત્વાત્ । અત એવ ન દ્વિતીયોઽપિ । અપિચ કિમવાન્તરજ્જાતિઃ- દ્રવ્યત્વં ગુણત્વં કર્મત્વં જ્ઞાનત્વં વા? ન પ્રથમતૃતીયૌ, જ્ઞાને તદસમ્ભવાત્ । ન દ્વિતીયઃ, તત્ર હિ- ગુણત્વજાત્યા સજાતીયેન પ્રકાશેનાઽપ્રકાશ્યત્વમિતિ સ્વપ્રકાશકણાર્થઃ સ્યાત્ । તસ્યેહ ન કુશલં વિલોકયામઃ । ગગનાદિષ્વતિવ્યાપ્તેઃ । નહિ ગગનાદિષુ દ્રવ્યેષુ ગુણત્ત્વગન્ધોઽપિ સમ્ભવિતા, યેન ગુણત્વજાત્યા સજાતીયૈઃ પ્રકાશૈઃ પ્રકાશ્યાનિ ગગનાદીનિ ન સ્યુઃ । નાપિ ચતુર્થઃ, અવ્યાપ્તેઃ । નહિ જ્ઞાનત્વજાત્યા સજાતીયપ્રકાશ્યત્વં સર્વસ્ય જ્ઞાનસ્યેતિ સ્વમકાશે સમ્ભવતિ । અનુવ્યવસાયજ્ઞાનેન વ્યવસાયજ્ઞાનસ્ય પ્રકાશનાત્ । અનુવ્યવસાયો હિ-વ્યવસાયપ્રકાશકં જ્ઞાનમ્ । સ્વસ્ય સ્વયમેવ પ્રકાશ ઇતિ સ્વપ્રકાશાર્થ ઇતિ ચેત્ સ્વવૃત્ત્યાપત્તેઃ । નહિ સ્વયમેવ ક્રિયા કર્મ ચેતિ સમ્ભવતિ । અથ સ્વયં ચાસૌ પ્રકાશશ્ચેતિ સ્વપ્રકાશ ઇતિ ચેન્નૈતદપિ, ઈદૃશસ્વપ્રકાશત્વસ્ય જ્ઞાનજડત્વાપ્રત્યનીકત્વાત્ । તાર્કિકાણામપિ હિ મતે જ્ઞાનં સ્વયમ્પ્રકાશસ્ય ભવત્યેવ । તસ્માત્ સ્વપ્રકાશે લક્ષણાભાવ ઇતિ સિદ્ધમ્ ।

અથ લક્ષણાઽભાવેઽપિ પ્રમાણેન ભવિષ્યતિ સ્વપ્રકાશસિદ્ધિરિતિ ચેત્- એતદપિ રિક્તમ્, પ્રમાણાભાવાત્ । ન તાવત્પ્રત્યક્ષં સ્વપ્રકાશે પ્રમાણમ્, ભવન્મતે સ્વપ્રકાશસ્યેન્દ્રિયાવિષયત્વાત્ । વિષયત્વે વાઽસ્ય પ્રકાશત્વવ્યાકોપાત્ । અપિચ પ્રત્યક્ષં પ્રમાણં ભવેદાન્તરં, બાહ્યં વા ભવેત્? નાદ્યઃ, જ્ઞાનસ્ય વેદ્યત્વાપત્તેઃ । નહ્યાન્તરેણાવગાહ્યમાનં જ્ઞાનમવેદ્યં ભવિતુમર્હતીતિ । ન દ્વિતીયઃ, ચક્ષુરાદેર્બાહ્યવિષયૈકરસિકસ્યાઽભ્યન્તર-સ્વપ્રકાશપ્રકાશકત્વાસમ્ભવાત્ । અથ યોગિપ્રત્યક્ષં પ્રમાણમસ્તુ, ન । ભવદ્વચનેઽસ્માકં વિશ્વાસાનુદયાત્ । વ્યવહારે ભટ્ટનયાનુસારિભિરિત્થમાખ્યાતુમુચિતત્વાચ્ચ । યદ્યુચ્યતે-સ્વયમ્પ્રકાશત્વેઽનુમાનમેવ માનમિતિ, તન્ન । તાદૃગનુમાનાઽનુપલમ્ભાત્ । "અનુભૂતિઃ સ્વપ્રકાશા અનુભૂતિત્વાત્ યન્નૈવં તન્નૈવં યથા ઘટ" ઇત્યનુમાનમસ્તીતિ ચેન્ન, અપ્રસિદ્ધવિશેષણતયા પક્ષસ્યાઽઽભાસત્વાત્ । નહિ પક્ષીકૃતાયા અનુભૂતેઃ સ્વપ્રકાશત્વવિશેષણં ક્વચિદપિ પ્રસિદ્ધમ્ । અથ પક્ષવ્યતિરિક્તે ક્વાપિ પ્રસિદ્ધં ભવિષ્યતીતિ ચેત્તર્હિ વક્તવ્યં - કિં તત્ર હેતુરસ્તિ નવા? અસ્તિ ચેત્, કેવલવ્યતિરેકિત્વભઙ્ગપ્રસઙ્ગઃ । નહિ સપક્ષવતો હેતોઃ કેવલવ્યતિરેકિત્વં ભવતિ । "પક્ષવ્યાપકો વિદ્યમાનસપક્ષો વિપક્ષાદ્વ્યાવૃત્ત" ઇતિ કેવલવ્યતિરેકિણો લક્ષણાત્ । ન ચેત્, અનુભૂતિત્વહેતોરસાધારણતા પ્રસજ્યેત । "સતિ સપક્ષે પક્ષમાત્રવૃત્તિરસાધારણ" ઇતિ તલ્લક્ષણાત્ । તસ્માન્નેદમનુમાનમિહ સ્વપ્રક્રાશે પ્રક્રમેત । એવમનુમાનાન્તરનિકારણેઽપિ યુક્તયઃ સ્વયમુન્નેયાઃ । નચોપમાનં સ્વપ્રકાશત્વે (પ્રમાણમ્), ઉપમાનસ્ય સાદૃશ્યૈકવિષયત્વાત્, સ્વયમ્પ્રકાશત્વસ્ય ચ સાદૃશ્યાઽનાત્મકત્વાત્ । અર્થાપત્તિસ્તર્હિસ્વપ્રકાશતાયાં માનમસ્તુ, ન । સ્વપ્રકાશત્વં વિનાઽનુપપદ્યમાનસ્ય કસ્યચિદભાવાત્ । "અનુપપદ્યમાનાર્થદર્શનાદુપપાદકભૂતાર્થાન્તરકલ્પનમર્થાપત્તિ'રિતિ તલ્લક્ષણમ્ । નાપ્યાગમઃ સ્વપ્રકાશત્વે સાધકોઽસ્તિ, તાદૃગાગમાઽનુપલમ્ભાત્ । નનૂપલભ્યત એવ "અત્રાયં પુરુષઃ સ્વયઞ્જ્યોતિ'રિતિ

। સત્યમુપલભ્યતે, ન પુનરયં જ્ઞાનસ્વપ્રકાશત્વસાધનાય પ્રભવતિ । જ્યોતિઃશબ્દેન મનસોઽભિધાનાત્ । નાપ્યૈતિહ્યં સ્વપ્રકાશત્વે પ્રમાણમ્, તસ્ય પ્રામાણ્યાનભ્યુપગમાત્ । અભ્યુપગમેઽપિ વા પ્રકાશપ્રવાદપારમ્પર્યસ્ય વક્તવ્યત્વાત્ । નચ સ્વપ્રકાશે પ્રવાદપારમ્પર્યં શ્રૂયતે । સમ્ભવસ્તાવત્ સ્વયમ્પ્રકાશે પ્રમાણમસ્તુ, મૈવમ્ । તત્ર હ્યાધિકેન ચાઽવિનાભૂતં ન્યૂનં સાધ્યતે, સહસ્રાદિનેવ શતાદિ । નચેહ તથાવિધમધિકં ન્યૂનં વાઽસ્તિ, યેન સમ્ભવપ્રમાણપ્રસરઃ સ્યાત્ । નપ્યભાવઃ સ્વપ્રકાશત્વે પ્રમાણતયા શક્યાભિધાનઃ । અભાવગોચરસ્ય તસ્ય ભાવસ્વરૂપસ્વપ્રકાશગોચરત્વાભિધાનાનુપપત્તેઃ । ઉપપત્તૌ વા સ્વપ્રકાશસ્યાઽભાવરૂપત્વાપત્તેઃ । નચ નવમં કિઞ્ચિત્પ્રમાણમૃષિભિરિષ્યતે, યત્ સ્વપ્રકાશત્વે પ્રમાણતયોપન્યસ્યેત । તસ્માદપ્રામાણિકં સ્વપ્રકાશત્વં શશશૃઙ્ગાદિવદનુન્મત્તેન ભવતા ન શક્યાભ્યુપગમમ્ ।

અથોચ્યેત-અપ્રકાશરૂપ એવાયમસ્તીતિ, નૈતત્સાધીયઃ । તથા સતિ જગદાન્ધ્યપ્રસઙ્ગાત્ । તથાહિ- જગન્ન તાવન્ન પ્રકાશતે, “ઘટઃ પ્રકાશતે, “પટઃ પ્રકાશતે” ઇત્યેવંરૂપેણ સર્વત્ર પ્રકાશાનુગમાત્ । પ્રકાશમાનં ચ જગત્ કેન પ્રકાશતામ્ । ન તાવત્ સ્વતઃ, જગતો જઢત્વાત્ । અથ પરતઃ પ્રકાશાતમિત્યુચ્યેત - કથય, સ કઃ પરઃ પ્રકાશઃ? યેન પ્રકાશિતં જગત્ પ્રકાશતે ઇતિ સુવચં સ્યાત્ । આત્મેતિ ચેત્ - અહો! વિસ્મરણશીલતા દેવાનાં પ્રિયસ્ય, યદિદાનીમેવાત્મનોઽપ્રકાશરૂપતામુદીરિતામપિ નાનુસન્ધત્સે । અનુસન્ધાને - તદ્વિપરીતપ્રકાશતોપન્યાસાનુપપત્તેઃ । અથાત્મનોઽપ્રકાશરૂપતામભિહિતામનનુસન્ધાયૈવપ્રકાશરૂપતોપન્યસ્તેતિ

મન્યસે, એવં તર્હિ અનુસન્ધાનં નિજુક્ષુષોસ્તવ પરસ્પરપરાહતાર્થવાદિત્વમપરિહાર્યમાપતિતમ્- આત્મા પ્રકાશરૂપોઽપ્રકાશરૂપશ્ચેતિ । અસ્તુ વા યથા તથા । પ્રકાશરૂપતામસ્મદભિમતામનુભૂતવાનસીતિ ત્વામસ્મદનુકૂલમનુમન્યામહ એવ । અથ આત્માતિરિક્ત એષ કશ્ચન પ્રકાશો જગદાન્ધ્યપ્રસઙ્ગભઙ્ગકૃદસ્તુ । મૈવમ્, તાદૃશપ્રકાશાનુપલમ્ભાત્ । જ્ઞાનમેવ તાદૃશપ્રકાશ ઉપલભ્યત ઇતિ ચેત્તર્હિ પ્રાપ્તમેવાત્મનઃ પ્રકાશરૂપત્વમ્, જ્ઞાનસ્યાઽનાત્મકત્વાભાવાદિતિ । આત્મનશ્ચ જ્ઞાનાત્મતા “સત્યં જ્ઞાન’મિત્યાદિશ્રુતિસિદ્ધા ન વ્યાસેદ્ધું શક્યા શાક્યપાદપદ્માનુપજીવિના । અથાત્મનોઽપ્રકાશરૂપત્વાય તદાત્મકજ્ઞાનસ્યાઽપ્યપ્રકાશરૂપતેષ્યતે, તર્હિ જગદાન્ધ્યાપાદાનમપ્રત્યૂહમેવ । તથાચાઽઽભાણકઃ -

“અન્ધસ્યેવાઽન્ધલગ્નસ્ય વિનિપાતઃ પદે પદે”

ઇતિ । અપિચ “અતોઽન્યદાર્ત’મિત્યાદિશ્રુતિવશાજ્જગદારોપસિદ્ધમિતિ વક્તવ્યમ્ । નચારોપો નિરધિષ્ઠાનો દૃષ્ટ ઇષ્ટો વા । અતો જગદધ્યાસસ્ય ચાઽધિષ્ઠાનમવશ્યમભિધેયમ્ । અધિષ્ઠાનં ચ ગવેષ્યમાણમાત્માતિરિક્તં નોપલભામહે । અત આત્મૈવાધિષ્ઠાનમુચિતમ્ । સચેદયમાત્માઽપ્રકાશરૂપઃ, કથં સપ્રકાશતા! જડત્વાઽનવસ્થાનાદિના સ્વતઃ પરતો વા પ્રકાશમાનતાનુપપત્તેઃ । અપ્રકાશમાનસ્ય ચાત્મનોઽધ્યાસાધિષ્ઠાનત્વમનુપપન્નં સ્યાત્ । નહ્યપ્રકાશમાનં પુરોવર્તિરજ્જુભુજઙ્ગાદિ અધ્યાસસ્યાધિષ્ઠાનં ભવતિ । અતો જગદધ્યાસાધિષ્ઠાનત્વસિદ્ધ્યે વક્તવ્યૈવાત્મનઃ પ્રકાશમાનતા । સા ચ પ્રકાશમાનત્વેનેતિ સ્વપ્રકાશત્વમભિમતમભેદવાદિનામ્ । તચ્ચ પ્રાગુક્તરીત્યા લક્ષણપ્રમાણાભાવાદનુપપન્નમિતિઃ પૂર્વપક્ષસઙ્ક્ષેપઃ ।

અત્રાઽભિદધ્મહે - ન તાવલ્લક્ષણાઽભાવઃ, સ્વવ્યવહારેઽન્યાનપેક્ષત્વસ્યૈવ તલ્લક્ષણત્વાત્ । નનુ ઘટાદયોઽપિ સ્વવ્યવહારે પટાદીન્નાપેક્ષન્તે ઇતિ ચેત્, નાપેક્ષન્તે । લક્ષણેન તુ ન દોષમભાષિષ્ઠાઃ । નહિ ઘટાદીનાં પટાદ્યનપેક્ષત્વોપન્યાસમાત્રેણાઽન્યાનપેક્ષા ભવતિ । સ્વવ્યવહારે જ્ઞાનાપેક્ષિણાં તેષામન્યાનપેક્ષત્વસ્યાઽસમ્ભવાત્

। અતો ભવતો લક્ષણાતિવ્યાપ્ત્યભિપ્રાયો વૃથાપ્રાય એવ । અનુવ્યવસાયાધીનવ્યવહારે વ્યવસાયે નાસ્તીદં લક્ષણમિતિ ચેન્ન, અનુવ્યવસાયસ્યૈવાનભ્યુપગમાત્ । અથાનુવ્યવસાયઃ કિમર્થમભ્યુપગન્તવ્યઃ । વ્યવસાયાસિદ્ધિપરિહારાયેતિ ચેત્, અથાનુવ્યવસાયઃ સિદ્ધોઽસિદ્ધિં પરિહરિષ્યત્યસિદ્ધો વા? ન તાવદસિદ્ધઃ, અસિદ્ધસ્યાઽન્યાસિદ્ધિપરિહારસામર્થ્યાસમ્ભવાત્ । સમ્ભવે - વ્યવસાય એવાસિદ્ધ આત્માસિદ્ધિં પરિહરતુ, કિમિતિ પરાક્રમ્યતેઽનુવ્યવસાયેન વ્યવસાયસિદ્ધૌ । નાપિ સિદ્ધઃ, સ્વતઃ સિદ્ધતાઽનઙ્ગીકારાત્ । અઙ્ગીકારે વા વ્યવસાયેન કિમપરાદ્ધમ્ । સ એવ સ્વતઃ સિદ્ધોઽસ્તુ । અથાનુવ્યવસાયઃ પરતઃ સિદ્ધસ્તર્હિ અનવસ્થા વાર્થપર્યન્તં અસિદ્ધાપત્તિર્વા સ્યાત્ । તસ્માદનુવ્યવસાયસમાશ્રયણં પરિશ્રમાયૈવ ભવતઃ ।

નનુ અભિવદનવ્યવહારો હાનોપાદાનાદિરૂપઃ, સ ચ ક્રિયાત્વાત્ પાકાદિવત્ કાર્ય એવ । કાર્યં ચ સામગ્રીસાપેક્ષોત્પત્તિકમ્ । જ્ઞાને । ચાઽભિવદનવ્યવહારસ્ય સામગ્રીસાપેક્ષત્વમવશ્યમભિધાતવ્યમ્ ।

તતશ્ચ અન્યાનપેક્ષત્વમભિધીયમાનં ન સમ્ભવતીતિ ચેન્મૈવમ્, અન્યશબ્દેન જ્ઞાનાન્તરસ્યૈવ વિવક્ષિતત્વાત્ । સમાધ્યાદૌ વ્યવહારાભાવાદવ્યાપ્તિરિતિ ચેત્, અસ્તુ । તથાપિ લક્ષણં ન દોક્ષ્યતિ । ગુણાશ્રયો દ્રવ્યમિતિ ચેત્, નહિ ગુણાશ્રયો દ્રવ્યમિતિ અત્રાવ્યાપ્તિર્નાસ્તિ । ઉત્પન્નસ્ય દ્રવ્યસ્ય ક્ષણમાત્રમગુણત્વસ્ય ભવદ્ભિરેવેષ્યમાણત્વાત્ । નનુ ગુણાશ્રયો દ્રવ્યમિત્યત્ર ગુણાશ્રયયોગ્યતૈવ લક્ષણાર્થઃ । સા ચ દ્રવ્યસ્ય નિગુર્ણત્વાવસ્થાયામપિ વિદ્યત એવ । યોવ્યતાયા યાવદ્દ્રવ્યભાવિત્વાત્ । અત એવૈતદૃષ્ટાન્તાવષ્ટમ્ભેન ભવલ્લક્ષણસ્યોપાદેયત્વોપન્યાસોઽનુચિત ઇતિ । નાનુચિતઃ, સ્વલક્ષણે વિહિતસ્ય દોષસમાધાનસ્યાઽસ્મલ્લક્ષણેઽપિ વિધાતું શક્યત્વાત્ । સમાધ્યાદૌ વ્યવહારાભાવેઽપિ હિ સંવિદન્તરાનપેક્ષતયા વ્યવહર્તું યોગ્યતા વિદ્યત એવ । નતુ વ્યવહારાભાવવત્ તદ્યોગ્યતાપિ સમાધ્યાદૌ ન વિદ્યત ઇતિ ચેત્તર્હિ સમયાન્તરે વ્યવહારદર્શનાત્તદ્યોગ્યતા સમાધ્યાદાવપ્યઙ્ગીકર્તવ્યેતિ સમમ્ । તસ્માત્ સ્વપ્રકાશલક્ષણમિદમુક્તપ્રકારેણાઽદુષ્ટમસ્તીતિ ન લક્ષણાઽભાવકૃતા સ્વપ્રકાશત્વાસિદ્ધિરિતિ સિદ્ધમ્ । નાપિ સ્વપ્રકાશે પ્રમાણાભાવચોદ્યમનવદ્યમ્, અનુમાનાદેરેવ પ્રમાણત્વાત્ । તથાહિ - અનુભૂતિઃસ્વપ્રકાશા અનુભૂતિત્વાત્ ન યદેવં ન તદેવં યથા ઘટઃ । નનુ સ્વયમ્પ્રકાશત્વસ્ય પક્ષે સિદ્ધાવનુમાનવૈયર્થ્યમ્ । અન્યત્ર પ્રસિદ્ધૌ તત્ર હેતુસત્ત્વેઽન્વયિતયા કેવલવ્યતિરેકિતાભઙ્ગઃ । હેત્વસત્ત્વે ત્વસાધારણાઽનૈકાન્તિકતેતિ પ્રાગીરિતમિતિ ચેત્સત્યમ્, તથાપિ સામાન્યતો દૃષ્ટાનુમાનેન સાધ્યપ્રસિદ્ધાશ્રયણે ભવદભિહિતદૂષણાઽનવકાશાત્ । તથાહિ - વેદ્યત્વં કિઞ્ચિન્નિષ્ઠાત્યન્તાભાવપ્રતિયોગિ ધર્મત્વાત્ રૂપવત્ । નચ કેવલવ્યતિરેકિવૈયર્થ્યમ્, સામાન્યતો દૃષ્ટાનુમાનેનાઽનિર્ધારિતધર્મિકતયા વેદ્યત્વસ્ય કેવલવ્યતિરેકિણો વિશેષનિષ્ઠતયા સમર્થ્યમાનત્વાત્ । કથમન્યથા શબ્દાદીનામષ્ટદ્રવ્યાતિરિક્તદ્રવ્યાશ્રિતત્વં નૈયાયિકાદયઃ સાધયેયુઃ । નચ “વિમતા ભૂઃ શશવિષાણોલ્લિખિતા ભૂત્વાત્ યન્નૈવં તન્નૈવં યથા ઘટ” ઇત્યેવઞ્જાતીયકસ્યાપ્યનેનૈવન્યાયેન સ્વીકર્તવ્યતયા પ્રસિદ્ધિવિશેષણતાદોષો દત્તજલાઞ્જલિઃ સ્યાદિતિ વાચ્યમ્, સામાન્યતોઽનુમાનેન સાધ્યસિદ્ધેરત્ર સમ્પાદયિતુમશક્યત્વાત્ । અતોઽનુભૂતિત્વહેતોરસિદ્ધ્યાદિવિરહો વિશદતર એવ । કિઞ્ચ અન્યાઽપ્રકાશ્યસ્ય સ્વયમ્પ્રકાશમાનસ્ય વસ્તુનોઽસત્ત્વે જગતઃ સ્ફુરણમેવાનુપપન્નં સત્તાદૃશં વસ્તુ કલ્પયતીત્યર્થાપત્તિરપિ સ્વપ્રકાશત્વે પ્રમાણમ્ । સર્વતો બલવતી હ્યર્થાપત્તિઃ ।

અન્યથાનુપપત્તિશ્ચેદસ્તિ વસ્તુપ્રસાધિકા ।
પિનષ્ટિ દૃષ્ટ્યૈકમત્યં સૈવ સર્વબલાધિકા ॥

ઇતિ ખણ્ડનકારઃ । આગમશ્ચ "અત્રાયં પુરુષઃ સ્વયઞ્જ્યોતિઃ" "તમેવભાન્તમનુભાતિ સર્વ'મિત્યાદિઃ સ્વપ્રકાશત્વે પ્રમાણં નચ જ્યોતિઃશબ્દન્મન એવેતિ સુવચમ્ । સ્વપ્ને તસ્યૈવ વિષયાકારેણ પરિણતસ્ય જ્યોતિષ્ટ્વાનુપપત્તેઃ । નનુ યદિ સ્વપ્રકાશ આત્મા, કથમત્ર જગદધ્યસ્યેત । અધિષ્ટાનાઽનવબોધકૃતો હ્યધ્યાસઃ । સ ચ સર્વદા સ્વપ્રકાશતયા ભાસમાનેઽનવબોધાસમ્ભવાત્ કથં સ્યાત્ । નનુ તર્હિ પુરોવર્તિનિ ભાસમાને કથં રજ્જુસર્પરજતાધ્યાસાઃ સ્યુઃ, શુક્તિત્વાદિવિશેષાનવબોધાદિતિ બ્રૂમઃ । તર્હીહાઽપ્યાનન્દપરિપૂર્ણત્વાદિવિશેષાનવબોધાજ્જગદધ્યાસ ઇતિ સમઃ સમાધિઃ । નનુ સામાન્યવિશેષવતિ શુક્તિકાદાવિયં વિધાઽસ્તુ, નિઃસામાન્યવિશેષે કથમાત્મનીયં વિધા સ્યાત્ । સત્યમ્, પારમાર્થિકસામાન્યાદ્યભાવેઽપિ કાલ્પનિકસામાન્યાદિનાઽધ્યાસોપપત્તેરવિરોધઃ । તસ્માલ્લક્ષણપ્રમાણસદ્ભાવાત્ સ્વપ્રકાશત્વમપ્રત્યૂહમ્ । અતઃ "સ્વેનૈવ ભાસત"ઇતિ શ્રુત્યા સ્વપ્રકાશત્વં યુક્તમુક્તમિતિ યુક્તમુત્પશ્યામઃ ।

દીપાદેરેવ પરપ્રકાશકસ્ય સ્વપ્રકાશતા કિં વક્તવ્યેતિ "કિં પુન'ર્ન્યાયમભિસન્ધાય તાં દ્રઢયતિ- "જીવત્વેનેદમોં યસ્યે"તિ । જીવયતિ જઢં જગદપ્રકાશમાનતયા મૃતકલ્પં પ્રકાશાત્મકસ્વસર્ગેણ સપ્રાણામિવ કરોતીતિ જીવસ્તસ્ય ભાવસ્તત્ત્વમ્ । તેન ઇદં - સર્વં જગત્ યસ્ય - સ્વપ્રકાશસ્ય પરમાત્મનો જીવત્વેન સ્વયં પ્રકાશમાનત્વે સતિ પરપ્રકાશત્વેન હેતુના ભાસત ઇતિ સમનન્તરવાક્યાદનુવર્તતે । "તસ્ય ભાસા સર્વમિદં વિભાતી"તિ શ્રુત્યન્તરેઽપ્યયમેવાર્થઃ સમર્થ્યતે । કથં ભાસતે, ઓમિતિ । વિરાડાદ્યાત્મકં સદ્ભાસત ઇત્યર્થઃ । અકાર ઉકારો મકારશ્ચેતિ વર્ણત્રયાત્મકઃ ૐકારઃ । તત્ર - અકારેણ વિરાડ્ ગૃહ્યતે, ઉકારેણ હિરણ્યગર્ભઃ, મકારેણ અવ્યાકૃતમ્ । અથ કો વિરાટ્ કો હિરણ્યગર્ભઃ કિમવ્યાકૃતમિતિ, ઉચ્યતે - વિરાટ્ તાવત્ પઞ્ચીકૃતાનિ પઞ્ચ મહાભૂતાનિ ગગનીદીનિ તત્કાર્યં ચ સર્વમ્ । એતચ્ચાત્મનઃ સ્થૂલશરીરમ્ । ઇન્દ્રિયૈરર્થોપલબ્ધિર્જાગરિતમ્ । તદુભયાભિમાન્યાત્મા વિશ્વઃ । એતત્ સ્થૂલં, જાગરિતં, વિશ્વશ્ચેતિ ત્રયં - અકારઃ । અપઞ્ચીકૃતપઞ્ચમહાભૂતાનિ તત્કાર્યં ચ સપ્તદશકં લિઙ્ગં ભૌતિકમ્-હિરણ્યગર્ભઃ । ઇદં ત્વાત્મનઃ સૂક્ષ્મશરીરમ્ । કરણેષૂપસંહૃતેષુ જાગરિતસંસ્કારજઃ સવિષયઃ સ્વપ્નઃ । તદુભયાભિમાન્યાત્મા તૈજસઃ । એતત્સૂક્ષ્મં, સ્વપ્નઃ, તૈજસશ્ચેતિ ત્રયં - ઉકારઃ । સ્થૂલસૂક્ષ્મશરીરદ્વયકારણમાત્માઽજ્ઞાનં સાભાસં - અવ્યાકૃતમિત્યુચ્યતે । ઇદં ત્વાત્મનઃ કારણશરીરમ્ । તચ્ચ ન સત્ નાઽસત્ નાપિ સદસત્, ન ભિન્નં નાઽભિન્નં નાપિ ભિન્નાઽભિન્નમ્, કુતશ્ચિન્ન નિરવયવં ન સાવયવં નોભયમ્ । કિન્તુ કેવલબ્રહ્માત્મૈકત્વજ્ઞાનાપનોદ્યમ્ । સર્વપ્રકારકજ્ઞાનોપસંહારો બુદ્ધેઃ કારણાત્મનાઽવસ્થાનં સુષુપ્તિઃ । તદુભયાભિમાન્યાત્મા પ્રાજ્ઞઃ । એતદવ્યાકૃતં, સુષુપ્તિઃ, પ્રાજ્ઞશ્ચેતિ ત્રયમ્-મકાર ઇતિ । તતશ્ચ અકારોપનીતમાત્મનઃ સ્થૂલશરીરં વિરાટ્પદવ્યપદેશ્યં, ઉકારોપનીતમાત્મનઃ સૂક્ષ્મશરીરં હિરણ્યગર્ભપદવ્યપદેશ્યં, મકારોપનીતં શરીરદ્વયકારણં સાભાસમજ્ઞાનં અવૈકૃતં ચેત્યેતન્નયાત્મકં સજ્જગદ્ભાસતે યસ્ય જીવત્વેનેતિ । એતત્ત્રયવ્યતિરેકેણ જગત એવાભાવાદિતિ । કિઞ્ચ - "અકારો બ્રહ્મા, ઉકારો વિષ્ણુઃ, મકારઃ શિવ" ઇતિ પૌરાણિકાઃ । "અઃ કલાખ્યા શક્તિઃ, ઉઃ નાદઃ, મઃ મહાબિન્દુ'રિતિ તાન્ત્રિકાઃ । અકારં - અગ્ન્યૃષિકં ગાયત્રીછન્દસ્કં બ્રહ્મદેવતાકં પીતવર્ણં ભૂસ્થાનકં જાગ્રદવસ્થાકમુદાત્તસ્વરકં ઋગ્વેદકં ગાર્હપત્યાગ્નિકં રજોગુણકં પૃથ્વીતત્ત્વકં સૃષ્ટ્યર્થક્રિયાકમ્, ઉકારં - વાય્વૃષિકં ત્રિષ્ટુપ્છન્દસ્કં વિષ્ણુદેવતાકં વિદ્યુદ્વર્ણકં ભુવઃસ્થાનકમનુદાત્તસ્વરકં યજુર્વેદમાહવનીયાગ્નિકં સત્ત્વગુણકમન્તરિક્ષતત્ત્વકં સ્થિત્યર્થક્રિયાકમ્, મકારં - સૂર્યર્ષિકં જગતીછન્દસ્કમીશ્વરદેવતાકં શ્વેતવર્ણકં સ્વઃસ્થાનકં સ્વરિતસ્વરકં સામવેદકં દક્ષિણાગ્નિકં તમોગુણકં દ્યૌસ્તત્ત્વકં સંહારાર્થક્રિયાકં ઋષયોઽભિવદન્તિ । એવં

અકારાદ્યક્ષરત્રયાત્મકબ્રહ્માદિપ્રપઞ્ચજાતં દૃશ્યમવભાસતે યસ્ય જીવત્વેનેતિ યોજ્યમ્ । સ્મૃતિરપિ જગત ૐકારપ્રભવત્વેન તદાત્મકતામભિપ્રૈતિ -

ૐકારપ્રભવા વેદા ૐકારપ્રભવાઃ સ્વરાઃ ।
ૐકારપ્રભવં સર્વં ત્રૈલોક્યં સચરાચરમ્ ॥

ઇતિ । યસ્ય જીવત્વેન ઓમાત્મકં વિરાઢ્ઢિરણ્યગર્ભાઽવ્યાકૃતાત્મકમિદં જગત્પ્રકાશતે તસ્ય સ્વયમ્પ્રકાશત્વં કિં વક્તવ્યમિતિ ભાવઃ । નનુ જગતઃ કિં અભાનમેવ ન સ્યાત્? યસ્ય ભાનાય સ્વપ્રકાશસ્ય પરમાત્મનઃ પ્રકાશત્વમાશ્રીયતે । મૈવમ્, અભાને હિ પ્રત્યક્ષાદિપ્રમાણવિરોધઃ । "કુમ્ભોઽયં સ્તમ્ભોઽય'મિત્યાકારેણ જગતિ પ્રત્યક્ષાદિકં પ્રવર્તમાનં બહુલમુપલભ્યતે । યદિ વાઽઽત્યન્તિકમભાનં સ્યાત્તર્હિ મૂષકવિષાણવજ્જગદનુપાખ્યમેવેતિ વાચ્યમ્ । (તત્ર ચ)મૂષકવિષાણાદ્યનુપાખ્યવૈલક્ષણ્યસ્ય વિશદ્મુપલભ્યમાનત્વાત્ । કિઞ્ચ યત્સોપાખ્યં તદ્ભાનયોગ્યમ્, યચ્ચ ભાનયોગ્યં તત્કદાચિદ્ભાસત એવેતિ પ્રતિબન્ધોઽસ્તિ । તથાચ કદાચિદ્ભાનસ્ય વ્યાપકસ્ય નિવૃત્તૌ વ્યાપ્યં ભાનયોગ્યત્વમપિ નિવર્તેત । ભાનયોગ્યત્વસ્ય ચ નિવૃત્તૌ તદ્વ્યાપ્યસોપાખ્યત્વમપિ નિવર્તતે । અન્યથા વ્યાપ્યવ્યાપકભાવભઙ્ગપ્રસઙ્ગાત્ । તસ્માદ્ભાસત ઇતિ વાચ્યમ્ । તત્ર પર્યાલોચયિતવ્યં - કિં સ્વતઃ પરતો વેતિ? ન તાવત્સ્વતઃ, ચિલ્લક્ષણાપત્તેરચિત્ત્વવ્યાઘાતાત્ । અતઃ પરતઃ, તત્પરં જડમજડં વા? જડત્વે - કથં જગત્પ્રકાશકં સ્યાત્ । પ્રકાશકત્વે ચ જગત્યેવ પ્રકાશતા કુતો ન સ્યાત્ । ઉભયોર્જડત્વાવિશેષાત્ । અજડત્વે તુ - તદજડમાત્મા વાઽન્યદ્વા? નાન્યત્, તસ્યાઽન્યત્વે - જડત્વસ્યાવશ્યકત્વેનાઽજડત્વપીડનાપત્તેઃ । આત્મત્વે તુ - સ આત્મા શ્રીરામાદન્યઃ શ્રીરામ એવ વા? અન્યશ્ચેત્, જડત્વાપત્તિઃ "અયમાત્મા બ્રહ્મે'ત્યાદિશ્રુતિવિરોધશ્ચ । તસ્માત્ શ્રીરામ એવેતિ પક્ષં યુક્તમુત્પશ્યામઃ ।

નનુ ચિદ્રૂપઃ શ્રીરામ એવ જગતોઽવભાસકો ભવતુ, તથાપિ તયોર્ભાસ્યભાસકયોઃ સમ્બન્ધો ભાસ્યભાસકભાવાતિપ્રસઞ્જકતયા ન સમઞ્જસ ઇતિ સમ્બન્ધ એવાનુસન્ધેયઃ । નનુ ઘટાદ્યાલોકયોરિવાત્રાપિ કશ્ચિદ્ભવિષ્યતીતિ ચેત્ - કો ભવિષ્યતિ? સંયોગઃ સમવાયસ્તાદાત્મ્યમેકાર્થસમવાય એકાર્થતાદાત્મ્યં વા? નાદ્યઃ, ચિતો નિષ્પ્રદેશત્વાત્ સંયોગસ્ય પ્રદેશવૃત્તિત્વાત્ । અથ નિષ્પ્રદેશાયા અપિ ચિતઃ આકાશસ્યેવ કાલ્પનિકપ્રદેશસમાશ્રયણેન સંયોગ ઇત્યુચ્યતે । મૈવમ્, તથાપિ ગુણાદિભિઃ સહ સંયોગસ્ય વક્તુમશક્યત્વાત્ । દ્રવ્યયોરેવ હિ સંયોગો નાઽદ્રવ્યયોઃ નાપિ દ્રવ્યાદ્રવ્યયોરિત્યભિયુક્તોક્તેઃ । ન દ્વિતીયઃ, આરભ્યારમ્ભકભાવરહિતત્વાત્ । નહિ ચિદચિતં જગદારભતે, એકસ્ય દ્રવ્યસ્ય દ્રવ્યારમ્ભકત્વાનુપપત્તેઃ । ઉપપત્તૌ ચ એકેન તન્તુના પટારમ્ભપ્રસઙ્ગાત્ । નાપ્યચિતાઽનેકયા ચિદારભ્યતે, નિત્યાયાં તસ્યામારમ્ભસ્યૈવાઽનવકાશાત્ । નનુ આરભ્યારમ્ભકભાવરહિતત્વેઽપિ ગગનતદ્ગતૈકત્વયોર્વ્યક્તિજાત્યોઃ સમવાયો દૃશ્યતે । સત્યમ્, તથાપિ ન ચિદચિતોઃ સમવાયઃ સમસ્તિ । અયુતસિદ્ધ્યભાવાત્ । ચિત્સલ્વબાહ્યા, બાહ્યાબાહ્યયોશ્ચ કથમયુતસિદ્ધિઃ । અત એવ ન તૃતીયોઽપિ । સમવાયવપદે હિ મીમાંસકૈસ્તાદાત્મ્યમભિષિચ્યતે । અપિચ તાદાત્મ્યં ન ભિન્નયોઃ, ગવાશ્વયોરપિ તાદાત્મ્યાપત્તેઃ । નચાભિન્નયોઃ, ઇત્યેવં વક્તુમશક્યત્વાત્ । નહ્યેકસ્મિન્ ઘટે ઘટયોરિતિ પ્રયોગોઽનુન્મત્તાનાં ભવતિ । ઘટસ્ય સ્વાભિન્નસ્ય સ્વેન તાદાત્મ્યાસમ્ભવાચ્ચ । નાપિ ભિન્નાભિન્નયોઃ, વિરોધાત્ । નહિ ભેદાઽભેદાવેકાધિકરણૌ ભવિતું શક્નુતઃ, નાપિ ચતુર્થપઞ્ચમૌ, રૂપરસયોરેકસ્મિન્ ઘટાદાવિવ ચિદચિતોરેકાર્થસમવાયસ્ય તાદાત્મ્યસ્ય ચાનુપપત્તેઃ । નહ્યચિતઃ સમવાયાદિસમ્ભવેઽપિ ચિતોઽનાશ્રિતાયાઃ સમવાયાદિ સમ્ભવતિ । અતશ્ચિદચિતોઃ

સમ્બન્ધાऽનિરૂપણાદવભાસ્યાવભાસકભાવો ન સમ્ભવતીતિ ।

અત્રોચ્યતે - યત્સંયોગાદિસમ્બન્ધઃ પરમાર્થતો ન સમ્ભવતીતિ, તદનુમન્યામહે । તર્હિ સમ્બન્ધાભાવાદપ્રકાશત્વમાપતિતમિતિ ઘટ્ટકુટ્યાં પ્રભાતમિતિ ચેન્ન, આધ્યાસિકેન સમ્બન્ધેન પ્રકાશોપપત્તેઃ । અધ્યાસશ્ચ સત્યં એવ વસ્તુન્યસત્યસ્યાऽऽરોપઃ । અસત્યં ચ જગત્ સત્યાયાં ચિતિ આરોપિતામેતિ નાऽનયોઃ કથમાધ્યાસિકઃ સમ્બન્ધઃ સ્યાત્? સતિ ચ સમ્બન્ધઃ સ્યાત્, સતિ ચ સમ્બન્ધે કથં વા પ્રકાશનં ન સ્યાત્? સતિ ચ પ્રકાશને કથં વા શ્રીરામો ન પ્રકાશાત્મકઃ? પ્રકાશાત્મકત્વે ચ સતિ કથં વા ન સ્વપ્રકાશકઃ? અપિતુ સ્વપ્રકાશ એવેતિ સિદ્ધમ્ ।

સ્વભૂર્જ્યોતિર્મયોऽનન્તઃ સ્વપ્રકાશોऽપિ રામો રજાદ્યુપાધિકવિરાડાદિદ્વારા જગત્સૃષ્ટ્યાદિકારણમિત્યાહ - સૃષ્ટિસ્થિતિલયસ્ય ચેત્યાદિના ॥ ૧॥

કારણત્વેન ચિચ્છક્ત્યા રજઃસત્ત્વતમોગુણૈઃ ॥

યથૈવ વટબીજસ્થઃ પ્રાકૃતશ્ચ મહાદ્રુમઃ ॥ ૨॥

ચિચ્છક્ત્યા રજઃસત્ત્વતમોગુણૈઃ સૃષ્ટ્યાદેઃ કારણત્વેન શ્રીરામોऽવતિષ્ઠત ઇત્યધ્યાહૃત્ય યોજ્યમ્ । ચિદાવિષ્ટા શક્તિઃ ચિચ્છક્તિઃ । શાકપાર્થિવાદિત્વાન્મધ્યમપદલોપી સમાસઃ । સાભાસા માયા, સા ચ ત્રિગુણા । તત્ર - રજઃપ્રધાનચિચ્છધત્યુપાધિકવિરાડ્રૂપેણ શ્રીરામો જગતઃ સૃષ્ટેઃ કારણમ્, સત્ત્વપ્રધાનચિચ્છક્ત્યુપાધિકહિરણ્યગર્ભરૂપેણ સ્થિતેઃ, તમઃપ્રધાનચિચ્છક્ત્યુપાધિકાऽવ્યાકૃતરૂપેણ લયસ્ય । એકરૂપસ્ય વસ્તુનો વિચિત્રકાર્યકરત્વં વિચિત્રોપાધિભાવેન ભવતીતિ “રજઃસત્ત્વતમોગુણૈરિતિ વિચિત્રા ઉપાધય ઉપન્યસ્તાઃ । “લયસ્ય ચે”તિ ચકારઃ સમુચ્ચયે । સ ચ ભિન્નક્રમઃ સન્નધ્યાહૃતેન અવતિના સમ્બધ્ય પ્રાગુક્તં સ્વપ્રકાશત્વં સમુચ્ચેષ્યતિ ।

ઇદમિહ પરમતાત્પર્યમવગન્તવ્યં - શમાદિસાધનવતાં મુમુક્ષૂણાં મન્ત્રિણાં મન્ત્રજપો વિહિતઃ, સ ચ મન્ત્રાર્થમનનપૂર્વકઃ । “યદેવ વિદ્યયા કરોતિ કરોતિ તદેવ વીર્યવત્તરં ભવતી’તિ શ્રુતેઃ । મન્ત્રજપાઙ્ગાનિ વિદધતી સ્મૃતિરપિ મન્ત્રાર્થાऽનુસન્ધાનમઙ્ગત્વેન વિધત્તે - “મૌનં મન્ત્રાર્થચિન્તન’મિતિ । મન્ત્રાર્થસ્તુ-બ્રહ્માત્મૈકત્વં મહાવાક્યપ્રતિપાદ્યમ્ । તત્પદાર્થો બ્રહ્મ, ત્વમ્પદાર્થ આત્મા જીવાપરપર્યાયઃ । તત્રાપિ બ્રહ્મ તત્પદસ્યાર્થો ભવદ્વાચ્યો લક્ષ્યશ્ચેતિ દ્વયીં વિધામાપદ્યતે । તત્ર લક્ષ્યોऽર્થઃ “સ્વભૂ’રિત્યાદિવિશેષણચતુષ્ટયેન પ્રતિપાદ્યતે । વાચ્યસ્તુ “જીવત્વેને’સ્યાદિના । એવઞ્ચ- અર્થદ્વયાત્મકં બ્રહ્મ રામ એવં એકાક્ષરબીજરૂપેણ મન્ત્રેણ પ્રતિપાદ્યત ઇતિ । ઇદાનીં પ્રતિપાદ્યપ્રતિપાદકયોઃ શ્રીરામતદ્બીજયોરભેદમભિપ્રેત્ય જગત્સૃષ્ટ્યાદિકારણત્વપ્રાપિતં શ્રીરામગતં જગદાધારત્વં શ્રીરામબીજે સદૃષ્ટાન્તમાચષ્ટે - યથૈવેતિ । પ્રાકૃતો-લૌકિકઃ, દ્રુમસ્ય મહત્ત્વં બહુફલશાખાપત્રપ્રરોહાન્વિતત્વમ્ । ચકારઃ સમુચ્ચયે, સ ચ અશ્વત્થાદીનામનુક્તાનાં સ્વસ્વબીજસ્થત્વં સમુચ્ચિન્વન્ દૃષ્ટાન્તબાહુલ્યમવગમયતિ । એકેન દૃષ્ટાન્તેનાऽપરિતુષ્યન્તં પ્રતિ દૃષ્ટાન્તાऽન્તરોપન્યાસસ્ય યુક્તત્વાત્ । નનુ અશ્વત્થાદીનામપિ મહાદ્રુમશબ્દેનૈવ પ્રાપ્તૌ નાર્થઃ સમુચ્ચયાર્થેન ચકારેણેતિ ચેત્ । મૈવમ્, મહાદ્રુમશબ્દસ્યાऽશ્વત્થાદિપ્રાપણે સામર્થ્યાભાવાત્ । નનુ મહાદ્રુમશબ્દાદશ્વત્થાદ્યપ્રાપ્તિઃ કિમેતેષાં મહત્ત્વસ્યાભાવાદ્ દ્રુમત્વસ્ય વા? નોભયથાપિ, મહત્ત્વદ્રુમત્વયોરશ્વત્થાદિષુ કસ્યાપિ વિગાનાભાવાત્ । અતો મહાદ્રુમશબ્દેન તેષામપ્રાપ્તિરિતિ પ્રલપમાત્રમિતિ ચેત્ - “વટબીજસ્થ” ઇતિ સમાનાધિકૃતેન મહાદ્રુમપદેન વટ એવ પર્યવસ્યતિ, વૃક્ષાન્તરાણાં પ્રાપયિતુમશક્યત્વાત્ ॥ ૨॥

તથૈવ રામબીજસ્થં જગદેતચ્ચરાચરમ્ ॥
રેફારૂઢા મૂર્તયઃ સ્યુઃ શક્તયસ્તિસ્ર એવ ચ ॥ ૩॥
તથેતિ । રામસ્ય બીજં રામબીજં રામશબ્દાર્થપ્રકાશકમેકાક્ષરાત્મકં મન્ત્રરૂપં બીજમ્, તત્ર સ્થિતમ્ । નનુ રામતદ્બીજયોરભેદમભિપ્રેત્યેયં શ્રુતિશ્ચેત્પ્રવવૃતે, તર્હિ કથં ભેદગર્ભિતસમ્બન્ધપ્રતિપાદકષષ્ઠીસમાસઃ? ઉપપદ્યતે, “રાહોઃ શિરઃ” “શિલાપુત્રકસ્ય શરીર’મિત્યાદિવદિતિ બ્રૂમઃ । નનુરામતદ્બીજયોરિયં શ્રુતિઃ કથમભેદમભિપ્રેયાત્? નહ્યભેદે પ્રમાણમસ્તિ । અપ્રામાણિકઃ કથમભિપ્રાયવિષયઃ સ્યાદિતિ । અહો! મહાન્ વ્યામોહ આયુષ્મતઃ, યદેતામેવ શ્રુતિમભેદે પ્રમાણભૂતામપિ નાવલોકયતિ । નન્વેષા શ્રુતી રામબીજે જગતોઽવસ્થિતિમાહ, ન પુના રામતદ્બીજયોરભેદમિતિ ચેત્સત્યમ્, તથાપિ પૂર્વાપરપર્યાલોચનયા એતસ્યાસ્તયોરભેદે પર્યવસાનમવસીયતે । તથાહિ - પૂર્વત્ર જગદુપાદાને શ્રીરામે જગદવસ્થિતિરવગતા, તદ્બીજે ત્વત્રાવગમ્યતે । યદિ તયોરભેદો ન સ્યાત્, કથમિયમુક્તિરુપપદ્યેતેતિ । નનુ બીજસ્ય જગદાશ્રયત્વેઽપિ શ્રીરામસ્ય જગદુપાદાનત્વં નાનુપપન્નં તયોરભેદાદિતિ યદુચ્યતે, તન્નોપપદ્યતે । તસ્યાઽસઙ્ગત્વાત્ । નચાઽસઙ્ગત્વમપ્રમાણકમ્, “અસઙ્ગો હ્યયં પુરુષ” ઇતિ શ્રુતેઃ । અથ વસ્તુતોઽસઙ્ગસ્યાઽપ્યવિદ્યાશબલસ્ય તસ્યોપાદાનત્વમુચ્યતે । મૈવમ્, કિમવિદ્યા-ભાવરૂપા વિદ્યાયા અભાવો વા? નાન્ત્યઃ, અભાવશબલસ્ય બ્રહ્મણ ઉપાદાનત્વોક્તેરયુક્તેઃ । યુક્તૌ વા વિશેષણીભૂતાઽભાવસ્યાપ્યુપાદાનત્વાઽઽપાતાત્ । નચેષ્ટાપત્તિઃ, દ્રવ્યસ્યૈવોપાદાનત્વાભ્યુપગમાત્ । નાદ્યઃ, તસ્યાં પ્રમાણાભાવાત્ । અથ સર્પરજતાદિપ્રતિપત્તય એવ તત્ર પ્રમાણમ્ । નહિ રજ્જુશુક્ત્યાદ્યવિદ્યામન્તરેણ તા ઉત્પદ્યેરન્, તસ્યાસ્તાઃ પ્રતિ કારણત્વાત્ ઇત્યુચ્યતે । મૈવમ્, શુક્ત્યાદિષુ રજતાદિપ્રતિપત્તીનામેવાભાવાત્ । નહિ ગુરુચરણપરાયણૈર્વિભ્રમોઽભ્યુપગમ્યતે । તથાહિ - સર્વે પ્રત્યયા યથાર્થાઃ પ્રત્યયત્વાત્ સમ્યગ્રજતપ્રત્યયવત્ । નનુ સર્વશબ્દેન સમ્યગ્રજતપ્રત્યયઃ સઙ્ગૃહ્યતે ન વા? આદ્યંશતઃ- સિદ્ધસાધનતા, દૃષ્ટાન્તત્વેનોપન્યાસશ્ચાનુપપન્નઃ । નહિ પક્ષુ એવ દૃષ્ટાન્તતયોપન્યસ્યમાનો દૃશ્યતે । ન દ્વિતીયઃ, સર્વશબ્દસ્ય મહિમવ્યાહત્યાપત્તેઃ । એષ એવ હિ સર્વશબ્દસ્ય મહિમા - યદેકમપ્યર્થમસૌ ન ત્યજતિ । નૈષ દોષઃ, સર્વશબ્દસ્ય સઙ્કુચિતવૃત્તિત્વાઽઽશ્રયણન સમ્યગ્રજતપ્રત્યયવ્યતિરિક્તપરત્વોપપત્તેઃ । નચ સઙ્કુચિતવૃત્તિત્વસ્ય સર્વશબ્દમહિમવ્યાઘાતકત્વેન ત્યાજ્યત્વમ્ । વૃદ્ધાઽનઙ્ગીકૃતસ્ય સઙ્કુચિતવૃત્તિત્વસ્ય મહિમવ્યાઘાતકત્વેન ત્યાજ્યત્વાત્ । અઙ્ગીક્રિયતે ચ તત્ર તત્ર વૃદ્ધૈઃ સર્વશબ્દસ્ય સઙ્કુચિતવૃત્તિતા “સર્વે બ્રાહ્મણા ભોજયિતવ્યા” ઇત્યાદૌ ।
નચ સા મહિમવ્યાઘાતકૃત્તયા દૃષ્ટેતિ પરિત્યજ્યતે । તદ્વદત્રાપિ સઙ્કુચિતવૃત્તિત્વં મહિમવ્યાઘાતકમપિ વૃદ્ધાઽઽહૃતં ન પરિત્યજ્યતે ।
અથ પ્રતિપત્તિગૌરવભયાત્ પ્રકારાન્તરેણ પક્ષોપન્યાસમિચ્છસિ તર્હિ - “વિગીતાઃ પ્રત્યયા યથાર્થાઃ” ઇત્યસ્તુ પક્ષોપન્યાસઃ । નનુ પ્રત્યયત્વમસ્તુ, માઽસ્તુ ચ યથાર્થત્વમ્ । વિપક્ષે કિં બાધકમિતિ ચેન્ન, પ્રત્યયાનાં યથાર્થત્વાભાવે વિષયવ્યભિચારાવશ્યમ્ભાવઃ સ્યાત્ । તથાચ સર્વત્ર અનાશ્વાસપ્રસઙ્ગઃ । અપિચ ભ્રમેઽવભાસમાનં રજતમસદબભાસતે સદ્વા? નાદ્યઃ, અસત્ખ્યાતિપ્રસઙ્ગાત્ । નચ શશશ‍ૃઙ્ગાદિકમસદપરોક્ષાવભાસગોચરો દૃષ્ટમ્ । નાન્ત્યઃ, “નેદં રજત’મિતિ બાધદર્શનાત્ । નચ બાધ્યમાનમપિ સદ્ભવિતુમર્હતિ વિરોધાત્ । બાધાઽવિષયો હિ શબ્દસ્ય યોઽર્થઃ સ ચેદ્બાધ્યેત, કથં ન વિરોધઃ? અપિચ વિભ્રમસ્ય કાર્યત્વે તાવન્ન વિવાદઃ । કાર્યં ચ કારણં વિના ન ભવતિ । ભ્રમસ્ય ચ ન કારણમુપલભામહે । કારણાભાવે

ચાડયુક્તાત્મલાભો વિભ્રમઃ કથં શક્યાઙ્ગીકારઃ? નનુ ચક્ષુરાદિકમેવ કારણમુપલભ્યત ઇતિ ચેન્ન, તસ્યાસંયુક્તસ્ય વિભ્રમજનકત્વેઽતિપ્રસઙ્ગાત્ । સંયુક્તસ્ય તથાત્વે સંયોગસ્ય પ્રતિયોગી વક્તવ્યઃ । નનુ રજતાદિતિ ચેન્ન, અસતસ્તસ્ય સંયોગપ્રતિયોગિત્વાઽનુપપત્તેઃ, બાધ્યમાનસ્ય સત્તાનુપપત્તેઃ । ઇહ બાધ્યમાનસ્યાપિ દેશાન્તરાદૌ સત્ત્વં નાનુપપન્નમિતિ ચેન્ન, તથાપિ સંયોગપ્રતિયોગિત્વસ્યાઽયોગાત્ । નહિ વ્યવહિતેન ચક્ષુઃ સંયુજ્યતે । અથદોષવશાદ્વ્યવહિતમપિચક્ષુષા સંયોગરહિતઙ્ગ્રહીષ્યત ઇતિ ચેન્ન, તસ્ય દોષવશાદેવ સકલચાક્ષુષપદાર્થગ્રાહકત્વપ્રસઙ્ગાત્ । નન્વૌદર્યસ્યાગ્નેર્ભસ્મકાદિદોષદુષ્ટસ્ય બહ્વન્નપાકજનકત્વવત્ તિમિરાદિદોષદુષ્ટસ્ય ચક્ષુષોઽસંયુક્તરજતપ્રતીતિજનકત્વમસ્ત્વિતિ ચેન્ન, ભસ્મકાદીનામૌત્સર્ગિકપાવકગતાઽત્યન્નપાકલક્ષણકા । તર્હિ બહ્વન્નપાકલક્ષણકાર્યમકારણકમેવસ્યાત્ । ન સ્યાત્, કારણાન્તરાદપિ તદુત્પત્તેરુપપત્તેઃ । અતો ભ્રમ એવ નાસ્તીતિ ન તલ્લિઙ્ગમવિદ્યાભાનમુદયમાસાદયિતુમીષ્ટે । તસ્માદવિદ્યાશબલિતં રામાખ્યં બ્રહ્મ જગત્કારણમિતિ રિક્તમુક્તમિતિ ।

અત્રાઽઽચક્ષ્મહે - યદુક્તં પ્રત્યયયાથાર્થ્યાનુમાનમ્, તદયુક્તમ્ । પૂર્વોક્તરીત્યા સિદ્ધસાધનાદિદોષગ્રસ્તત્વાત્ । નનુ પ્રાગીરિતદોષસમાધિઃ કથં ન હૃદિ નિધીયતે ઇતિ ચેન્ન, તથાપિ પ્રતિપત્તિગૌરવસ્યાઽપરિહાર્યત્વાત્ । અથ “વિગીતાઃ પ્રત્યયા યથાર્થા” ઇતિ કરણે ન પ્રતિપત્તિગૌરવમિતિ ચેત્, તથાપિ વિગીતપદેન વિભ્રમાનાભિધાય યથાર્થત્વં સાધ્યતે, ઉત યથાર્થપ્રત્યયાનાં વા? ન દ્વિતીયઃ, યથાર્થપ્રત્યયાનાં યથાર્થત્વે વિપ્રતિપત્ત્યભાવેનાઽસાધનીયત્વાત્ । આદ્યે વિરોધઃ, નહિ સમ્ભવતિ-વિભ્રમા યથાર્થાશ્ચેતિ । અપિચ વિભ્રમાઃ પ્રામાણિકાઃ પક્ષીક્રિયન્તે અપ્રામાણિકા વા? નાદ્યઃ, વિભ્રમાઽનઙ્ગીકારિણાં વિભ્રમપ્રામાણિકત્વોપન્યાસાઽનવકાશાત્ । ન દ્વિતીયઃ આશ્રયાસિદ્ધ્યાપાતાત્ । અયથાર્થવ્યવહારે તુ ભૂતપ્રત્યયપક્ષીકારે ન કોઽપિ દોષ ઇતિ ચેન્ન, સર્વજગત્કારણસ્યેશ્વરજ્ઞાનસ્યાયથાર્થવ્યવહારં પ્રત્યપિ કારણસ્ય યથાર્થત્વાઙ્ગીકારિણં પ્રતિ સિદ્ધસાધનત્વાત્ ।

યદવાદિ - વિષયવ્યભિચારે વિજ્ઞાનાનામનાશ્વાસપ્રસઙ્ગ ઇતિ । તન્ન, વ્યવહારાણામપિ વિષયવ્યભિચારેઽનાશ્વાસપ્રસઙ્ગસ્ય દુર્વારત્વાત્ તુલ્યત્વાત્ ॥ યદભ્યધાયિરજતસ્યાઽસતોઽવભાસે શૂન્યખ્યાત્યાપત્તિરિતિ । તદપિ ન, સત્ત્વાદિના રજતસ્યાનિર્વચનીયસ્યાઽવભાસાભ્યુપગમાત્ । યચ્ચાઽગાદિ - કારણાભાવાદ્વિભ્રમસ્યાઽઽત્મલાભ એવ નેતિ । તચ્ચ ન, ચક્ષુરાદેરેવ કારણત્વાત્ । નનુ સમીચીનપ્રત્યયજનનસ્વભાનાં ચક્ષુરાદીનાં કથમસમીચીનપ્રત્યયજનકત્વમિતિ ચેત્, સમીચીનવ્યવહારજનનસ્વભાવાનાં પ્રત્યયાનામસમીચીનવ્યવહારજનકત્વં કથમ્? દોષવશાદિતિ ચેત્, ચક્ષુરાદિષ્વપિ તથા કિં નેષ્યતે? નનુ દોષાણામૌત્સર્ગિકકાર્યપ્રતિબન્ધકત્વમેવ ન વિપરીતકાર્યોત્પાદકત્વમિતિ ચેન્ન, પ્રત્યયાનામપિ તર્હિ દોષવશાદસમીચીનવ્યવહારજનકત્વાભાવાપાતાત્ । અપિચ દાવાગ્નિદાહલક્ષણો દોષો વેત્રબીજેભ્યોઽપિ કદલીકાણ્ડાનુપજનયન્ દૃશ્યતે । યદપ્યભાણિ-દુષ્ટસ્ય ચક્ષુષો વ્યવહિતગ્રાહકત્વે સર્વચાક્ષુષગ્રાહકત્વપ્રસઙ્ગ ઇતિ । તદપ્યસારમ્, દુષ્ટસ્ય પ્રત્યયસ્ય વ્યવહિતરજતવ્યહારજનકત્વે સર્વવ્યવહિતવ્યહારજનકત્વપ્રસઙ્ગસ્ય તુલ્યત્વાત્ । અનિર્વચનીયવાદાશ્રયણે તુ વ્યવહિતગ્રાહકત્વશઙ્કાઽનવકાશ એવ । તસ્માદતસ્મિંસ્તદ્રૂપાણાંવિભ્રમાણામવશ્યાશ્રયણીયત્વાત્ તૈરવિદ્યાનુમાને તચ્છબલિતં બ્રહ્મ જગદુપાદાનમિતિ સકલમનાકુલમ્ ।

અથ વિભ્રમો જ્ઞાનવિશેષઃ । જ્ઞાનં ચ ન વિષયમન્તરેણ સ ત્તાં લભતે । અતો વિભ્રમસ્ય વિષયો વક્તવ્યઃ, નચ વક્તું શક્યતે । તથાહિ - કિમધિષ્ઠાનં વિભ્રમસ્ય વિષયો રજતાદિર્વા? નાદ્યઃ, વિભ્રમસ્યાઽબાધ્યત્વાપત્તેઃ

। નહિ વિષયસ્ય સત્ત્વે વિ જ્ઞાનં બાધ્યતે । ન દ્વિતીયઃ, વિકલ્પાસહત્વાત્ । તથાહિ - રજતાદિકં સત્ અથાઽસત્ આહો સદસત્? આદ્યેઽપિ-પુરોવર્તિનિ સદન્યત્ર વા? નાદ્યઃ, વિભ્રમસ્યાઽબાધ્યત્વાપત્તેઃ । દ્વિતીયેઽપિ - હટ્ટાદૌ સત્તદ્બુદ્ધૌ વા? નાદ્યઃ, હટ્ટાદૌ સતોઽત્ર ભાનાનુપપત્તેઃ । ન દ્વિતીયઃ, આન્તરસ્ય બહિર્ભાનાનુપપત્તેઃ । નનુ મતદ્વયેઽપિ દોષવશાદ્ભાનોપપત્તિરિતિ ચેત્તર્હિ પુરોવર્તિનઃ પુરોવર્ત્યાત્મકત્વં તત્સંસર્ગો વા? આન્તરસ્ય બાધાત્મકત્વં તત્સંસર્ગો વા વિષય ઇત્યાપતિતમ્ । તસ્યચ કથમપરોક્ષાવભાસવિષયતા ભવેત્? કથં વા રજતાદ્યર્થિનો ગ્રહણાદિવ્યવહારગોચરતા સ્યાત્? અત્યન્તાસત્ત્વાત્ । નહિ પુરોવર્તિતાદાત્મ્યાદિકમત્રાન્યત્ર ચ સમ્પ્રતિ સમયાન્તરે ચ સદ્ભવિતુમર્હતિ । અથાત્યન્તાસત્યપિ અપરોક્ષપ્રતીતિપ્રવૃત્તી કિં ન સ્યાતામિતિ ચેન્ન, તથા સત્યાત્મખ્યાત્યન્યથાખ્યાતિ-વાદિનોરસત્ખ્યાતિસ્વીકારેણાઽપાસિદ્ધાન્તાપત્તેઃ । કિઞ્ચ સર્વસામર્થ્યાવિરહિણોઽત્યન્તાસતો વિષયીભવનસામર્થ્યમેવ નાસ્તિ, તત્ર કથમપરોક્ષપ્રતીતિપ્રવૃત્તી સ્યાતામ્?

અથ મતં વિજ્ઞાનમેવ સ્વહન્તુ વિશેષપ્રાપિતસ્વભાવવિશેષવિષયીભવનસામર્થ્યવિરહિતેઽપ્યત્યન્તાસત્યવિદ્યાસામર્થ્યાદવભાસકં ભવતીતિ, તર્હિ કિમસ્યાઃ શક્યમ્? અસદેવેતિ ચેત્કથં તર્હિ કિમુત્પાદયિતું શક્યં બોધયિતું વા? નાદ્યઃ, અત્યન્તાઽસતસ્તથાત્વાયોગાત્ । તથાત્વે ચાઽત્યન્તાસત્ત્વાભાવપ્રસઙ્ગાત્ । ન દ્વિતીયઃ, બોધયિતુમિત્યનેન બોધજનનોપસ્થાનાત્ । તથા સતિ કો દોષ ઇતિ ચેત્, અનવસ્થાપ્રસઙ્ગાદિતિ બ્રૂમઃ । માઽસ્તુ તર્હિ શક્યમિતિ ચેન્ન, શક્યાભાવે શક્તેરેવાભાવાપત્તેઃ । શક્તિરપિ માભૂદિતિ ચેત્તર્હિ વિજ્ઞાનમવિદ્યાસામર્થ્યાદવભાસકમિતિ ભવદીયભાષણસ્યાઽપભાષણત્વમાપદ્યેત । અપિચ હટ્ટાદૌ બુદ્ધૌ વાઽસ્તીત્યત્ર ન માનં પશ્યામઃ । અનુભવ ઇતિ ચેત્, ભ્રાન્ત્યનુભવો બાધાનુભવો વા? નાદ્યઃ, તસ્ય પુરોવર્તિરજતાદાવેકસ્યા બુદ્ધેર્હટ્ટાદૌ તદાવેદકત્વાભાવાત્ । ભાવે વા બુદ્ધ્યાદૌ રજતમિતિ પ્રતીત્યાપત્તેઃ । ન દ્વિતીયઃ, તસ્ય પુરોવર્તિરજતાદ્યભાવમાત્રગોચરત્વાત્ । નન્વેવં બુદ્ધ્યાદૌ રજતાદ્યસત્ત્વે તથાપિ કથં ન રજતાદિ બાધ્યતે ઇતિ ચેન્ન, પ્રસક્ત્યભાવાત્ । અત્રેવ તત્રાપિ પ્રસક્તિરસ્તીતિ ચેત્, પ્રમાણેન ભ્રાન્ત્યા વા? નાદ્યઃ, બાધ્યત્વાનુપપત્તેઃ । ન દ્વિતીયઃ, તત્ર ભ્રાન્તેરેવાઽનુત્પાદનાત્ । નનુ રજતસ્ય સંવિદાકારત્વાભાવે સત્યાપરોક્ષ્યાનુપપત્તિરિતિચેન્ન, બહિઃસ્થસ્યૈવ તદુપપત્તેઃ । નહિ બાહિઃસ્થ્યં સંવિદાકારઃ, અબાહિઃસ્થ્યસ્ય સંવિદાકારતયા બાહિઃસ્થ્યસ્ય તદાકારત્વાનુપપત્તેઃ । કિઞ્ચ અધ્યસ્તં બુદ્ધૌ ચેત્તાત્ત્વિકં, તર્હિ કપીનાં શીતાર્તાનાં ગુઞ્જાપુઞ્જાદાવારોપિતેન વહ્નિનાઽતાત્ત્વિકેન તરૂણામિહ દાહપ્રસઙ્ગાત્ ।

તત્રાઽપ્યતાત્ત્વિકત્વાન્નાયં પ્રસઙ્ગ ઇતિ ચેત્, શૂન્યાનિર્વચનીયવાદયોરન્યતરસ્વીકારાપત્તેઃ । તસ્માદત્ર સદન્યત્ર ચાઽસદ્રજતં વિભ્રમસ્ય વિષય ઇતિ ન સુન્દરમ્ । ન દ્વિતીયઃ, કિમત્રેદાનીમેવ વાઽસત્? આહો સર્વત્ર સર્વદૈવાઽસત્? નાદ્યઃ, દત્તોત્તરત્વાત્ । ન દ્વિતીયઃ, અત્યન્તાસતોઽપરોક્ષાવભાસવિષયત્વાસમ્ભવ ઇત્યુક્તત્વાદેવ । નાપિ તૃતીયઃ, વિરોધાત્ । નહિ યત્સત્તદસત્, યચ્ચાઽસત્ તત્સત્ ભવિતુમર્હતિ । સત્ત્વાસત્ત્વયોઃ પરસ્પરોપમર્દનરૂપત્વાત્ । તસ્માદ્વિષયાભાવાન્નિર્વિષયસ્ય ચ જ્ઞાનસ્યાઽઽત્મલાભાનુપપત્તેનિર્વિષયો વિભ્રમો નાત્માનં લભત ઇતિ ન તેનાઽવિદ્યાનુમાનમિતિ ।

અત્ર વદામઃ - ભવેદેવમ્, યદિ વિભ્રમો નિર્વિષયો ભવેત્ । નનુ વિષયત્વમદૂષ્યમિતિ ચેત્ । સત્યમ્, દૃષ્યસ્ય દૂષિતત્વેઽપ્યદૂષ્યસ્ય કિમાયાતમ્ । અદૂષ્યો વિષયઃ ક ઇતિ ચેત્, અનિર્વચનીયત્વમિતિ વદામઃ । અથ કિમિદમનિર્વચનીયત્વમ્?સદસદ્વિલક્ષણત્વમિતિ ચેન્ન, પુનરુક્તેઃ । કિં શબ્દાવૃત્તિમાત્રેણ પુનરુક્તિઃ, એકાર્થશબ્દાવૃત્ત્યા વા? નાદ્યઃ, યમકાદાવપિ પુનરુક્તિપ્રસઙ્ગાત્ । ન દ્વિતીયઃ, સદસત્પદાવૃત્તાવેકાર્થત્વાભાવાત્

। પૂર્વં સચ્ચાઽસચ્ચેતિ દ્વન્દ્વઃ, અનન્તરં સચ્ચ તદસચ્ચેતિ કર્મધારયઃ । નચાનયોઃ સમાસયોરર્થૈક્યં યુક્તં વક્તુમિતિ । તર્હિ વક્તવ્યમત્ર પ્રમાણમ્ । નહિ પ્રમાણમન્તરેણ પ્રમેયસિદ્ધિઃ । નનુ બાધખ્યાત્યૈકોભયાઽનાત્મકત્વપ્રસિદ્ધ્યનુપપત્તિઃ પ્રમાણમનિર્વચનીયત્વે । સત્ત્વે હ્યનુપપદ્યમાનેન બાધેન સદ્વૈલક્ષણ્યમ્, અસત્ત્વેઽનુપપદ્યમાનયા ચાઽપરોક્ષખ્યાત્યાઽસદ્વૈલક્ષણ્યમ્, એકસ્યોભયાનાત્મકત્વપ્રસિદ્ધ્યા ચૈકસ્ય રજતાદેઃ સદસદુભયાત્મકત્વેઽનુપપદ્યમાનયા સદસદ્વૈલક્ષણ્યમાનીયત ઇતિ કથમનિર્વચનીયત્વમપ્રમાણકમિતિ ચેત્ । મૈવમ્, બાધાદીનામન્યથૈવોપપત્તેઃ । તથાહિ-પુરોવર્તિનિ સન્ન ભવતીત્યેતાવતૈવ બાધોપપત્તૌ રજતાદેરન્યત્ર સત્ત્વં કથમપ્રત્યૂહં ન સ્યાત્? ક્વાચિત્કસત્ત્વમાત્રેણૈવાઽપરોક્ષખ્યાત્યુપપત્તૌ બાધોપનીતં પુરોવર્તિન્યસત્ત્વં કથમકણ્ટકં ન સ્યાત્? એકસ્યોભયાઽનાત્મકત્વાઽપ્રતીતિરપિ દેશભેદેનૈવ તસ્યૈવ રજતસ્ય સદસદુભયાત્મકત્વેઽપિ ન વિરુધ્યત ઇતિ સદસદાત્મકમપિ કથમપ્રતિપક્ષં ન સ્યાત્ । તદેવં ખ્યાત્યાદ્યનુપપત્તિરનિર્વચનીયત્વે ન માનમિતિ સ્થિતમ્ ।

બાધવિષયત્વમનિર્વચનીયત્વમિતિ ચેન્ન, શુક્તિકાદેરપ્યનિર્વચનીયત્વપ્રસઙ્ગાત્ । શુક્તિકાદિકમપિ નેદં રજતં કિન્તુ શુક્તિરિતિ બાધસ્ય વિષયપ્રતિપન્નોપાધૌ નિષેધપ્રતિયોગિત્વે તદિતિ ચેન્ન, રજત એક રજતપ્રતિપત્તિભાજિ કુતશ્ચિત્કારણાત્ "નેદં રજત" મિતિ વિભ્રામ્યતિ પુરુષે રજતસ્યાપિ પ્રતિપન્નોપાધૌ નિષેધપ્રતિયોગિનોઽનિર્વચનીયત્વપ્રસઙ્ગાત્ । કારણત્રિતયજન્યત્વમનિર્વચનીયત્વમિતિ ચેન્ન, સમવાયાદિકારણત્રિતયજન્યે પટાદાવતિવ્યાપ્તેઃ । સંસ્કારસમ્પ્રયોગદોષજન્યત્વં વિવક્ષિતમિતિ ચેત્, પ્રાગેવેચ્છ । કિં તાવદીર્યેત-મમ દોષોદ્ભાવનાવકાશ એવ ન સ્યાત્ । નત્વયમલ્પ એવાપરાધઃ । ઇદં તુ લક્ષણમદુષ્ટમિતિ ચેન્ન, દોષપ્રત્યભિજ્ઞાયામતિવ્યાપ્તેઃ । સા હિ જ્વરાદિહેતૌ પિત્તાદિદોષે વાન્તે ભિષજા "સ એવાય" મિતિ જાયમાનસંસ્કારસંયોગાભ્યામિવ કર્મભૂતેન દોષેણાપિ જન્યતે । પ્રતિભાસમાત્રશરીરત્વમનિર્વચનીયત્વમિતિ ચેન્ન, માત્રશબ્દસ્ય વૈયર્થ્યાત્ । પ્રતિભાસ્યાત્મના સત્ત્વવ્યવચ્છેદ એવ માત્રત્વાર્થ ઇતિ ચેત્, તથા સતિ આત્મન્યતિવ્યાપ્તેરપરિહાર્યત્વાત્ । આત્માપિ હિ ભવતાં મતે પ્રતિભાસ્યરૂપ એવ, ન પુનઃ પ્રતિભાસરૂપઃ । તસ્માન્નાસ્ત્યનિર્વચનીયત્વવચનમિતિ ।

અત્ર બ્રૂમઃ - તત્તદ્રૂપનિરૂપણાઽસહિષ્ણુત્વસ્યૈવાઽનિર્વચનીયલક્ષણાત્ । નનુ રજતાદૌ નેદં લક્ષણમસ્તિ, સદાદિરૂપેણ નિરૂપણં સહતે ઇતિ ચેન્ન, તથાહિ - રજતાદિકં તાવન્ન સત્, બાધાત્ । અબાધ્યમાનં હિ સત્ । નાપ્યસત્, અપરોક્ષપ્રતીતિવિષયત્વાત્ । નહ્યપરોક્ષપ્રતીતિવિષયા ઘટાદયોઽસન્તઃ । નાપિ સદસત્, વિરોધાત્ । તસ્માત્ સદાદિરૂપેણ રજતાદિનિરૂપણં ન સહત એવ । નનૂક્તમેવ - દેશભેદેન સત્યસતિ ચ રજતે બાધાદેરુપપત્તૌ રજતાદેઃ સદાદિરૂપેણ નિરૂપણં નિરન્તરાયમિતિ ચેન્નૈવમ્, બાધસ્ય દેશાન્તરે રજતમસ્તીત્યત્રૌદાસીન્યાત્ । અપરોક્ષપ્રતીત્યા પુરોવર્તિમાત્રસંયોગજન્યયાપિ બાધવિરોધાત્ પુરોવર્તિનિ રજતે સત્ત્વબોધનાય પ્રવર્તિતુમશક્યત્વાત્ । અત એવ સ્વસ્વમાત્રવિષયશૂન્યયોર્બાધખ્યાત્યોર્વિરોધપરિહારાય સદસત્ત્વયોર્દેશભેદેન વ્યવસ્થાપકતાઽભાવાદ્દેશભેદેનૈકસ્યૈવ રજતસ્ય સદસદુભયાત્મકત્વસ્ય વ્યવસ્થાપયિતુમશક્યસ્ય ખ્યાતિબાધાભ્યાં પુરોવર્તિન્યેવ પ્રસઞ્જને સત્યેકસ્યૈવોભયાઽનાત્મકત્વપ્રસિદ્ધેરનુપપન્નાયાઃ સદસદુભયરૂપતાવ્યુદાસપત્વાચ્ચ । તસ્માન્ન રજતાદેઃ સત્ત્વાઽસત્ત્વાદિના નિરૂપણમ્ । કિઞ્ચ પુરોવર્તિતાદાત્મ્યાદૌ ગગનપ્રાસાદાદૌ ચ સ્વપ્ને દેશભેદાવલમ્બનેનાપિ સત્ત્વાદિરૂપેણ? ન નિરૂપણમ્ । કિઞ્ચ પુરોવર્તિં નિરૂપયિષ્યસિ । નનુ સત્ત્વેનાઽનિરૂપ્યસ્યાસત્ત્વમાવશ્યકમ્, અસત્ત્વેનાઽનિરૂપ્યસ્ય સત્ત્વમાવશ્યકમ્,

"પરસ્પરવિરોધે હિ ન પ્રકારાન્તરસ્થિતિઃ"

ઇતિ ન્યાયાત્ । અતો રજતાદેઃ સત્ત્વાસત્ત્વયોરન્યતરપ્રકારાવશ્યમ્ભાવાન્ન તદુભયવિલક્ષણત્વપ્રકારવાચોયુક્તિર્યુક્તિમતીતિ ચેન્ન, અનિર્વચનીયત્વપ્રતિક્ષેપેણ નિર્વચનીયત્વસ્ય ભવદભ્યુપગતન્યાયવલાદેવ ભવતાऽવશ્યાભ્યુપગન્તવ્યત્વાત્ । ત્વમેવ હિ "પરસ્પરવિરોધે હી'તિ ન્યાયમભાષિષ્ઠાઃ । નહ્યયં ન્યાયઃ સત્ત્વસત્ત્વે એવ વિષયીકરોતિ, ન નિર્વચનીયત્વાऽનિર્વચનીયત્વે ઇતિ સમ્ભવતિ । અન્યથા વૈપરીત્યસ્યાપિ વક્તું શક્યત્વાત્ । તસ્માદનિર્વચનીયત્વસ્ય લક્ષણાભાવચોદ્યમવદ્યમેવેતિ સિદ્ધમ્ । નાપિ પ્રમાણાભાવઃ, ખ્યાત્યાદ્યનુપપત્તેરેવ પ્રમાણત્વાત્ । યથા ચેદં પ્રમાણં તથા વિસ્પષ્ટમેવ । કિઞ્ચ - "વિમતં અનિર્વચનીયં બાધ્યત્વાત્ યન્નૈવં તન્નૈવં યથાऽऽત્મા" ઇતિ પ્રયોગોऽપિ પ્રમાણમનિર્વચનીયત્વે । તસ્માત્ - અનિર્વચનીયવિષયલાભાલલબ્ધાત્મિકયા ભ્રાન્ત્યા કાર્યેણાऽવિદ્યાભાને તદાલિઙ્ગિતં શ્રીરામાખ્યં બ્રહ્મ જગદુપાદાનમિત્યવદાતમ્ । તથાચરામાભિન્નં(બ્રહ્મ)જગદુપાદાનં જગદાધાર ઇતિ સિદ્ધમ્ ।

બીજમુદ્ધરતિ-રેફેતિ । "વર્ણાત્કાર" ઇતિ સામાન્યતઃ પ્રાપ્તસ્ય કારપ્રત્યયસ્યાપવાદતયા "રાદિફ" ઇત્યનેન ઇફસ્ય વિધાનાત્ રેફ ઇતિ સિધ્યતિ । અતો રેફો રવર્ણસ્તમારૂઢાઃ તદવ્યવધાનેન ઘટનાન્મૂર્તયસ્તિસ્રઃ-અકારદ્વયં મકારશ્ચેતિ વર્ણાસ્ત્રયઃ સમુદિતા રેફારૂઢા બીજં સ્યુઃ । બીજમિત્યનુષઞ્જનીયમધ્યાહરણીયં વા । નનુ મૂર્તિશબ્દેન બ્રહ્માદિદેવત્રયપરતયા પુરાણાદૌ પ્રસિદ્ધેન કથં ત્રયો વર્ણા લભ્યન્તે? તેષાં બ્રહ્માત્મકત્વાદિતિ બ્રૂમઃ । પ્રથમોऽકારો વિરાડાત્મકબ્રહ્મરૂપઃ, દ્વિતીયોऽકારો હિરણ્યગર્ભાત્મકવિષ્ણુરૂપઃ, મકારસ્તુ અવ્યાકૃતાત્મકસદાશિવરૂપઃ । નનુ રેફરૂપં વ્યઞ્જનં આકારો મકારશ્ચેત્યેતાવદેવ બીજે પ્રતીયતે, કિમિદમુચ્યતે-પ્રથમોऽકારો દ્વિતીયોऽકાર ઇતિ । મૈવમ્, રાકારપ્રતીતૌ તદવયવયોઃ અકારયોઃ પ્રતીતેરાવશ્યકત્વાત્ । નનુ અકારદ્વયમકારાણાં સૃષ્ટ્યાદિશક્તિવિરહિણાં કથં બ્રહ્માદ્યાત્મકત્વમત આહ-શક્તય ઇતિ । સૃષ્ટ્યાદિશક્તય ઇત્યર્થઃ । નનુ "શક્તય" ઇત્યસ્ય કેનાન્વયઃ? કિં રેફારૂઢા ઇત્યનેન, મૂર્તય ઇત્યનેન વા? નાદ્યઃ, અકારાદીનાં શક્તિમત્ત્વપ્રતિપાદનાऽભાવપ્રસઙ્ગાત્ । ન દ્વિતીયઃ, અકારાદીનાં શક્તિમત્તયા વક્તવ્યાનાં શક્તિરૂપતાપ્રતિપાદનસ્યાનુપયોગાત્ । મૈવમ્, સમાસાવયવભૂતમપ્યારૂઢપદં બુદ્ધ્યા વિભજ્ય મૂર્તિપદેન સંયોજને મૂર્ત્યારૂઢા ઇતિ સિદ્ધૌ અકારાદીનાં શક્તિમત્ત્વસિદ્ધેઃ । યદા તુ રામાભિન્નમપિ બીજં રામાદ્ભેદેન વિવક્ષિત્વા વાચકં ક્રિયતે, તદા રેફેણ સ્વભૂરિત્યાદિપ્રતિપાદિતં સ્વપ્રકાશં બ્રહ્મોપસ્થાપ્યતે । તત્ર ચ મૂર્તયો વિરાટ્સૂત્રાવ્યાકૃતાત્મકબ્રહ્મવિષ્ણુમહેશ્વરાખ્યાઃ પ્રથમાકારદ્વિતીયાકારમકારૈર્બીજાવયવભૂતૈઃ પ્રતિપાદિતાઃ ।

આરૂઢાઃ - સ્રજિ સર્પાદય ઇવાऽऽરોપિતાઃ । ઉપલક્ષણં ચૈતત્, ત્રિગુણાત્મકસ્ય સર્વસ્યાપિ જગતસ્તત્રારોપિતસ્ય વક્તવ્યત્વાત્ । અથ રેફસ્ય કથં સ્વપ્રકાશપરત્વમ્! તસ્યાગ્નિવાચકતયા પ્રસિદ્ધસ્ય સ્વપ્રકાશે પ્રવૃત્તાવવિરોધાત્ । અત એવ ચ શ્રીરામમન્ત્રોદ્ધારે "તારકં દીર્ઘાનલ'મિતિ શ્રુતિરનલશબ્દેનાऽગ્નિવાચકં રેફં વિવક્ષિતવતી । બ્રહ્મકલ્પોऽપિ "વહ્નિશ્ચં શયનં વિષ્ણો'રિત્યત્ર વહ્નિશબ્દેન રેફમેવ વહ્નિવાચકમભિપ્રૈતિ । નનુ રેફસ્ય સ્વપ્રકાશબ્રહ્મપરસ્ય વિરાડાદિત્રયોપલક્ષિતસકલત્રિગુણજગદુત્થાપકવર્ણત્રયેણ સામાનાધિકરણ્યં કિં "નીલમુત્પલ'મિત્યાદિવત્? આહોસ્વિત્ "ચોરઃ સ્થાણુ'રિત્યાદિવત્? નાદ્યઃ, બ્રહ્મજગતોરુભયોરપિ તુલ્યત્વાત્સત્યત્વાપત્તેઃ । નહિ નીલોત્પલાદાવન્યતરસ્યાપિ મિથ્યાત્વમસ્તિ । ન દ્વિતીયઃ, જગતો મિથ્યાત્વે વિનિગમકાભાવાત્ । નહિ સ્થાણુસાક્ષાત્કારશ્ચોરસ્યેવ, પરમાત્મસાક્ષાત્કારઃ પ્રપઞ્ચસ્ય બાધકઃ

કસ્યચિત્કુત્રચિત્કદાચિદુત્પદ્યમાનો દૃષ્ટઃ । અતો ન રેફસ્ય વર્ણાન્તરસામાનાધિકરણ્યં વરેણ્યમિતિ ।
તદસારમ્ । યત્ખલ્વવાદીઃ નીલોત્પલાદિતુલ્યતાનભ્યુપગમપરાહતમ્ । યદપિ ચોરસ્થાણોઃ સામાનાધિકણ્યતુલ્યતાશ્રયણે દૂષણમભાણીઃ- જગતો મિથ્યાત્વે વિનિગમકં નાસ્તીતિ,
તત્કુતઃ । સ્થાણોરિવ પરાત્મનઃ સર્વથા સાક્ષાત્કારાભાવાદિતિ ચેન્ન । અનનુષ્ઠિતસાક્ષાત્કારોપાયાનાં સાક્ષાત્કારાભાવં બ્રૂષે, અનુષ્ઠિતસાક્ષાત્કારોપાયાનાં વા? નાદ્યઃ, અઙ્ગીકારાત્ તાવતા દોષાભાવાત્ । ન દ્વિતીયઃ, વિરોધાત્ । અપિચ "અતોઽન્યદાર્ત'મિતિ શ્રુતિરેવ બીજજગચ્છબ્દાનાં સામાનાધિકરણ્યતુલ્યતામવગમયતિ । તત્ર રેફારૂઢવર્ણત્રયસ્ય પ્રણવગતવર્ણત્રયોપસ્થાપિતાર્થોપસ્થાપકસ્ય પ્રણવાભેદાત્ પ્રણવસ્ય બિન્દ્વાદયોઽવયવા અપિ ગુણોપસંહારન્યાયેનોપસંહરણીયા ઇત્યવગન્તવ્યમ્ । સપ્તાવયવો હિ પ્રણવઃ શ્રીશઙ્કરાચાર્યૈરભિહિતઃ -
સપ્તાત્મકસ્ય તારસ્ય પરૌ દ્વૌ તુ પરૌ યતઃ ।
અતશ્ચ શક્તિશાન્તાખ્યૌ નપઘેતેપરૈઃ સહ ॥
ઇતિ । નન્વવિદ્યાશબલિતસ્ય બ્રહ્મણો જગત્કારણત્વં ન યુક્તમ્, સાઙ્ખ્યૈઃ પ્રકૃતેરેવ જગત્કારણત્વાભિધાનાદિત્યત આહ-એવેતિ । શબલં બ્રહ્મૈવ જગત્કારણં ન પ્રકૃતિરિત્યર્થઃ । ન પ્રકૃતેર્જગત્કારણત્વે પ્રમાણમસ્તિ । યા યા શ્રુતિરુદ્રાહ્રિયતે, તસ્યાસ્તસ્યાઃ પરમાત્માવચ્છેદકત્રિગુણમાયાપરત્વાત્ । અપિચ અચેતનાયાઃ પ્રકૃતેઃ કથં જગદુપાદાને પ્રવૃત્તિઃ? રથાદેર્નગરપ્રાપણ ઇવેતિ ચેત્, તત્ર ચેતનાધિષ્ઠિતેનોપપત્તેઃ । નચ ભવતા પ્રકૃતેશ્ચેતનાધિષ્ઠિતત્વમિષ્યતે । ચેતનસ્યોદાસીનત્વાઙ્ગીકારાત્ । નનુ દુગ્ધવત્પ્રકૃતેરપિ પ્રવૃત્તિરુપપદ્યતે । યદાહુઃ-
"વત્સવિવૃદ્ધિનિમિત્તક્ષીરસ્ય યથા પ્રવૃત્તિરજ્ઞસ્ય"
ઇતિ, ન । તત્રાપિ ગવાદિશરીરાવચ્છિન્નેન ચેતનેનૈવાધિષ્ઠાનાત્ । પરમાણવસ્તર્હિ જગદુપાદાનમ્, જગદપેક્ષયા ન્યૂનપરિમાણત્વાત્ । ન્યૂનપરિમાણા હિ તન્તવઃ પટોપાદાનતયા દૃશ્યન્તે । નચ વ્યાપકસ્ય બ્રહ્મણો જગદપેક્ષયા ન્યૂનપરિમાણત્વં સમ્ભવતિ, યેન જગદુપાદાનતા સુવચા સ્યાત્તત્રાહ - ચેતિ । ચશબ્દો નિષેધે, અવ્યયાનામેનકાર્થત્વાત્ ।
અયં ભાવઃ - પરમાણુઃ પરમાણ્વન્તરેણ સંયુજ્ય દ્વ્યણુકાદિક્રમેણ જગદુપાદાનમિતિ વક્તવ્યમ્ । તન્ન, સંયોગસ્યૈવાનુપપત્તેઃ । તથાહિ - પરમાણુઃ કાર્ત્સ્ન્યેન સંયુજ્યતે એકદેશેન વા? નાદ્યઃ, સંયોગસ્ય પ્રદેશવૃત્તિત્વવ્યાઘાતાપત્તેઃ । અપ્રદેશવૃત્તિત્વમેવ તર્હિ સંયોગસ્યાઽસ્ત્વિતિ ચેન્ન, પટેન ઘટસંયોગસ્ય સર્વપટવૃત્તિતયા સર્વસ્મિન્ પટે ઘટત્વાપત્તેઃ । ન દ્વિતીયઃ, નિરવયવાનાં પરમાણૂનામેકદેશાભાવાત્ । કલ્પિતા એકદેશા ભવિષ્યન્તીતિ ચેત્તર્હિ કલ્પિતપ્રદેશવર્તિનઃ સંયોગસ્યાપિ કલ્પિતત્વાપત્તૌ તદસમવાયિકારણસ્ય જગતોઽપિ કલ્પિતત્વાપત્તૌ સિદ્ધં નઃ સમીહિતમ્ । અધિકપરિમાણસ્ય બ્રહ્મણઃ કથમુપાદાનત્વમુપપન્નમિતિ ચેન્ન, અઘટમાનઘટનાપટુતરાવિદ્યાશબલિતસ્ય બ્રહ્મણો જગદુપાદાનત્વે વિરોભાવાદિતિ સકલમનાકુલમ્ । ઇતિશબ્દો દ્વિતીયોપનિષત્સમાપ્તૌ ॥ ૩॥

ઇતિ શ્રીરામચન્દ્રચરણાનુગૃહીતપરમહંસપરિવ્રાજકાચાર્ય-આનન્દવનરચિતાયાં શ્રીરામપૂર્વતાપિનીયટીકાયાં દ્વિતીયોપનિષત્ સમાપ્તા ।

## અથ તૃતીયોપનિષત્ ।

પ્રથમોપનિષદિ “જપ્તવ્ય” ઇસનેન શ્રીરામમન્ત્રજપો વિહિતઃ । સ ચાઽર્થજ્ઞાનપુરઃસરં ક્રિયમાણો વીર્યવત્તરો ભવતિ, “યદેવ વિદ્યયા કરોતિ તદેવ વીર્યવત્તરં ભવતી”તિ શ્રુતેઃ । રામમન્ત્રસ્ય ત્રિપદં વાક્યમ્ । તતશ્ચ વાક્યાર્થજ્ઞાનસ્ય વાક્યાવયવભૂતપદાર્થજ્ઞાનસાપેક્ષતયા મન્ત્રવાક્યે પ્રથમાવયવભૂતસ્ય બીજરૂપસ્ય પદસ્ય દ્વિતીયોપનિષદા તત્પદાર્થશોધનપરયાઽર્થોઽભિહિતઃ । અધુના તૃતીયોપનિષદા ત્વમ્પદાર્થશોધનં કુર્વત્યા મન્ત્રદ્વિતીયતૃતીયાવવભૂતયોરુપરિતનપદયોરર્થોઽભિધીયતે । નનુ પ્રકૃતિપુરુષરૂપયોઃ સીતારામયોર્ભેદો બીજાદસ્તિ ન વા? આદ્યે-ભિન્નતયા રજતવત્ તયોરપારમાર્થિકત્વમાપદ્યેત । ચરમે-બીજમાત્રશરીરયોસ્તયોર્બીજવાચ્યત્વં ન સ્યાત્ । નહિ બીજમેવ બીજસ્ય વાચ્યં ભવિતુમર્હતિ, વાચ્યવાચકભાવસ્ય ભેદગર્ભિતત્વાદિત્યાશઙ્ક્યાન્તિમમેવ પક્ષમાદાય સમાધત્તે-સીતારામાવિતિ ।

સીતારામૌ તન્મયાવત્ર પૂજ્યૌ જાતાન્યાભ્યાં ભુવનાનિ દ્વિસપ્ત ॥
સ્થિતાનિ ચ પ્રહતાન્યેવ તેષુ તતો રામો માનવો માયયાઽધાત્ ॥ ૧॥

સીતારામૌ- પ્રકૃતિપુરુષૌ વિરાટ્શક્ત્યભિધેયાવિત્યર્થઃ । અત્ર - અસ્મિન્મન્ત્રરાજે તન્મયૌ-બીજાત્મકૌ પૂજ્યૌ-જ્ઞાતવ્યૌ, ધાતૂનામનેકાર્થત્વાત્ । નત્વર્ચનીયૌ, અર્ચનપ્રકરણસ્યાગ્રે વર્તિષ્યમાણત્વાત્ । તદ્ભિન્નયોરપિ તદ્વાચ્યત્વં કલ્પિતભેદાશ્રયણાન્ન વિરુધ્યતે । રાહ્વભિન્નસ્યાપિ શિરસો રાહુસમ્બન્ધિત્વમિવેત્યર્થઃ । યથા બીજસ્ય જગદુત્પત્ત્યાદિકારણત્વમ્, એવં પ્રકૃતિપુરુષયોઃ સીતારામયોર્જગદુત્પત્ત્યાદિકારણત્વં યદિ ન સ્યાત્તદા બીજવિરુદ્ધધર્માધિકરણયોસ્તયોર્બીજાભેદો ન સ્યાત્ । અતસ્તયોર્જગદુત્પત્ત્યાદિકારણત્વમાહ-જાતાનીત્યાદિના । દ્વિસપ્ત-દ્વિગુણિતાનિ સપ્ત, ચતુર્દશેત્યર્થઃ । અધસ્તનાનિ સપ્ત ઉપરિતનાનિ ચ સપ્તેતિ ભુવનાનાં ચતુર્દશત્વમવગન્તવ્યમ્ । “આભ્યા’મિતિ પઞ્ચમી અનયોરિતિ સપ્તમીત્વેન વિપરિણમ્યા । સ્થિતાનિ-સમવેતાનિ પ્રહૃતાનિ-વિનષ્ટાનીતિ વ્યાકર્તવ્યમ્ । એતેન પ્રકૃતિભૂતસીતાસહાયસ્ય રામસ્ય પરમાત્મનો નિમિત્તસ્યૈવ સતો જગદુપાદાનત્વમપ્યુક્તં ભવતિ । એવશબ્દેન નિમિત્તોપાદાનયોર્ભેદો વ્યાવર્ત્યતે । “તત્સૃષ્ટ્વા તદેવાઽનુપ્રાવિશ’દિતિ શ્રુતિમનુસૃત્યાહ-તેષુ તતો રામ ઇતિ । તતો-જગત્સૃષ્ટ્યનન્તરં “રમન્તે યસ્મિન્ યોગિન” ઇતિ રામઃ-પરમાત્મા માયયા-પ્રકૃત્યા । “માયાં તુ પ્રકૃતિ’મિતિ શ્રુતેઃ । તેષુ-ભુવનેષુ સૃષ્ટેષુ અધાત્ - આત્માનં પ્રાવેશયદિત્યર્થઃ । જડસ્ય પ્રવિષ્ટસ્યાપિ જગત્પ્રકાશત્વં ન સ્યાદત આહ - માનવ ઇતિ । મા-પ્રમા જ્ઞાનમ્, તયા નવો-નૂતનઃ । નવત્વેન પ્રતિહતપ્રકાશનસામર્થ્યં લક્ષ્યતે । સ્વયમ્પ્રકાશ ઇત્યર્થઃ । યદ્વા માયયા કૃત્વા માનવો મનુષ્યમૂર્તિઃ, ન પરમાર્થતઃ । યદાહ શ્રીમહાદેવઃ - “માયામાનુષચારિત્રે’તિ । એવં ભગવતિ જગદનુપ્રવિષ્ટે જગતિ પઞ્ચાંશાઃ પ્રતિભાસન્તે-અસ્તિ, ભાતિ, પ્રિયં, રૂપં, નામેતિ । તત્રાદ્યાસ્ત્રયો રામસ્ય પરમાત્મનઃ, ઇતરૌ દ્વૌ જગતઃ । યદાહુરાચાર્યાઃ -

અસ્તિ ભાતિ પ્રિયં રૂપં નામ ચૈતન્યપઞ્ચકમ્ ।
આદ્યં ત્રયં બ્રહ્મનિષ્ઠં જગદ્રૂપં તતો દ્વયમ્ ॥

ઇતિ । એતદુક્તં ભવતિ - અસ્તિભાતિપ્રિયશબ્દોપસ્થાપિતં સત્તાસ્ફૂર્ત્યાનન્દાત્મકત્વં રામપદાવયવવભૂતેન

રાઽક્ષરેણ ગૃહ્યતે, નામરૂપત્વં ચારોપિતં માઽક્ષરેણેતિ । સકલજગદારોપાધિષ્ઠાનં પરમાત્મા રામપદેન ગૃહ્યત ઇતિ ॥ ૧॥

નનુ રામસ્ય સૃષ્ટજગદનુપ્રવેશોઽભ્યધાયિ, સ નોપપદ્યતે । અપરિચ્છિન્નસ્ય નિત્યાનુપ્રવિષ્ટસ્યાઽઽગન્તુકાનુપ્રવેશોક્ત્યનુપપત્તેરિતિ ચેન્નૈવમ્ । અપરિચ્છિન્નસ્યાઽપ્યાકાશવદનુપ્રવેશોપપત્તેઃ । સત્પ્રકાશાનન્દાત્મકસ્ય જગદનુપ્રવેશેન જગદસત્ત્વાદિવ્યાવર્તકતયા જગત્પ્રાણત્વમાગતં જગદાત્મકત્વં ચ । તદ્રામશબ્દાર્થેન વિવક્ષન્ નમઃશબ્દેન યોજનામાહ - જગત્પ્રાણાયેતિ ।

જગત્પ્રાણાયાઽઽત્મનેઽસ્મૈ નમઃ સ્યાન્નમસ્ત્વૈક્યં પ્રવદેત્ પ્રાગ્ગુણેન ॥ ૨॥

નમઃ-પ્રહ્વીભાવઃ । ક્રિયાયા અભાવેન પ્રસક્તં સાકાઙ્ક્ષત્વેનાઽઽનર્થક્યં વારયતિ-સ્યાદિતિ । પ્રહ્વીભાવપરેણ નમઃપદેન સંસારસાગરનિમગ્નતયા પ્રહ્વીભૂતો જીવો લક્ષ્યતે । તતશ્ચ જીવલક્ષકો નમઃશબ્દો રામપદસમાનાધિકૃતઃ સન્ જીવપરમાત્મનોરેકત્વે પર્યવસ્યતિ । નચ મધ્યે ચતુર્થી અજાગલસ્તનસમાનેતિ વાચ્યમ્, "નમઃસ્વસ્તી'ત્યાદિના પ્રાપ્તાયાસ્તસ્યા અપરિહાર્યત્વાત્ । તદિદમાહ-નમસ્ત્વિતિ । તુશબ્દઃ પરાઽપરાત્મનોરેકત્વે વિરોધાઽઽશઙ્કાં નુદતિ । સ્વપ્રકાશત્વાદિગુણવતા પરમાત્મના કથમપરાત્મનસ્તદ્રહિતસ્યાઽભેદઃ સ્યાદિતિ તત્રાહ-પ્રાગ્ગુણેનેતિ । પૂર્વોક્તસ્વપ્રકાશત્વાદિગુણેનેત્યર્થઃ । પરમાત્મસાક્ષાત્કારેણ વહ્નિના સંસારિત્વાદિવિરુદ્ધધર્મમહાવનદાહે પરિશુદ્ધો જીવશ્ચિન્માત્રેણ નિષ્પ્રપઞ્ચેન પરમાત્મના સહ તાદાત્મ્યમનુભવતીત્યભિપ્રાયઃ । ઇતિશબ્દસ્તૃતીયોપનિષત્સમાપ્તૌ ॥ ૨॥

ઇતિ શ્રીરામચન્દ્રચરણાનુગૃહીતપરમહંસપરિવ્રજકાચાર્ય-આનન્દવનરચિતાયાં શ્રીરામપૂર્વતાપિનીયટીકાયાં તૃતીયોપનિષત્ સમાપ્તા ।

## અથ ચતુર્થોપનિષત્ ।

પ્રથમોપનિષદિ "મન્ત્રો જપ્તવ્ય" ઇતિ જપો વિહિતઃ । દ્વિતીયાયાં વાક્યાર્થજ્ઞાનસ્ય પદાર્થજ્ઞાનરૂપકત્વાન્મન્ત્રવાક્યપ્રથમાવયવભૂત બીજરૂપસ્ય પદસ્ય વ્યાખ્યા કૃતા । તૃતીયસ્યામુપરિતનયોર્દ્વિતીયતૃતીયપદયોરિત્યેવં પદાર્થશોધનં કૃત્વા વાક્યાર્થકથનાય વિના મન્ત્રેણ પૂજા ન સિધ્યતીતિ પ્રાગભિહિતમન્ત્રનિરૂપણાય ચતુર્થીમારભતે-જીવવાચીત્યાદિના ।

જીવવાચિ નમો નામ ચાત્મા રામેતિ ગીયતે ॥

તદાત્મિકા યા ચતુર્થી તથા ચાઽઽયેતિ કથ્યતે ॥ ૧॥

તત્ર તાવદ્વાક્યાર્થં "જીવવાચી'ત્યાદિકયા પ્રથમકણ્ડિકયા કથયતિ । નમો નામ- ઇતિ શબ્દો જીવવાચિ-જીવસ્ત્વમ્પદાર્થસ્તસ્ય વાચકમ્ । રામેતિપ્રાતિપદિકેન ચાત્મા-પરમાત્મા ગીયતે-કથ્યતે । આત્મશબ્દો જીવેશ્વરસાધારણોઽપિ તત્પદાર્થેશ્વર ઇવાવગન્તવ્યઃ । નમઃપદેન જીવસ્યાઽવગમિતત્વાત્ । રામેતિ પ્રાતિપદિકાર્થમુક્ત્વા તતો વિહિતાયાશ્ચતુર્થ્યૈકવચનરૂપાયા વિભક્તેરર્થમાહ-તદાત્મિકેત્યુત્તરાર્ધેન । તથાચ સતિ નમોરામપદયોર્જીવપરમાત્મપરત્વે સતિ યા ચતુર્થી "આય" ઇત્યેવમાત્મિકા કથ્યતે-રામપ્રાતિપદિકાત્પરા અભિધીયતે, સેત્યધ્યાહૃત્ય તદાત્મિકેતિ યોજ્યમ્ । તાદાત્મ્યં-તત્સ્વભાવત્વં

જીવબ્રહ્મણોરાત્યન્તિકમભેદમવગમયતીતિ । નન્વિહ ચતુર્થીવિભક્તિરેવ નાસ્તિ, કસ્યાસ્તાદાત્મ્યપ્રવણતા કથ્યતે । ભ્યામ્ભ્યસોરભાવેઽપ્યેકવચનમસ્તીતિ ચેન્ન, "ઙે" ઇત્યશ્રવણાત્ । અથ સ્વરૂપેણાઽશ્રવણેઽપિ "ઙેર્ય" ઇતિવિહિતયકારાદેશરૂપેણ શ્રૂયતે ઇતિ । મૈવમ્, તથા સતિ "શ્રુતાયે'ત્યેવોપાદીયેત, નતુ "આયે'તિ । આયેત્યેતાવતશ્ચતુર્થ્યેકવચનાદેશત્વાભાવાત્ । નૈષ દોષઃ, "સુપિચે'તિવિહિતદીર્ઘાકારવિશિષ્ટસ્યૈવ ગૃહીતસ્ય યકારાદેશસ્ય ચતુર્થીવિભક્તિત્વવ્યાઘાતાભાવાત્ । કેવલસ્યૈવ તર્હિ યકારસ્ય ગૃહીતત્વે (દીર્ઘાકાર)વિશિષ્ટગૃહીતૌ નૈકમપ્યર્થમવલોકયામ ઇતિ ચેન્ન, રામપ્રાતિપદિકાઽન્તાદેશદીર્ઘવિશિષ્ટતયોચ્ચારણસ્ય વિભક્તે રામપ્રાતિપદિકસમ્બન્ધિત્વવિશિષ્ટપ્રતિપત્ત્યર્થત્વાત્ । રામાખ્યસ્ય પરમાત્મનોઽપરોક્ષજીવસ્ય તાદાત્મ્યોપવર્ણનેન પરોક્ષતા નિરસ્તા । નમઃશબ્દોપસ્થાપિતજીવસ્ય રામતાદાત્મ્યપ્રતિપાદનેન અશનાયાદિષડૂર્મિયોગો નિરસ્તઃ । અત એવ શ્રુતિઃ- "તદ્યોઽહં સોઽસૌ યોઽસૌ સોઽહ'મિતિ ।

નનુ (નમો)રામપદાભ્યાં સમાનાધિકૃતાભ્યાં જીવબ્રહ્મણોરેકત્વેઽવગમિતે કિમનુપયોગિનોઽતિરિક્તસ્ય બીજસ્ય મન્ત્રેઽનુપ્રવેશેનેતિ । મૈવમ્, શબ્દરૂપસ્ય બીજસ્યાપિ રામસામાનાધિકરણ્યેન રામાઽભેદપ્રતિપાદનાર્થત્વાત્ । અત એવ પ્રાગભ્યધાયિ -'સીતારામૌ તન્મયા'વિતિ । નનુ સંસારિત્વાઽસંસારિત્વાદિવિરુદ્ધધર્માધ્યાસવતોઃ પરાપરયોઃ કથમાત્યન્તિકમૈક્યમુચ્યતે । ગગનાવચ્છિન્નત્વસલિલાવચ્છિન્નત્વાદિવિરુદ્ધધર્માક્રાન્તયોર્બિમ્બપ્રતિબિમ્બયોરપિ કથમૈક્યં ભવતાઽભિધીયતે । વિરુદ્ધાંશાઽપાકરણેનેતિ ચેત્તર્હિ પ્રકૃતેઽપિ વિરુદ્ધાંશાઽપાકરણેનાઽસ્તુ । નન્વિયમન્યાશ્ચ શ્રુતયઃ ખલ્વાત્મપરમાત્મનોરભેદે પ્રમાણીક્રિયન્તે । અથ કિમ્? નનુ કથય, કથં પ્રત્યક્ષાદિવિરોધે શ્રુતય એતાઃ પ્રામાણ્યમભેદે ભજન્તામ્? પ્રત્યક્ષાદિભિર્હિ ભેદ એવ તયોર્ગૃહ્યતે । મૈવમ્, નઃ તાવતા પ્રત્યક્ષં જીવબ્રહ્મણોર્ભેદગ્રહણક્ષમમ્ । તથાહિ - દેવદત્તઃ સ્વસ્ય પરસ્માદાત્મનો ભેદં ન પ્રત્યક્ષતો ગ્રહીતું શક્ષ્યતિ, સ્વસ્ય પ્રત્યક્ષત્વેઽપિ પરમાત્મનઃ પ્રત્યક્ષત્વાભાવાત્ ॥ ઉભયોરપિ હિ ધર્મિપ્રતિયોગિનોઃ પ્રત્યક્ષત્વેન ભેદપ્રત્યક્ષતા । નાપ્યનુમાનેન । તથાહિ- "અહં પરમાત્મનો ભિન્નસ્તદ્વિરુદ્ધધર્મવત્ત્વા'દિતિ યદનુમાનં, તદસિદ્ધગ્રસ્તમ્ । નહિ સ્વસ્ય પરમેશ્વરવિરુદ્ધધર્માક્રાન્તત્વં દેવદત્તાદિઃ પ્રત્યક્ષતો ગૃહ્ણાતિ, પરમેશ્વરસ્યાઽપ્રત્યક્ષત્વાત્ । નાપ્યનુમાનેન, તાદૃશલિઙ્ગાભાવાત્ । અતો વિરુદ્ધધર્માક્રાન્તત્વહેતુરસિદ્ધઃ । નાપ્યર્થાપત્તિઃ, પરાપરાત્મનોર્ભેદે પ્રમાણાન્તરસ્યાનુપલમ્ભાત્ । વિરુદ્ધધર્માનુપપત્તિરુપલભ્યત ઇતિ ચેન્ન, પ્રાગુક્તનયેન વિરુદ્ધધર્મત્વસ્યાઽપ્રામાણિકતયા તત્પ્રતિયોગિતાયા અનુપપત્તેઃ શશશૃઙ્ગાયમાણત્વાત્ । નાપ્યાગમઃ, તસ્ય સર્વસ્યાપિ પરમાત્મનોરભેદે એવ પ્રમાણત્વસ્ય વિશદમુપલભ્યમાનત્વાત્ । નનુ "દ્વા સુપર્ણે'તિ "દ્વે બ્રહ્મણી'તિ ચ શ્રુતિર્ભેદપરાઽપિ વિલોક્યત ઇતિ ચેન્ન, તસ્યા અવિદ્યાસિદ્ધભેદાનુવાદિન્યાસ્તત્ર પ્રામાણ્યાભાવાત્ । તસ્માત્ - પ્રત્યક્ષાદિવિરોધાભાવાત્ પરિપન્થિવિરહિતેયં શ્રુતિરન્યાશ્ચ કથં ન જીવબ્રહ્મણોરભેદં બોધયિતું ક્ષમિષ્યન્તે । અથ વિરુદ્ધધર્મત્વાભાવેઽપિ વિરુદ્ધસ્વભાવયોર્જીવબ્રહ્મણોર્નાઽભેદો યુજ્યતે, મૈવમ્ । તયોર્વિરોધસ્યૈવાઽસિદ્ધેઃ । તથાહિ - કોઽયમનયોર્વિરોધઃ? કિં સહાઽનવસ્થાનલક્ષણો વિરોધઃ? અથવા બાધ્યબાધકભાવઃ? આહોસ્વિદ્ભાવાભાવાત્મકત્વરૂપઃ? ઉત પરસ્પરાઽનાત્મકત્વાત્મકઃ? નાદ્યઃ, વ્યાપકવ્યાપ્યયોઃ સહાવસ્થાનાત્ । સહાઽનવસ્થાને-વ્યાપકાવચ્છિન્નપ્રદેશેઽન્યસ્યાવસ્થાનાભાવાદવ્યાપકત્વાપત્તેઃ । ન દ્વિતીયઃ, તદસિદ્ધેઃ । નહિ જીવઃ પરં પરો વા જીવં નિહન્તિ । ન તૃતીયઃ, ઉભયોરપિ ભાવત્વાત્ । નાપિ ચતુર્થઃ, પરસ્પરાઽનાત્મકત્વસ્યૈવ ભેદત્વાત્ । તેનૈવ ચ ભેદસાધને આત્માશ્રયત્વાપત્તેઃ સાધ્યવૈશિષ્ટ્યપ્રસઙ્ગાચ્ચ ॥ ૧॥

નનુ જીવબ્રહ્મણોરેકત્વમેવ ચેત્ શ્રીરામમન્ત્રરાજાર્થઃ, તર્હિ રામમન્ત્રરામયોર્વાચ્યવાચકભાવસિદ્ધિર્વ્યાહન્યેતેત્યાશઙ્ક્યાહ - મન્ત્રોઽયમિતિ ।

મન્ત્રોઽયં વાચકો રામો વાચ્યઃ સ્યાદ્યોગ એતયોઃ ॥
ફલદશ્ચૈવ સર્વેષાં સાધકાનાં ન સંશયઃ ॥ ૨॥

જીવબ્રહ્મણોરેકત્વમપિ વિચારે ક્રિયમાણે રામ એવ । અન્યથા તયોરેકત્વમન્યદ્રામોઽન્ય ઇતિ દ્વૈતાપત્તેઃ । અતો ન વિરોધ ઇતિ ભાવઃ । નનુ મન્ત્રમાત્રમનુષ્ઠેયં કિમર્થાનુસન્ધાનેન, અર્થમાત્રં વાઽનુસન્ધેયં કિં મન્ત્રાનુષ્ઠાનેન । એકૈકમાત્રાનુસન્ધાનેઽપિ ફલસ્યાવશ્યકત્વાદિત્યત આહ -યોગ એતયોરિતિ । એકૈકમાત્રાનુસન્ધાનસ્ય પાપક્ષયાદિફલકત્વેઽપિ યોગસ્યૈવ મોક્ષલક્ષણફલદત્વં નાન્યસ્યેતિ ભાવઃ । વિરક્તૈરનિષ્યમાણસ્યાપિ દિવ્યભોગફલસ્ય દાતૃત્વં ચશબ્દાર્થઃ । એવકારોઽયોગં વ્યવચ્છિનત્તિ । ફલદો ભવત્યેવેત્યર્થઃ । સર્વેષામિત્યનેન સાધકાનામસાધકાનાં ચોભયેષામપિ ફલભાવત્વપ્રસક્તિં વ્યાવર્તયતિ -સાધકાનામિતિ । ઉપાસકાનામિત્યર્થઃ । સાધકાનામિતિ બહુવચનસ્ય ત્રિત્વપર્યવસાનેઽપિ ચરિતાર્થતાયાં કતિપયસાધકપરિત્યાગપ્રસક્તિઃ સ્યાત્, તાં નિરસ્યતિ - સર્વેષામિતિ । ઉક્તમર્થં દ્રઢયતિ -ન સંશય ઇતિ । નિત્યસિદ્ધસ્ય મોક્ષસ્યાઽનુત્પાદ્યસ્ય ફલત્વાભાવેઽપ્યવિદ્યાતિરોધાનાદવિદ્યમાનતૈવ ભવતીતિ,બ્રહ્મસાક્ષાત્કારેણાવિદ્યાપગતાવુત્પત્તિરિવ ભવતીતિ ફલત્વમૌપચારિકમુપપદ્યત ઇત્યનુસન્ધેયમ્ ॥ ૨॥

નનુ વાચકમન્ત્રોપાસનેનૈવ વાચ્યો રામઃ સાક્ષાત્કૃતો ભવતીતિ કો નિયમઃ । લૌકિકશ્રીરામગીતાદ્યનુસન્ધાનેનાપિ રામાભિમુખ્યોપપત્તેરિત્યત આહ -યથા નામીતિ ।

યથા નામી વાચકેન નામ્ના યોઽભિમુખો ભવેત્ ॥
તથા બીજાત્મકો મન્ત્રો મન્ત્રિણોઽભિમુખો ભવેત્ ॥ ૩॥

યો નામી - સંજ્ઞી દેવદત્તાદિઃ, સ યથા વાચકેન નામ્ના - સંજ્ઞયા કીર્ત્યમાનોઽભિમુખો ભવેત્- વિમુખોઽપિ સમ્મુખઃ સ્યાત્, તથા બીજાત્મકો મન્ત્ર એકાક્ષરઃ । યદ્વા “બીજમાત્મનિ મન્ત્રશરીરે યસ્યે”તિ ષડક્ષરો મન્ત્રો વાચકો વાચ્યસ્ય મન્ત્રિણો - મન્ત્રદેવતાત્વાન્મન્ત્રવતો રામસ્યાભિમુખો ભવેત્ । સક્ષાત્કારમુત્પાદયિતુમુપાસ્યમાનઃ પ્રવણો ભવેદિત્યર્થઃ । એવમવ્યાખ્યાને દૃષ્ટાન્તદાર્ષ્ટાન્તિકયોરનન્વયાપત્તેઃ । નચ લૌકિકગીતાદિનૈવ રામાભિમુખીકરણં સાધયિતું શક્યમ્,

શ્રોતવ્યઃ શ્રુતિવાક્યેભ્યો મન્તવ્યશ્ચોપપત્તિભિઃ ।
મત્વા ચ સતતં ધ્યેય એતે દર્શનહેતવઃ ॥

ઇતિ નિયમાત્ । ક્વચિત્તથા દર્શનેઽપિ તસ્ય કાકતાલીયતૈવાઽવગન્તવ્યા । જન્માન્તરસહસ્રાનુષ્ઠિતશ્રવણાદિપરિપાકસ્યૈવ સાક્ષાત્કારહેતુત્વસ્યૈવાવશ્યાશ્રયણીયત્વાત્ । અન્યથોદાહૃતવાક્યસ્યોન્મત્તપ્રલપિતત્વાપત્તેઃ ॥ ૩॥

અથ વક્ષ્યમાણપૂજાઙ્ગતયા બીજાદિન્યાસમાહ - બીજેતિ ।

બીજશક્તી ન્યસેદ્દક્ષવામયોઃ સ્તનયોરપિ ॥
કીલં મધ્યે વિના ભાવ્યઃ સ્વવાઞ્છાવિનિયોગતઃ ॥ ૪॥

દક્ષો - દક્ષિણઃ બીજમાદ્યક્ષરં શક્તિરન્ત્યમક્ષરદ્વયમ્ । કીલં મધ્યગતમક્ષરત્રયમ્, તત્ મધ્યે - સ્તનદ્વયાન્તરાલે ન્યસેત્ । વિના - બીજશક્તિભ્યાં પૃથક્ત્વેન ભાવ્યો-ભાવનીયો જ્ઞાતવ્યઃ । અન્યથા કીલકાદ્યપરિજ્ઞાને સકીલકો

મન્ત્રઃ ફલદો ન સ્યાદિત્યર્થઃ । અથવા "અવિને'ત્યકારપ્રશ્લેષેણપદં છિત્ત્વાવ્યાખ્યાતવ્યમ્ । અવિના-અપૃથક્ત્વેન બીજશક્તિમધ્યવર્તિતયા તત્સંશ્લિષ્ટત્વેન ભાવ્ય-ઉપાસનીયઃ । વિનિયોગમન્તરેણ મન્ત્રસ્ય ફલદત્વં ન સ્યાદિતિ વિનિયોગમાહ - સ્વવાઞ્છેતિ । અસ્ય મન્ત્રસ્ય વાઞ્છિતાર્થે વિનિયોગ ઇત્યાકારેણ વચનોચ્ચારણં કર્તવ્યમિત્યર્થઃ ॥ ૪॥

બીજશક્ત્યાદિન્યાસકલ્પનાયાઃ પ્રાકરણિકરામમન્ત્રમાત્રસમ્બન્ધિત્વં વાક્યેન બાધમાન આહ-સર્વેષામેવેતિ ।

સર્વેષામેવ મન્ત્રાણામેષ સાધારણઃ ક્રમઃ ॥
અત્ર રામોઽનન્તરૂપસ્તેજસા વહ્નિના સમઃ ॥ ૫॥

ક્રમઃ - પરિપાટી, પ્રકાર ઇતિ યાવત્ ।

"વિના મન્ત્રેણ ચેત્પૂજા દેવતા ન પ્રસીદતિ"

ઇતિ પૂજાઙ્ગત્વેન પ્રાગીરિતં મન્ત્રમુદ્ધરિષ્યન્ પૂજનીયસ્ય રામસ્ય સ્વરૂપં પરિવારં સ્તુતિં ચરિત્રં ચ ચતુસ્ત્રિંશત્કણ્ડિકાભિરાહ -અત્ર રામૈત્યાદિ, એવમુદ્દેશત ઇત્યન્તમ્ । અત્ર-જડાત્મકે પ્રપઞ્ચે રામઃ-પુરુષઃ સીતયા-પ્રકૃત્યા સહિતો ભાતિ-પ્રકાશતે । અમુમર્થં દૃષ્ટાન્તેન સ્પષ્ટયતિ । દૃષ્ટાન્તપ્રદર્શનપ્રસઞ્જિતપરિચ્છેદં વારયતિ -અનન્તરૂપૈતિ । તસ્યાગ્નીષોમાત્મકત્વમાહ - તેજસેત્યાદિના ચેદિત્યન્તેન । ઇહ સમશબ્દોઽભેદવાચી, નતુ સાદૃશ્યવાચી । એકજાતીયત્વવિવક્ષયા સમાનજાતીયે સમાનજાતીયમિતિ પ્રયોગદર્શનાત્ । અતો વહ્નિના સમો "વહ્ન્યાત્મક ઇત્યર્થઃ । તદેવોપપાદયતિ- તેજસેતિ । તેજોરૂપત્વેનેત્યર્થઃ ॥ ૫॥

સ ત્વનુષ્ણગુવિશ્વશ્ચેદગ્નીષોમાત્મકં જગત્ ॥
ઉત્પન્નં સીતયા ભાતિ ચન્દ્રશ્ચન્દ્રિકા યથા ॥ ૬॥

તુશબ્દોઽવધારણે । યો વહ્નિરૂપઃ સ એવેત્યર્થઃ । અનુષ્ણગુરૂપઃ, અનુષ્ણાઃ-શીતા ગાવઃ-કિરણા યસ્ય સોઽનુષ્ણગુઃ સોમઃ, સુધાત્મક ઇત્યર્થઃ । રામેઽધ્યસ્તવિશ્વસ્ય રામાદ્ભેદાભાવમભિપ્રેત્યાહ - વિશ્વ ઇતિ । એવમગ્નીષોમાત્મકશ્ચેત્તર્હિ અવશ્યં તતો રામાદુત્પન્નં જગદગ્નીષોમાત્મકં ભવિતુમર્હતીત્યાહ - ચેદિત્યાદિના ॥ ૬॥

પ્રકૃત્યા સીતયા સહિતત્વં પ્રાગીરિતમનૂદ્યાઽપૂર્વં ગુણાન્તરં વિધત્તે-શ્યામૈત્યાદિના ।

પ્રકૃત્યા સહિતઃ શ્યામઃ પીતવાસા જટાધરઃ ॥
દ્વિભુજઃ કુણ્ડલી રત્નમાલી ધીરો ધનુર્ધરઃ ॥ ૭॥
પ્રસન્નવદનો જેતા ધૃષ્ટ્યષ્ટકવિભૂષિતઃ ॥
પ્રકૃત્યા પરમેશ્વર્યા જગદ્યોન્યાઽઙ્કિતાઙ્કભૃત્ ॥ ૮॥
હેમાભયા દ્વિભુજયા સર્વાલઙ્કારયા ચિતા ॥
શ્લિષ્ટઃ કમલધારિણ્યા પુષ્ટઃ કોસલજાઽઽત્મજઃ ॥ ૯॥

ધૃષ્ટ્યષ્ટકેતિ -ધૃષ્ટિપ્રભૃતયોઽષ્ટૌ મન્ત્રિણઃ પરિવારત્વેન વક્ષ્યમાણાઃ, તૈર્વિભૂષિત ઇત્યર્થઃ । પૂર્વં સીતાસાહિત્યમાત્રમુક્તમ્, સમ્પ્રતિ તામપૂર્વેણ વિશેષણેન વિશેષયન્ રામસ્ય પ્રાગનુક્તમેવ તદ્વિશિષ્ટપ્રદેશત્વમાહ - પ્રકૃત્યેતિ । અત્રાઽઙ્કશબ્દો વામોઙ્કપરઃ । ચિતા - ચિદ્રૂપયેત્યર્થઃ । પુષ્ટઃ - તદાલિઙ્ગનાદેવાઽઽનન્દતુન્દિલ ઇત્યર્થઃ । કોસલજા-કૌસલ્યા તદાત્મજઃ-તત્પુત્રો રામ ઇત્યર્થઃ ॥ ૭-૯॥

દક્ષિણે લક્ષ્મણેનાઽથ સધનુષ્પાણિના પુનઃ ॥

હેમાભેનાઽનુજેનૈવ તદા કોણત્રયં ભવેત્ ॥ ૧૦॥

સધનુષ્પાણિના-ધનુષા સહ વર્તત ઇતિ સધનુઃ પાણિર્યસ્ય તેન । અનુજેનૈવેત્યેવકારઃ સમુચ્ચયે । તદેતિ - યદા શ્રીરામસીતાલક્ષ્મણાસ્ત્રયો નિર્દિષ્ટાઃ, તદાઽઽશ્રયત્વેન કોણત્રયં-ત્રિકોણં ભવેત્ । ત્રિકોણસ્ય યોન્યાકારતયા જગત્કારણતા સૂચિતા ભવતિ । નચ રામસ્ય જગત્કારણતામુક્ત્વા સમ્પ્રતિ ત્રિકોણસ્ય તથાત્વોક્તૌ વિરોધ ઇતિ વાચ્યમ્, ત્રિકોણસ્ય યન્ત્રાન્તર્ગતત્વેન શ્રીરામશરીરત્વાત્ । નહિ દેવદત્તાદેશ્ચેતનસ્ય પુત્રાદિકારણત્વોક્તૌ તચ્છરીરસ્ય તત્કારણતા વિરુધ્યતે ॥ ૧૦॥

રામસ્યેવ લક્ષ્મણસ્યાપિ પૂજાઙ્ગમન્ત્રોઽસ્તીત્યાહ -તથૈવેતિ ।

તથૈવ તસ્ય મન્ત્રશ્ચ યશ્ચાઽણુશ્ચ સ્વઙેઽન્તયા ॥

એવં ત્રિકોણરૂપં સ્યાત્ તં દેવા યે સમાયયુઃ ॥ ૧૧॥

યથા રામસ્ય મન્ત્રસ્તથૈવ લક્ષ્મણસ્ય મન્ત્રોઽસ્તીત્યન્વયઃ । લક્ષ્મણમન્ત્રમુદ્ધરતિ-યશ્ચેતિ । ચકારો ભિન્નક્રમઃ, સચ ક્રમો જ્ઞાપયિષ્યતે । યોઽણુઃ-યો મન્ત્રો લક્ષ્મણસમ્બન્ધી, સ્વઙેઽન્તયાસ્વશબ્દેન સ્વબીજનામની પરામૃશ્યેતે, ઙે ઇતિ ચતુર્થ્યેકવચનમ્, અન્તશબ્દોઽત્ર ભાવપ્રધાનઃ, સ્વબીજનામચતુર્થ્યન્તત્વેન । પ્રથમચકારાન્નમોઽન્તત્વેન, જ્ઞાતવ્ય ઇતિ શેષઃ । દ્વિતીયચકારેણ શ્રીબીજપૂર્વકો નામચતુર્થીકો વહ્નિજાયાન્તઃ સીતામન્ત્રોઽપિ સઞ્ચીયતે । એવં રામાધિષ્ઠિતં ત્રિકોણમુપપાદ્ય નિગમયતિ - એવમિતિ । યે ઇન્દ્રાદયો રાવણપીડિતાસ્તે ત્રિકોણાધિષ્ઠાતારં નારાયણં શરણં પ્રાપુરિત્યાહ -તં દેવાઇતિ ॥ ૧૧॥

સ્તુત્યા વિના ન પ્રસીદતિ પ્રભુરિત્યભિપ્રેત્યાહ - સ્તુતિમિતિ ।

સ્તુતિં ચક્રુશ્ચ જગતઃ પતિં કલ્પતરૌ સ્થિતમ્ ॥

કામરૂપાય રામાય નમો માયામયાય ચ ॥ ૧૨॥

કલ્પતરૌ સ્થિતં - કલ્પવૃક્ષસ્યાધઃસ્થિતમિત્યર્થઃ । કામરૂપાયેતિ, સ્વેચ્છારૂપાયેત્યર્થઃ । માયામયાય - ત્રિગુણાત્મકપ્રકૃતિપ્રચુરાય, માયાયાસ્ત્રિગુણાત્મિકાયા આમયાય-રોગરૂપાય, રોગવદ્વિઘાતકાયેત્યર્થઃ । સહિ સાક્ષાત્કૃતઃ સ્વમાયાં સંહરતિ ॥ ૧૨॥

નમો વેદાદિરૂપાય ૐકારાય નમો નમઃ ॥

રમાધરાય રામાય શ્રીરામાયાઽઽત્મમૂર્તયે ॥ ૧૩॥

વેદાદિરૂપાય, વેદાનાં-ઋગાદીનાં કારણાત્મને । નત્વેતેષાં પૌરુષેયત્વમાશઙ્કનીયમ્, નિશ્વાસન્યાયેન તેષાં તત આવિર્ભાવાઙ્ગીકારાત્ । અત એવ શ્રુતિઃ - “અસ્ય મહતો ભૂતસ્ય નિશ્વસિતમેતદ્યગૃગ્વેદ” ઇત્યાદિ । ભટ્ટવાદા અપિ -

“યત્નતઃ પ્રતિષેધ્યા નઃ પુરુષાણાં સ્વતન્ત્રતા”

ઇતિ । વેદાદિરૂપાય ૐકારાત્મકાયેતિ ન વ્યાખ્યાનં સુન્દરમ્, ૐકારાયેત્યનન્તરમેવોક્તત્વાત્ । રમાધરાય, રમા-લક્ષ્મી । સીતા તસ્યા વામાઙ્કે ધરણાત્ ધરાય શ્રીરામાય, શ્રિયં-સીતાં રમયતીતિ શ્રીરામસ્તસ્મૈ । આત્મમૂર્તયે ઇત્યનેન આત્મરૂપતા વ્યાવર્ત્યતે ॥ ૧૩॥

જાનકીદેહભૂષાય રક્ષોઘ્નાય શુભાઙ્ગિને ॥

ભદ્રાય રઘુવીરાય દશાસ્યાઽન્તકરૂપિણે ॥ ૧૪॥

જાનકીદેહભૂષાય, જાનકી-સીતા દેહભૂષા-શરીરાલઙ્કારો યસ્ય તસ્મૈ, જાનકીદેહઃ સીતાશરીરં ભૂષા યસ્યેતિ વા । ભદ્રાયમઙ્ગલાય ॥ ૧૪॥

રામભદ્ર! મહેષ્વાસ! રઘુવીર! નૃપોત્તમ! ॥
ભો! દશાસ્યાન્તકાઽસ્માકં રક્ષ દેહિ શ્રિયં ચ તે ॥ ૧૫॥
ત્વમીશ્વર્યા દાપયાઽથ સમ્પ્રત્યાશ્વરિમારણમ્ ॥
કુર્વિતિ સ્તુત્ય દેવાદ્યાસ્તેન સાર્ધં સુખં સ્થિતાઃ ॥ ૧૬॥

અસ્માકં રક્ષેતિ, અસ્માન્ રક્ષેત્યર્થઃ । કર્મણિ ષષ્ઠીત્વમ્ । શ્રિયં-સમ્પદં ચ દેહીતિ । "તે" ઇતિ તચ્છબ્દસ્ય સ્ત્રીલિઙ્ગસ્ય દ્વિવચનમ્ । ઈશ્વર્યા-સીતયા તે-રક્ષાશ્રિયૌ દાપય । અથેતિ સમુચ્ચયે, અપિચેત્યર્થઃ । "સમ્પ્રતિ-વર્તમાને રાવણોપદ્રવકાલે આશુ-શીઘ્રં અરેઃ-શત્રો રાવણસ્ય મારણં કુરુ" ઇતિ દેવાદ્યાઃ આદિશબ્દેન અન્યા અપિ દેવયોનયઃ સ્તુત્ય-સ્તુતિં કૃત્વા । સમાસાભાવેઽપિ છાન્દસોલ્પપ્ । તેન સાર્ધં- પરમેશ્વરેણ સહૈવ તત્પરા ભૂત્વા સુખં-રાવણજનિતં દુઃખમનનુસન્દધાનાઃ સ્થિતાઃ ॥ ૧૫॥૧૬॥

સ્તુવન્ત્યેવં હિ ઋષયસ્તદા રાવણ આસુરઃ ॥
રામપત્નીં વનસ્થાં યઃ સ્વનિવૃત્ત્યર્થમાદદે ॥ ૧૭॥
સ રાવણ ઇતિ ખ્યાતો યદ્વા રાવાચ્ચ રાવણઃ ॥
તદ્વ્યાજેનેક્ષિતું સીતાં રામો લક્ષ્મણ એવ ચ ॥ ૧૮॥
વિચેરતુસ્તદા ભૂમૌ દેવીં સન્દૃશ્ય ચાસુરમ્ ॥
હત્વા કબન્ધં શબરીં ગત્વા તસ્યાજ્ઞયા તયા ॥ ૧૯॥

એવં-દેવાદિવત્ ઋષયો-વસિષ્ઠાદ્યા અપિ સ્તુવન્તિ-અસ્તુવન્ । લકારવ્યત્યયશ્છાન્દસઃ । એવં દેવાદિભિઃ સ્તુતૌ કૃતાયાં પરિતુષ્ટેન ભગવતા પ્રાચીનેષુ બહુષ્વપરાધેષુ સત્સ્વપિ નૂતનમપરાધમન્તરેણ હન્તુમનૌચિત્યમિવ ભવતીતિ નૂતનાપરાધકરણાય પ્રેરિતો દશાસ્યઃ સીતાં જહાર ઇતિ વદન્નેવ રાવણપદનિરુક્તિં દ્વિધા કરોતિ-તદા રાવણૈતિ । અસુર એવ આસુરો-રાક્ષસઃ । રામપત્નીશબ્દાત્ "રા" ઇતિ વર્ણં, વનસ્થાત્ "વન" ઇતિ વર્ણદ્વયં ગૃહીત્વા રાવણશબ્દો નિષ્પન્નઃ । રાવાત્-રાવણાત્, જગતો રોદનાદિત્યર્થઃ । તદ્વ્યાજેન-હૃતસીતાન્વેષણમિષેણ તદા-સીતાહરણોત્તરકાલે રામો લક્ષ્મણશ્ચ વિચેરતુઃ । કિં કર્તું, સીતાં દેવીમીક્ષિતુમ્ । એવકારઃ સહાયાન્તરવ્યવચ્છેદનાર્થઃ । કબન્ધમસુરં સન્દૃશ્ય હત્વા તસ્ય - કબન્ધસ્ય આજ્ઞયા - વાચા નતુ પ્રસિદ્ધયાઽઽદેશરૂપયા । અલ્પજ્ઞતયા નીચસ્ય કબન્ધસ્ય સર્વેશ્વરૌતૌ પ્રતિ તદયોગાત્ । શબરીં ગત્વા તયા-શબર્યા ॥ ૧૭-૧૯॥

પૂજિતાવીરપુત્રેણ ભક્તેન ચ કપીશ્વરમ્ ॥
આહૂય શંસતા સર્વમાદ્યન્તં રામલક્ષ્મણૌ ॥ ૨૦॥

પૂજિતૌ રામલક્ષ્મણૌ ભક્તેન- સ્વકીયભક્તિભાજા ઈરપુત્રેણ, ઈરો- વાયુઃ "ઈરયતિ પ્રેરયતી'તિ વ્યુત્પત્તેઃ, તસ્ય પુત્રેણ- હનુમતા દ્વારભૂતેન કપીનામીશ્વરં- સુગ્રીવમાહૂય સર્વં વૃત્તાન્તં આદ્યન્તમ્, અત્ર આઙ્ અનુસન્ધાતવ્યઃ, આદ્યન્તવિભિવ્યાપ્યેત્યર્થઃ । શંસતામ્- અશંસતામ્, ઉક્તવન્તૌ । છાન્દસોઽઽગમાભાવઃ ॥ ૨૦॥

સ તુ રામે શઙ્કિતઃ સન્ પ્રત્યયાર્થં ચ દુન્દુભેઃ ॥
વિગ્રહં દર્શયામાસ યો રામસ્તમચિક્ષિપત્ ॥ ૨૧॥

સ તુ-કપીશ્વરઃ રામે વિષયે શઙ્કિતઃ - “વાલિવધરૂપં મહત્કાર્યં કર્તું ક્ષમો નવે’તિ સઞ્જાતશઙ્કઃ સન્ પ્રત્યયાર્થં ચ જિઘાંસિતસ્ય વાલિનોઽશક્યવધત્વે પ્રતીતિં શ્રીરામસ્ય ચેતસ્યુત્પાદયિતું અન્યાઽનિષ્પેષણીયં વાલિના નિષ્પિષ્ટં દુન્દુભેર્દૈત્યસ્ય વિગ્રહં- શરીરમસ્થિકૂપવિશેષં મહાશૈલપ્રાયં દર્શયામાસ । સ ઇત્યધ્યાહર્તવ્યમ્, તથાચ યો રામઃ સ તં-દુન્દુભિવિગ્રહં અચિક્ષિપત્-અક્ષિપત્, દશયોજનમિત્યર્થઃ । અત્ર ણિચ્ અવિવક્ષિતઃ, સ્વાર્થિકો વા ચૌરાદિકત્વાત્ ॥ ૨૧॥

સપ્ત તાલાન્ વિભિદ્યાશુ મોદતે રાઘવસ્તદા ॥
તેન હૃષ્ટઃ કપીન્દ્રોઽસૌ સ રામસ્તસ્ય પત્તનમ્ ॥ ૨૨॥

મોદતે-અમોદત । ભૂતાર્થે લટ્ છાન્દસઃ । તદાતાલભેદાઽનન્તરકાલે તેન-શરીરક્ષેપાદિના તસ્ય-વાલિનઃ પત્તનં-નગરં કિષ્કિન્ધોપલક્ષિતમ્ ॥ ૨૨॥

જગામાઽગર્જદનુજો વાલિનો વેગતો ગૃહાત્ ॥
વાલી તદા નિર્જગામ તં વાલિનમથાહવે ॥ ૨૩॥

અનુજઃ સુગ્રીવઃ ॥ ૨૩॥

નિહત્ય રાઘવો રાજ્યે સુગ્રીવં સ્થાપયેત્તતઃ ॥
હરીનાહૂય સુગ્રીવસ્ત્વાહ ચાઽઽશાવિદોઽધુના ॥ ૨૪॥
આદાય મૈથિલીમદ્ય દદતાઽઽશ્વાશુ ગચ્છત ॥
તતસ્તતાર હનુમાનબ્ધિં લઙ્કાં સમાયયૌ ॥ ૨૫॥

તતો-વાલિવધાનન્તરં સ્થાપયેત્- અસ્થાપયત્ । લુઙિ કર્તવ્યે લિઙ્ છાન્દસઃ । સુગ્રીવસ્તુ હરીન્-વાનરાન્ આહૂય આહ ચ-ઉક્તવાન્ । કિમાહ આશાવિદો-દિશાં જ્ઞાતારો વાનરાઃ! અધુના- સમ્પ્રત્યેવ અસ્મિન્નેવ ક્ષણે, એકસ્મિન્ ક્ષણે નાનાદિગ્ગમનસીતાદર્શનતદાનયનાદિ ન ઘટત ઇત્યાહ- આશ્વિતિ । આશ્વાશુ-શીઘ્રં શીઘ્રમ્ । વીપ્સા વેગાતિશયપ્રકાશનાર્થા ॥ ૨૪-૨૫॥

સીતાં દૃષ્ટ્વાઽસુરાન્ હત્વા પુરં દગ્ધ્વા તથા સ્વયમ્ ॥
આગત્ય રામેણ સહ ન્યવેદયત તત્ત્વતઃ ॥ ૨૬॥

અસુરાન્-રાક્ષસાદીન્ તત્ત્વતો-યાથાતથ્યેન ॥ ૨૬॥

તદા રામઃ ક્રોધરૂપી તાનાહૂયાઽથ વાનરાન્ ॥
તૈઃ સાર્ધમાદાયાસ્ત્રાંશ્ચ પુરીં લઙ્કાં સમાયયૌ ॥ ૨૭॥

ક્રોધરૂપી, કોધેન રાવણદુર્વિનયશ્રવણજનિતેન રૂપી- સ્વાભાવિકાદ્રૂપાદ્વિપરીતરૂપવિશિષ્ટઃ ॥ ૨૭॥

તાં દૃષ્ટ્વા તદધીશેન સાર્ધં યુદ્ધમકારયત્ ॥
ઘટશ્રોત્રસહસ્રાક્ષજિદ્ભ્યાં યુક્તં તમાહવે ॥ ૨૮॥

તાં-પુરીમ્, અકારયત્-અકરોત્, ણિચોઽવિવક્ષિતત્વાત્ । અથવા નરૈરકારયદિત્યદોષઃ । ઘટશ્રોત્રઃ-કુમ્ભકર્ણઃ સહસ્રાક્ષજિત્-ઇન્દ્રજિત્ તં-રાવણમ્ ॥ ૨૮॥

હત્વા, વિભીષણં તત્ર સ્થાપ્યાઽથ જનકાત્મજામ્ ॥
આદયાઽઙ્કસ્થિતાં કૃત્વા સ્વપુરં તૈર્જગામ હ ॥ ૨૯॥

તત્ર-રાવણસ્થાને સ્થાપ્ય-સ્થાપયિત્વા । સમાસાભાવેઽપિ લ્યપ્ છાન્દસઃ । અઙ્કસ્થિતાં કૃત્વા, પાતિવ્રત્યાઽઽવેદકેન દુષ્કરેણાગ્નિપ્રવેશકર્મણા ભગવતઃ પરિતોષાત્ । તૈરિતિ સહાર્થે તૃતીયા, વિભીષણસુગ્રીવાદિભિઃ સાકમિત્યર્થઃ ॥ ૨૯ ॥

તતઃ સિંહાસનસ્થઃ સન્ દ્વિભુજો રઘુનન્દનઃ ॥
ધનુર્ધરઃ પ્રસન્નાત્મા સર્વાભરણભૂષિતઃ ॥ ૩૦ ॥

સિંહાસનસ્થઃ, ભરતેન રાજ્યસમર્પણાત્ । ધનુર્ધરઃ-ધનુરુપલક્ષિતઃ, નતુ ધનુર્વિશિષ્ટ એવ । દ્વયોર્ભુજયોર્વસ્ત્વન્તરાઽવરોધસ્ય વક્ષ્યમાણત્વાત્ ॥ ૩૦ ॥

મુદ્રાં જ્ઞાનમયીં યામે વામે તેજઃપ્રકાશનમ્ ॥
ધૃત્વા વ્યાખ્યાનનિરતશ્ચિન્મયઃ પરમેશ્વરઃ ॥ ૩૧ ॥

મુદ્રામિતિ । યામે-દક્ષિણે ભુજે જ્ઞાનમુદ્રાં ધૃત્વા । "અઙ્ગુલિત્રયં પ્રસાર્ય હૃદયાભિમુખમવસ્થાપિતયા તર્જન્યાઽઙ્ગુષ્ઠસંયોગો" જ્ઞાનમુદ્રા । વામે ભુજે તેજઃપ્રકાશનં-બલપ્રકટનં ધૃત્વા, વામજાનુમણ્ડલં વામભુજયા બલેનાઽઽપીડ્યેત્યર્થઃ ॥ ૩૧ ॥

ઉદગ્દક્ષિણયોઃ સ્વસ્ય શત્રુઘ્નભરતૌ ધૃતઃ ॥
હનુમન્તં ચ શ્રોતારમગ્રતઃ સ્યાત્ત્રિકોણગમ્ ॥ ૩૨ ॥

ઉદગ્દક્ષિણયોઃ-વામદક્ષિણભાગયોઃ ધૃતઃ-ધારિતવાન્ । ધૃધાતોર્ધારણાર્થેઽપિ સ્મરણાત્, "ધૃઙ્ અવસ્થાને ધારણે ચે'તિ । અગ્રતો હનુમન્તં ચ, ધૃતઃ ઇત્યનુષઞ્જનીયમ્ । એવં વક્ષ્યમાણષટ્કોણાવયવભૂતં ત્રિકોણમુપપાદ્યોપસંહરતિ-સ્યાત્ત્રિકોણગમિતિ ॥ ૩૨ ॥

ષટ્કોણાવયવભૂતં ત્રિકોણાન્તરં નિરૂપયતિ-ભરતાદ્યૈતિ ।

ભરતાઽધસ્તુ સુગ્રીવં શત્રુઘ્નાઽધો વિભીષણમ્ ॥
પશ્ચિમે લક્ષ્મણં ધૃત્વા ધૃતચ્છત્રં સચામરમ્ ॥ ૩૩ ॥
તદધસ્તૌ તાલવૃન્તકરૌ ત્ર્યસ્રં પુનર્ભવેત્ ।
એવં ષટ્કોણમાદૌ સ્વદીર્ઘાઙ્ગૈરેષ સંયુતઃ ॥ ૩૪ ॥
દ્વિતીયં વાસુદેવાદ્યૈરાગ્નેયાદિષુ સંયુતમ્ ॥
તૃતીયં વાયુસૂનું ચ સુગ્રીવં ભરતં તથા ॥ ૩૫ ॥
વિભીષણં લક્ષ્મણં ચ અઙ્ગદં ચાઽરિમર્દનમ્ ॥
જામ્બવન્તં ચ તૈર્યુક્તસ્તતો ધૃષ્ટિર્જયન્તકઃ ॥ ૩૬ ॥
વિજયશ્ચ સુરાષ્ટ્રશ્ચ રાષ્ટ્રવર્ધન એવ ચ ॥
અકોપો ધર્મપાલશ્ચ સુમન્ત્રસ્ત્વેભિરાવૃતઃ ॥ ૩૭ ॥

તદધઃ-ભરતશત્રુઘ્નયોરધઃ તૌ-સુગ્રીવવિભીષણૌ તાલવૃન્તકરૌ-વ્યજનહસ્તૌ । ત્ર્યસ્રં પુનરિતિ, અન્યત્ત્રિકોણમિત્યર્થઃ । એવં ત્રિકોણદ્વયસ્ય મેલને ષટ્કોણં, ભવેદિત્યનુષજ્યતે । એવં શ્રીરામમન્ત્રોદ્દિધીર્ષયા ષટ્કોણયન્ત્રૈકદેશો નિરૂપિતઃ । અગ્રે ચ એતમેવૈકદેશમનૂદ્ય યન્ત્રં નિઃશેષતયા વર્તતે । તત્ર પૂજ્યસ્ય રામસ્ય પૌર્વાપર્યેણાઽઙ્ગાદ્યાવરણાન્યાહ-આદાવિત્યાદિના । સ્વદીર્ઘાઙ્ગૈરિતિ, સ્વં-સ્વકીયં બીજં "રેફ આકારો બિન્દુ'રિત્યક્ષરસમુદાયાત્મકં, તેન

યોજિતાનિ યદ્દીર્ઘાણ્યક્ષરાણિ “આં ઈં ઊં ઐં ઔં અઃ” ઇત્યેવંરૂપાણિ તૈર્યુક્તાનિ અઙ્ગાનિ હૃદયાદીનિ તૈઃ સંયુતઃ શ્રીરામઃ પૂજ્ય ઇતિ વક્ષ્યમાણેન સમ્બધ્યતે । અઙ્ગાનાં પૂજ્યસ્થાનક્રમઃ શ્રીશઙ્કરાચાર્યૈરભિહિતઃ-
હૃદયં સશિરસ્તથા શિખાં કવચં ચેત્યનલાદિદિક્ષુ તુ ।
પુરતો નયનત્રયં ક્રમાત્પુનરસ્ત્રં ચ સમર્ચયેત્ક્રમાત્ ॥
અત એવ વક્ષ્યમાણાગ્નેયાદિ સિંહાવલોકનન્યાયેનાત્રાપિ સમ્બધ્યતે । અત્ર યદ્યપિ વાસુદેવાદ્યાવરણં દ્વિતીયમુક્તમ્, તથાપિ આત્માદિચતુષ્ટયં સશક્તિકં દ્વિતીયં બોધ્યમ્ । અગસ્તિસંહિતાયાં તસ્યૈવ દ્વિતીયાવરણત્વેનોક્તત્વાત્ ।
આત્માન્તરાત્મપરમજ્ઞાનાત્મભ્યોઽગ્નિતઃ ક્રમાત્ ।
નિવૃત્ત્યૈ ચ પ્રતિષ્ઠાયૈ વિદ્યાયૈ તે નમામ્યહમ્ ।
શાન્ત્યૈ ચાત્માદિશક્તિત્વે સ્થિત્યૈતદ્રૂપિણે નમઃ ॥
ઇતિ । નચાસ્યાર્થસ્યોપપાદકાભાવઃ, ગુણોપસંહારન્યાયસ્યૈવ તથાત્વાત્ । નન્વેવં વાસુદેવાદીનાં તૃતીયાવરણત્વે દ્વિતીયશબ્દવિરોધઃ । મૈવમ્, તૃતીયેઽપિ દ્વિતીયાપેક્ષયા દ્વિતીયશબ્દોપપત્તેઃ । એવં ચતુર્થેઽપિ હનુમદાદ્યાવરણત્વે તૃતીયશબ્દોપપત્તિઃ । નનુ સ્મૃતિસ્થમતિરિક્તમઙ્ગં શ્રુતેર્ન્યૂનોક્તિત્વપરિહારાય કથમુપસંહિયતે? શ્રુત્યપેક્ષયા સ્મૃતેર્દુર્બલત્વાત્ । મૈવમ્, સ્મૃત્યનુમિતશ્રુતિસ્થસ્યૈવોપસંહ્રિયમાણતયાઽસ્યાક્ષેપસ્યાઽનવકાશત્વાત્ । નનુ સ્મૃત્યનુમિતાઽપિ શ્રુતિઃ પ્રત્યક્ષશ્રુતિતો દુર્બલૈવેતિ ચેત્સત્યમ્, તથાપિ શ્રુત્યભિહિતમર્થમનવબાધમાનૈવ તત્સ્મૃતિસ્તદનુમિતશ્રુતિર્વા ગુણોપસંહારન્યાયેન સહાયાર્થશ્રુતૌ નિવિશમાનાઽનુમન્યેત । કો દોષઃ । વાસુદેવાદ્યૈરિત્યાદિશબ્દેન સઙ્કર્ષણપ્રદ્યુમ્નાઽનિરુદ્ધાઃ શ્રીશાન્તિપ્રીતિરતયશ્ચ ગૃહ્યન્તે । અરિમર્દનં-શત્રુઘ્નં તૈઃ-વાયુસૂન્વાદિભિઃ । પઞ્ચમાવણમાહ-તતો ધૃષ્ટિરિતિ ॥ ૩૩-૩૭॥
ષષ્ઠમાહ -તતઃ સહસ્રેતિ ।
તતઃ સહસ્રદૃગ્વન્હિધર્મરક્ષોવરુણાઽનિલાઃ ॥
ઇન્દ્વીશધાત્રનન્તાશ્ચ દશભિસ્ત્વેભિરાવૃતઃ ॥ ૩૮॥
સહસ્રદૃક્-ઇન્દ્રઃ રક્ષો-નિરૃતિઃ, અક્ષરાધિક્યં છાન્દસમ્ । અનિલો-વાયુઃ ઇન્દુઃ-સોમઃ ધાતા-બ્રહ્મા અનન્તઃ-શેષઃ ॥ ૩૮॥
સપ્તમમાહ -બહિરિતિ ।
બહિસ્તદાયુધૈઃ પૂજ્યો નીલાદિભિરલઙ્કૃતઃ ॥
વસિષ્ઠવામદેવાદિમુનિભિઃ સમુપાસિતઃ ॥ ૩૯॥
તદાયુધૈઃ-ઇન્દ્રાદ્યસ્ત્રૈર્વજ્રાદિભિઃ । અષ્ટમન્નીલાદિભિરિતિ । નવમં વસિષ્ઠેતિ । ધ્રુવાદ્યાવરણાન્યસ્યોદ્ધરિષ્યમાણસ્યાનુરોધેન બોધ્યાનિ । તત્ર દ્વાત્રિંશદ્દલે ધ્રુવાદિધ્યાનસ્ય વિહિત્વાત્ । એષામાવરણાનાં સ્થાનનિયમઃ સમ્પ્રદાયાનુસારાદવગન્તવ્યઃ ॥ ૩૯॥
ઉક્તમુપસંહરતિ-એવમિતિ ।
એવમુદ્દેશતઃ પ્રોક્તં નિર્દેશસ્તસ્ય ચાધુના ॥
ત્રિરેખાપુટમાલિખ્ય મધ્યે તારદ્વયં લિખેત્ ॥ ૪૦॥

યન્ત્રૈકદેશસ્વરૂપં ઉદ્દેશતઃ- ‘ષટ્કોણ’મિતિ નામકીર્તનેન પ્રોક્તમ્ । યન્ત્રવિશેષકથનં પ્રતિજાનીતે-નિર્દેશૈતિ । ક્રિયત ઇતિ શેષઃ । ઇદાનીં યન્ત્રવિશેષં સાઽક્ષરવિન્યાસમુદ્ધરિષ્યન્મુક્તં ષટ્કોણલક્ષણં યન્ત્રૈકદેશમનૂદ્ય તત્રાક્ષરાદિલેખનં વિધત્તે-ત્રિરેખેતિ । ત્રિરેખાપુટં ષટ્કોણમાલિખ્ય પૂર્વોક્તરીત્યા, તારઃ-પ્રણવઃ ॥ ૪૦॥

તન્મધ્યે બીજમાલિખ્ય તદધઃ સાધ્યમાલિખેત્ ॥

દ્વિતીયાન્તં ચ તસ્યોર્ધ્વં ષષ્ઠ્યન્તં સાધકં તથા ॥ ૪૧॥

તન્મધ્યે બીજમ્, તદધો-બીજાધોભાગે સાધ્યં-સાધનીયમર્થં દ્વિતીયાન્તં-દ્વિતીયવિભક્ત્યન્તમ્, તસ્ય-બીજસ્ય ઊર્ધ્વં-ઉપરિભાગેષષ્ઠ્યન્તમ્ ॥ ૪૧॥

કુરુદ્વયં ચ તત્પાર્શ્વે લિખેદ્બીજાન્તરે રમામ્ ॥

તત્સર્વં પ્રણવાભ્યાં ચ વેષ્ટયેચ્છુદ્ધબુદ્ધિમાન્ ॥ ૪૨॥

તત્પાર્શ્વે, બીજસ્ય પાર્શ્વયોરિત્યર્થઃ । બીજાન્તરે-તસ્યૈવ બીજસ્યોદરે રમાં- શ્રીબીજં તત્સર્વં સાધ્યાદિસહિતં બીજં પ્રણવાભ્યાં પરસ્પરસમ્મુખાભ્યામ્ ॥ ૪૨॥

દીર્ઘભાજિ ષડસ્રેષુ લિખેદ્બીજં હૃદાદિભિઃ ॥

કોણપાર્શ્વે રમામાયે તદગ્રેઽનઙ્ગમાલિખેત્ ॥ ૪૩॥

દીર્ઘભાજિ-આકારાદિષડ્દીર્ઘયુક્તં હૃદયાદિભિઃ-હૃદય-શિરઃશિખાકવચનેત્રાસ્ત્રૈઃ । તત્રાસ્ત્રં પૃષ્ઠતઃ, નતુ ચતુર્દિશં પૂજાયામિવ । રમામાયે-શ્રીબીજભુવનેશ્વરીબીજે તદગ્રે- કોણાગ્રે અનઙ્ગં-કામબીજમ્ ॥ ૪૩॥

ક્રોધં કોણાગ્રાન્તરેષુ લિખેન્મન્ત્ર્યભિતો ગિરમ્ ॥

વૃત્તત્રયં સાઽષ્ટપત્રં સરોજે વિલિખેત્ સ્વરાન્ ॥ ૪૪॥

કેસરે ચાષ્ટપત્રે ચ વર્ગાષ્ટકમથાઽઽલિખેત્ ॥

તેષુ માલામનોર્વર્ણાન્ વિલિખેદૂર્મિસઙ્ખ્યયા ॥ ૪૫॥

ક્રોધં- કવચબીજં કોણાગ્રાન્તરેષુ, કોણાનાં યાન્યગ્રાણિ તેષામન્તરેષુ-આભ્યન્તરભાગેષુ લિખ્ય-લિખિત્વા । અસમાસેઽપિ છાન્દસો લ્યપ્ । અભિતઃ-સર્વતઃ-ગિરં- વાગ્ભવં વૃત્તત્રયં-તિસ્રો વર્તુલાકારા રેખાઃ સાષ્ટપત્રં-અષ્ટદલસહિતમ્ । એતચ્ચ વૃત્તત્રયસ્ય વિશેષણમ્, વૃત્તત્રયં સાષ્ટપત્રં લિખેદિત્યર્થઃ । સરોજે-અષ્ટદલે કમલે કેસરે-કેસરસ્થાને સ્વરાન્ અકારાદીન્ પૂર્વક્રમેણ પ્રતિદલમૂલં યુગ્મશો લિખેત્ । અષ્ટપત્રે-અષ્ટાનાં પત્રાણાં મધ્યે વર્ગાષ્ટકં-કચટતપયશલવર્ગાનષ્ટૌ લિખેત્ । તેષ્વપિ-પત્રેષુ માલામનોર્વર્ણાન્ લિખેત્ ઊર્મિસઙ્ખ્યયા-ષડ્ગણનયા ॥ ૪૪-૪૫॥

અન્તે પઞ્ચાઽક્ષરાનેવં પુનરષ્ટદલં લિખેત્ ॥

તેષુ નારાયણાઽષ્ટાર્ણં લિખ્ય તત્કેસરે રમામ્ ॥ ૪૬॥

અન્તે-અન્તિમદલે પઞ્ચાક્ષરાન્ લિખેત્ । એવં-અનેન પ્રકારેણ પુનરષ્ટદલમ્, અષ્ટપત્રાન્તરમિત્યર્થઃ । તેષુ-અષ્ટસુ પત્રેષુ નારાયણાષ્ટાર્ણં યથાસઙ્ખ્યં લિખ્ય, લિખિત્વેત્યર્થઃ । તત્કેસરે-દ્વિતીયાષ્ટપત્રકેસરસ્થાને રમાં-શ્રીબીજં કેસરવદેવ નૈરન્તર્યેણ લિખેત્ ॥ ૪૬॥

તદ્બહિર્દ્વાદશદલં વિલિખેદ્ દ્વાદશાક્ષરમ્ ॥

તથોં નમો ભગવતે વાસુદેવાય ઇત્યયમ્ ॥ ૪૭॥

તદ્બહિઃ-દ્વિતીયાષ્ટદલાદ્બહિઃ દ્વાદશદલં વિલિખેત્ દ્વાદશાક્ષરં - ૐ નમો ભગવતે પદમાભાષ્ય વાસુદેવાય ઇત્યપિ । દ્વાદશાક્ષરમુદ્ધરતિ-તથોમિતિ ॥ ૪૭॥

આદિક્ષાન્તાન્ કેસરેષુ વૃત્તાકારેણ સંલિખેત્ ॥

તદ્બહિઃ ષોડશદલં લિખેત્તત્કેસરે હ્રિયમ્ ॥ ૪૮॥

આદિક્ષાન્તાન્ ચતુઃસઙ્ખ્યયા પ્રતિપત્રં લિખિત્વાઽવશિષ્ટમક્ષરદ્વયમન્ત્યદલે । એવં તદ્બહિઃ-દ્વાદશદલાદ્બહિઃ ષોડશદલં લિખિત્વા વૃત્તાકારેણ કેસરવત્ સમ્યગ્લિખેત્ । તત્કેસરે-ષોડશદલકેસરે હ્રિયં- ભુવનેશ્વરીબીજમ્ ॥ ૪૮॥

વર્માઽસ્ત્રનતિસંયુક્તં દલેષુ દ્વાદશાક્ષરમ્ ॥

તત્સન્ધિષ્વીરજાદીનાં મન્ત્રાન્ મન્ત્રી સમાલિખેત્ ॥ ૪૯॥

વર્મ-હુઙ્કારઃ અસ્ત્રં-ફટ્કારઃ નતિઃ-નમઃશબ્દઃ, તદ્યુક્તં દ્વાદશાક્ષરં ષોડશાક્ષરં ભૂત્વા પ્રતિપત્રમેકૈકાક્ષરક્રમેણ લિખેત્ । તત્સન્ધિષુ-તેષાં ષોડશાનાં દલાનાં સન્ધિમાર્ગેષુ ઈરજાદીનાં, ઈરયતિ પ્રેરયતીતિ ઈરો - વાયુસ્તસ્માજ્જાતઃ ઈરજઃ- હનુમાન્ સ આદિર્યેષાં તે ઈરજાદયઃ તેષાં મન્ત્રાન્-બીજાનિ ॥ ૪૯॥

તાન્યેવ દર્શયતિ-હમિત્યાદિના ।

હં સં ભં વં લં શં જં ચાઽઽલિખેત્સમ્યક્ તતો બહિઃ ॥

દ્વાત્રિંશારં મહાપદ્મં નાદબિન્દુસમાયુતમ્ ॥ ૫૦॥

ચકારાદ્બીજમ્ । લમિતિ લક્ષ્મણબીજાદુપરિતનમ્, ધૃષ્ટ્યાદ્યષ્ટમન્ત્રિણાં ધમિત્યાદિબીજાનિ ચ ગૃહ્યન્તે । સમાલિખેત્, સમ્યક્-સ્પષ્ટતયા આસમન્તાલ્લિખેત્ ।

તત્સન્ધિષ્વિન્દ્રવજ્રાદિવર્ણાન્ મન્ત્રી સમાલિખેત્ ।

તદ્બહિસ્ત્વીરજાદીનાં બીજાન્યાલિખ્ય તત્ત્વવિત્ ॥

ઇતિ પાઠે તસ્ય - ષોડશદલસ્ય બહિઃ-ઈરજાગ્રે હમિત્યાદીનિ બીજાન્યાલિખ્ય તત્સન્ધિષુ-ષોડશદલાનાં સન્ધિષુ ઇન્દ્રવજ્રાદિવર્ણાન્-ઇન્દ્રવર્ણાન્ વજ્રાદીનાં વર્ણાન્ લમિત્યાદીનિ બીજાનિ મન્ત્રી-ઉપાસકઃ સમાલિખેદિતિ યોજ્યમ્ । તત્ત્વવિદિતિ, ગુરોર્લબ્ધભાન ઇત્યર્થઃ । તતો બહિઃ-ષોડશદલાદ્બહિઃ દ્વાત્રિંશારં-દ્વાત્રિંશત્પત્રં મહાપદ્મમ્ । અત્ર ચાષ્ટદલદ્વાદશદલાપેક્ષયા મહત્ત્વમ્, મહામન્ત્રલેખનયોગાદ્વા । નાદઃ - પ્રણવસ્ય ચતુર્થાવયવઃ બિન્દુઃ - પઞ્ચમઃ, તાભ્યાં સમાયુતમિતિ પાઠે નાદબિન્દુસ્થાને માયાદિબીજં લિખેદિત્યર્થઃ ॥ ૫૦॥

વિલિખેન્મન્ત્રરાજાર્ણાંસ્તેષુ મન્ત્રી પ્રયત્નતઃ ॥

ધ્યાયેદષ્ટ વસૂનેકાદશ રુદ્રાંશ્ચ તત્ર વૈ ॥ ૫૧॥

તેષુ-દ્વાત્રિંશત્પત્રેષુ મન્ત્રરાજાર્ણાન્ બિલિખેત્ સમ્યક્ । વસૂન્ - ધ્રુવં ધરં સોમં આપોઽનિલમનલં પ્રત્યૂષં પ્રભાસં ચાષ્ટૌ, રુદ્રાન્-વીરભદ્રં શમ્ભું ગિરિશં અજૈકપાદં અહિર્બુધ્ન્યં પિનાકિનં ભુવનાધીશ્વરં કપાલિનં દિક્પતિં સ્થાણું ભગં એવમેકાદશ રુદ્રાન્ ॥ ૫૧॥

દ્વાદશેનાંશ્ચ ધાતારં વષટ્કારં ચ તદ્બહિઃ ॥

ભૂગૃહં વજ્રશૂલાઢ્યં રેખાત્રયસમન્વિતમ્ ॥ ૫૨॥

આદિત્યાન્-વરુણં સૂર્યં વેદાઙ્ગં ભાનું ઇન્દ્રં રવિઙ્ગભસ્તિમન્તં યમંસ્વર્ણરેતસં વિભાકરં મિત્રં વિષ્ણું દ્વાદશ, ધાતારં ચેતિ દ્વાત્રિંશદ્દેવાન્ ધ્યાયેત્ । દ્વાત્રિંશદ્દલેષુ ધ્યાનપૂર્વકં લિખિત્વા પૂજયેદિત્યર્થઃ । તત્ર નૃસિંહાનુષ્ટુભં રામાનુષ્ટુભં સમ્પ્રદાયાનુરોધેન લેખ્યમિતિ કેચિત્ । તદ્બહિઃ-દ્વાત્રિંશદ્દલાદ્બહિર્ભાગેષુ પુરતો વષટ્કારં પૂજયેત્ । ભૂગૃહં-ચતુરસ્રં રેખાઃ-સત્ત્વરજસ્તમાત્મિકાસ્તાસાં ત્રયમ્ ॥ ૫૨॥

દ્વારોપેતં ચ રાશ્યાદિભૂષિતં ફણિસંયુતમ્ ॥
એવં મણ્ડલમાલિખ્ય તસ્ય દિક્ષુ વિદિક્ષુ ચ ॥ ૫૩॥
નારસિંહં ચ વારાહં લિખેન્મન્ત્રદ્વયં તથા ॥
કૂટરેફાઽનુગ્રહેન્દુનાદશક્ત્યાદિભિર્યુતઃ ॥ ૫૪॥

રાશ્યાદિ, રાશયો મેષાદ્યાઃ । આદિશબ્દેન વારાદિઃ । ફણિસંયુતં, અનન્તઃ વાસુકિઃ તક્ષકઃ કાલપદ્મઃ મહાપદ્મઃ શઙ્ખઃ કુલિકઃ એતૈઃ ફણિભિઃ-સર્પૈઃ સંયુતં તસ્ય-મણ્ડલસ્ય દિક્ષુ-પૂર્વાદિષુ-નારસિંહં-નરસિંહબીજં વિદિક્ષુ-આગ્નેયાદિષુ વારાહં-વરાહબીજમ્ । નરસિંહબીજમુદ્ધરતિ કૂટઃ-ક્ષકારઃ રેફો-રાક્ષરઃ અનુગ્રહ-ઔકારઃ । શ્રીકણ્ઠાદિન્યાસેઽનુગ્રહસ્વરસ્યૌકાર-દેવતાત્વાત્ । ઇન્દુઃ-બિન્દુઃ નાદઃ-પ્રવણસ્યપઞ્ચમોઽવયવઃ શક્તિઃ-ષષ્ઠઃ, આદિશબ્દેન શાન્તાખ્યઃસપ્તમઃ ॥ ૫૪॥

યો નૃસિંહઃ સમાખ્યાતો ગ્રહમારણકર્મણિ ॥
અન્ત્યાધીશવિયદ્બિન્દુનાદૈર્બીજં ચ શૌકરમ્ ॥ ૫૫॥

નૃસિંહઃ સમાખ્યાતઃ- નૃસિંહબીજમુક્તમ્ । ગ્રહેતિ, ગ્રહાણાં-બાલગ્રહાણામ્ । ઉપલક્ષણમેતત્ । અન્યેષાં ભૂતપ્રેતાદીનામપિ મારણં-નિરાકરણં તસ્ય કર્મણિ-વ્યાપારે । અન્ત્યેતિ, અન્ત્યઃ અધીશ-ઊઁકારો યસ્ય સોઽન્ત્યાધીશઃ । શ્રીકણ્ઠાદિન્યાસે અધીશસ્ય ઊઁકારદેવતાત્વાત્ । ઈદૃશો વિયત્-હકારઃ શૌકરં-વારાહમ્ ॥ ૫૫॥

ઉદ્ધૃતં વારાહં સ્પષ્ટયતિ-હુઙ્કારમિતિ ।
હુઙ્કારં ચાત્ર રામસ્ય માલામન્ત્રોઽધુનેરિતઃ ॥
તારો નતિશ્ચ નિદ્રાયાઃ સ્મૃતિર્મેદશ્ચ કામિકા ॥ ૫૬॥

નચ સ્વરૂપનિર્દેશે સત્યુદ્ધારો વ્યર્થઃ, ઉદ્ધારાભાવે પાક્ષિકાઽશુદ્ધત્વપ્રસઙ્ગાત્ । સમ્પ્રતિ રામમાલામન્ત્રોદ્ધારં પ્રતિજાનીતે-માલેતિ । તારઃ-પ્રણવઃ નતિઃ-નમઃશબ્દઃ નિદ્રા-ભકારઃ, કલાન્યાસે નિદ્રાકલાસમ્બન્ધિત્વેન ભકારસ્યોક્તત્વાત્ । નિદ્રાયા ઇતિપઞ્ચમીઆનન્તર્યાર્થે । નિદ્રાયા અનન્તરં સ્મૃતિઃ-ગકારઃ,પૂર્વવદેવ સ્મૃતિકલાસમ્બન્ધિતયા ગકારસ્યોક્તેઃ । મેદઃ-વકારઃ, ધાતૂનાં મધ્યે મેદસો વકારસમ્બન્ધિત્વાત્ । કામિકા-તકારઃ, તકારસ્ય કામિકાખ્યકલાસમ્બન્ધિત્વાત્ ॥ ૫૬॥

રુદ્રેણ સંયુતા વન્હિમેધાઽમરવિભૂષિતા ॥
દીર્ઘા ક્રૂરયુતા હ્લાદિન્યથો દીર્ઘા સમાનદા ॥ ૫૭॥

સા ચ રુદ્રેણ - એકાદશસ્વરેણ સંયુતા । વહ્નિરિતિ રેફઃ, રેફસ્યાગ્નિબીજત્વાત્ । મેધા-ધકારઃ, તસ્યા ધકારસમ્બન્ધાત્ । સા ચ અમરઃ- ઉકારસ્તેન વિભૂષિતા, માતૃકાન્યાસે ઉકારસ્યાઽમરેશ્વરસમ્બન્ધાત્ ।

દીર્ઘા-નકારઃ, નકારસ્ય દીર્ઘાખ્યકલાસમ્બન્ધાત્ । સા ચ ક્રૂરયુતા । ક્રૂરઃ-અનુસ્વારઃ, ક્રૂરસ્થાનુસ્વારમૂર્તિત્વાત્ । હ્લાદિની-દકારઃ, તસ્યા દકારસમ્બન્ધાત્ । દીર્ઘા-નકારઃ સમાનદા, માનદા-આકારસ્તેન સહ વર્તમાના ॥ ૫૭॥

ક્ષુધા ક્રોધિન્યમોઘા ચ વિશ્વમપ્યથ મેધયા ॥
યુક્તા દીર્ઘા જ્વાલિની ચ સસૂક્ષ્મા મૃત્યુરૂપિણી ॥ ૫૮॥

ક્ષુધા-યકારઃ ક્રોધિની-રેફઃ, પરયોઃ ક્ષુધાક્રોધિન્યાખ્યકલાસમ્બન્ધાત્ । અમોઘા-ક્ષકારઃ, તસ્યાઃ ક્ષસમ્બન્ધાત્ । વિશ્વં-વાસુદેવઃ, વિશ્વશબ્દસ્ય "વિશ્વં વિષ્ણુ'રિત્યત્ર વાસુદેવનામત્વાત્ વાસુદેવસ્ય ઓકારસ્ય મૂર્તિત્વાત્ । અતો વિશ્વં-ઓકારઃ(૧)મેધયા યુક્તા-ઘકારેણ સંયુક્તા, ઘકારસ્ય મેધાસમ્બન્ધાત્ । દીર્ઘા-નકારઃ જ્વાલિની-વકારઃ, તસ્ય જ્વાલિનીસમ્બન્ધાત્ । સૂક્ષ્મઃ-ઇકારસ્તેન સહિતા, સૂક્ષ્મસ્યેકારમૂર્તિત્વાત્ । મૃત્યુરૂપિણી-શકારઃ, મૃત્યુરૂપાયાઃ કલાયાઃ શકારસમ્બન્ધાત્ ॥ ૫૮॥

સપ્રતિષ્ઠા હ્લાદિની ત્વક્ ક્ષ્વેલઃ પ્રીતિશ્ચ સાઽમરા ॥
જ્યોતિસ્તીક્ષ્ણાઽગ્નિસંયુક્તા શ્વેતાઽનુસ્વારસંયુતા ॥ ૫૯॥

હ્લાદિની-દકારઃ સા ચ પ્રતિષ્ઠયા-આકારેણ સહિતા, પ્રતિષ્ઠાખ્યશક્તેઃ આકારસમ્બન્ધાત્ । ત્વક્-યકારઃ, ધાતુષુ ત્વચો યકારસમ્બન્ધાત્ । ક્ષ્વેલો-વિષં મકારઃ, વિષસ્ય મકારસમ્બન્ધાત્ । પ્રીતિઃ-ધકારઃ, પ્રીતિકલાયાસ્તત્સમ્બન્ધિત્વાત્ । સા ચ સામરા, અમરઃ-ઉકારસ્તસ્ય તત્સમ્બન્ધાત્, તેન સહિતા । જ્યોતિઃ-અગ્નિઃ રેફઃ તીક્ષ્ણા-પકારઃ સા ચ અગ્નિના-રેફેણ સંયુક્તા । શ્વેતા-સકારસ્તસ્યાસ્તત્સમ્બન્ધાત્, સા ચ અનુસ્વારેણ સંયુતા ॥ ૫૯॥

કામિકાપઞ્ચમો લાન્તસ્તાન્તાન્તો ધાન્ત ઇત્યથ ॥
સ સાનન્તો દીર્ઘયુતો વાયુઃ સૂક્ષ્મયુતો વિષઃ ॥ ૬૦॥

કામિકા-તકારસ્તસ્યાસ્તત્સમ્બન્ધાત્, તસ્યાઃ પઞ્ચમો-નકારઃ લાન્તો-વકારઃ તાન્તઃ-તસ્યાન્તસ્થકારઃ તસ્યાપ્યન્તો-દકારઃ ધાન્તો-નકારઃ સઃ સાનન્તઃ અનન્ત-આકારસ્તત્સહિતઃ, દીર્ઘયુક્તઃ દીર્ઘ-આકારસ્તેન યુક્તો વાયુઃ-યકારઃ સૂક્ષ્મ-ઇકારસ્તેન યુતો વિષો-મકારઃ ॥ ૬૦॥

કામિકા કામિકા રુદ્રયુક્તાઽથોઽથ સ્થિરા સ એ ॥
તાપિની દીર્ઘયુક્તા ભૂરનિલોઽનન્તગોઽનલઃ ॥ ૬૧॥
નારાયણાત્મકઃ કાલઃ પ્રાણોઽમ્ભો વિદ્યયા યુતમ્ ॥
પીતા રતિસ્તથા લાન્તો યોન્યા યુક્તસ્તતો નતિઃ ॥ ૬૨॥

કામિકા-તકારઃ, પુનરપિ કામિકા-તકારઃ સા ચ રુદ્રેણ-એકાદશસ્વરેણ યુક્તા, અથોઽથેતિ પ્રગૃહ્યસંજ્ઞાયા અભાવશ્છાન્દસઃ । સ્થિરા-જકારઃ, જકારકલાત્વાત્તસ્યાઃ । "સ એ" ઇતિ ચ સ્વરૂપગ્રહણમ્ । તાપિની-બકારઃ, સ્વકારવદ્બકારસ્યાપિ તાપિનીસમ્બન્ધાત્ । દીર્ઘયુક્તા ભૂઃ-(૧)[ દીર્ઘેણ-આકારેણ સહિતો લઃ, લકારસ્ય પૃથિવ્યાત્મકત્વાત્ । અનિલઃ-યકારઃ અનન્તઃ-આકારઃ તં પ્રાપ્તોઽનલઃ-રેફઃ કાલઃ-મકારઃ સ ચ નારાયણાત્મકઃ-આકારસ્વરેણ યુક્તઃ, નારાયણસ્ય આકાર-મૂર્તિત્વાત્ । પ્રાણઃ-વાયુઃ યકારઃ, યકારસ્ય વાયુબીજત્વેનોક્તત્વાત્ । અમ્ભઃ-] ઉદકં વકારઃ વિદ્યયા-ઇકારેણ યુતમ્, પીતા-ષકારઃ રતિઃ-ણકારઃ લાન્તો-વકારો યોન્યા-એકારેણ યુતઃ, નતિઃ-નમઃશબ્દઃ ॥ ૬૧-૬૨॥

સપ્તચત્વારિંશદર્ણો ગુણાન્તઃ સ્રગણુસ્ત્વયમ્ ॥
રાજ્યાભિષિક્તસ્ય તસ્ય રામસ્યોક્તક્રમાલ્લિખેત્ ॥ ૬૩॥
સપ્તચત્વારિંશદર્ણત્વં મધ્યે સવર્ણદીર્ઘલક્ષણં સન્ધિમકૃત્વા સમ્પાદનીયમ્ । સન્ધિમાશ્રિત્યોદ્ધારસ્તુ વ્યાકરણાનુરોધાત્ । ગુણાન્તઃ, ગુણાઃ-સત્ત્વરજસ્તમાંસિ અન્તઃ-સ્વરૂપં યસ્ય, ત્રિગુણાત્મક ઇત્યર્થઃ । સાત્ત્વિકાદીનામુપાસકાનાં સાત્ત્વિકાદિફલદાતૃત્વાત્ । સ્રગણુઃ-માલામન્ત્રઃ । તુશબ્દો મન્ત્રાન્તરેભ્યો વિશેષમાહ । નાયં મન્ત્રો વનવાસિનો રામસ્ય, કિન્ત્વભિષિક્તસ્યેત્યાહ- અયમિતિ(૧)। યન્ત્રલેખનપ્રકારમુક્તમુપસંહરતિ- ઉક્તેતિ ॥ ૬૩॥
શિષ્યસમ્મુખીકરણતયોક્તં યન્ત્રં પ્રશંસતિ - ઇદમિતિ ।
ઇદં સર્વાત્મકં યન્ત્રં પ્રાગુક્તમૃષિસેવિતમ્ ॥
સેવકાનાં મોક્ષકરમાયુરારોગ્યવર્ધનમ્ ॥ ૬૪॥
અપુત્રિણાં પુત્રદં ચ બહુના કિમનેન વૈ ॥
પ્રાપ્નુવન્તિ ક્ષણાત્સમ્યગત્ર ધર્માદિકાનપિ ॥ ૬૫॥
અત્ર-અસ્મિન્નેવ જન્મનિ ધર્માદિકાન્-ધર્માર્થકામાન્ પ્રાપ્નોતિ । અપિશબ્દાન્મોક્ષો દૃષ્ટાન્તીક્રિયતે । અયમાશયઃ- રામોપાસનસ્ય મોક્ષસાધનત્વમિત્યેતદાવશ્યકમ્ । અતસ્ત્રિવર્ગસાધનત્વં ન સ્યાદિતિ શઙ્કા સ્યાત્, તદપનોદાય “ધર્માદિકાનપી'ત્યારમ્ભ ઇતિ ॥ ૬૫॥
ઇદં રહસ્યં પરમમીશ્વરેણાઽપિ દુર્ગમમ્ ॥
એવં યન્ત્રં સમાલિખ્ય ન દેયં પ્રાકૃતે જને ॥ ૬૬॥
પ્રાકૃતો જનઃ-પૃથગ્જનઃ । ઇતિશબ્દશ્ચતુર્થોપનિષત્સમાપ્તૌ ॥ ૬૬॥

ઇતિ શ્રીરામચન્દ્રચરણાનુગૃહીતપરમહંસપરિવ્રાજકાચાર્ય-આનન્દવનરચિતાયાં શ્રીરામપૂર્વતાપિનીયટીકાયાં રામકાશિકાયાં ચતુર્થોપનિષત્ સમાપ્તા ।

## અથ પઞ્ચમોપનિષત્ ।

નિર્ગુણપ્રાપ્તેઃ પરમપુરુષાર્થત્વાત્તસ્યાશ્ચ સગુણોપાસનયા સુલભત્વાત્તદઙ્ગભૂતાયાશ્ચ પૂજાયા મન્ત્રસાધ્યત્વાન્મન્ત્રાઽનુદ્ધારે તદપરિજ્ઞાનાત્તત્પરિજ્ઞાનાય મન્ત્રોદ્ધારેઽપિ યન્ત્રં વિના પૂજને દેવતાપ્રસન્નતાઽભાવસ્ય શાબ્દત્વાત્ પૂજાર્થં યન્ત્રમુદ્ધૃત્ય સમ્પ્રતિ પૂજાવિધિમારભતે-ભૂતાદિકમિત્યાદિના ।
ભૂતાદિકં શોધયેદ્ દ્વારપૂજાં
કૃત્વા પદ્માદ્યાસનસ્થઃ પ્રસન્નઃ ॥
અર્ચાવિધાવસ્ય પીઠાધરોર્ધ્વ-
પાર્શ્વાર્ચનં મધ્યપદ્માર્ચનં ચ ॥ ૧॥
ભૂતં-પૃથિવ્યાદિપઞ્ચકમ્ । આદિશબ્દેન આત્મા લિઙ્ગં દ્રવ્યં ક્ષિતિશ્ચ ગૃહ્યતે । તચ્છોધયેત્ । તત્ર-ભૂતશુદ્ધિઃ શોષણદહનપ્લાવનૈઃ, આત્મશુદ્ધિઃ ભગવદારાધનવિરુદ્ધવિષયવિરહઃ, ઉપાસ્યદેવતામૂર્તિર્લિઙ્ગં તસ્ય શોધનં-

પૂર્વપૂજાનુલેપનાદ્યપાકરણેન ક્ષાલનમ્, દ્રવ્યસ્ય-ચન્દનપુષ્પાદેરર્ચનસાધનસ્ય કેશકીટાદ્યપાકરણેન શોધનમ્, ક્ષિતેરઙ્ગમાલિન્યાદિના શુદ્ધિરિતિ બોધ્યમ્ । પ્રસન્નઃ-ચિત્તનૈર્મલ્યવાન્દ્વારપૂજાં-દ્વારેષુ ચતુર્ષ્વપિ હિ તદ્દેવતાપૂજાં કૃત્વા પદ્મકસ્વસ્તિકાદ્યાસનોપવિષ્ટઃ ભૂતાદિકં શોધયેદિત્યન્વયઃ । અસ્ય-પ્રકૃતસ્ય રામસ્ય, અઃ-વિષ્ણુઃ તસ્યેતિ વા । ફલતસ્ત્વેક એવાર્થઃ । અર્ચાવિધૌ કર્તવ્યે સતિ પીઠાધરોર્ધ્વપાર્શ્વાર્ચનમ્-પીઠસ્યાઽધરભાગાય નમઃ, પીઠસ્યોર્ધ્વભાગાય નમઃ, પીઠસ્ય પૂર્વપાર્શ્વાય નમઃ, દક્ષિણપાર્શ્વાય નમઃ, પશ્ચિમપાર્શ્વાય નમઃ ઇતિ પીઠાધરાદિપૂજાં મધ્યપદ્માર્ચનં-પીઠમધ્યગતકમલાર્ચનમ્ ॥ ૧॥

કૃત્વા મૃદુશ્લક્ષ્ણસુતૂલિકાયાં રત્નાસને દેશિકં ચાર્ચયિત્વા ॥
શક્તિં ચાધારાખ્યકાં કૂર્મનાગૌ પૃથિવ્યબ્જે સ્વાસનાઽધઃ પ્રકલ્પ્ય ॥ ૨॥

કૃત્વા, પીઠાદ્બહિર્દેવસ્ય વામભાગે મૃદુઃ-શ્લક્ષ્ણા સ્નિગ્ધા યા સુતૂલિકા-શોભના તૂલપટી તાં પરિભાવ્ય તસ્યાં સિંહાસનં ભાવયિત્વા તત્ર સિંહાસને દેશિકં- આચાર્યં સ્થિતમનુધ્યાયાઽર્ચયિત્વા આધારાખ્યકાં શક્તિં-આધારશક્તિં તદુપરિ કૂર્મં તસ્મિન્નાગં-શેષં તત્ર પૃથિવીં તસ્યામબ્જં-કમલં ચ પ્રકલ્પ્ય-કલ્પયિત્વા । શક્ત્યાદિકલ્પનાસ્થાનમાહ-સ્વેતિ । સ્વાભિન્નત્વેન ધ્યાતઃ શ્રીરામઃ સ્વશબ્દાર્થઃ, તસ્ય યદાસનં-પૂજાપીઠમ્, તસ્યાધઃ-અધરભાગે ॥ ૨॥

વિઘ્નં દુર્ગાં ક્ષેત્રપાલં ચ વાણીં બીજાદિકાંશ્ચાઽગ્નિદિશાદિકાંશ્ચ ॥
પીઠસ્યાઙ્ઘ્રિષ્વેષુ ધર્માદિકાંશ્ચ તત્પૂર્વાંસ્તાંસ્તસ્ય દિક્ષ્વર્ચયેચ્ચ ॥ ૩॥

વિઘ્નં-ગણેશં વાણીં-સરસ્વતીં બીજાનિ- "ગં દું ક્ષં સં" તત્પૂર્વકાન્ અગ્નિદિશાદિકાન્-આગ્નેયનૈરૃત્યવાયવ્યેશાનપૂર્વકાન્ પીઠસ્ય કોણચતુષ્ટયેઽર્ચયિત્વા, અગ્ન્યાદિક્રોણક્રમેણૈવ ધર્માદિકાન્-ધર્મજ્ઞાનવૈરાગ્યૈશ્વર્યાણિ અર્ચયિત્વા, તત્પૂર્વકાન્-અધર્માજ્ઞાનવૈરાગ્યાઽનૈશ્વર્યાણિ દિક્ષુ-પૂર્વાદિદિક્ચતુષ્ટયે અર્ચયેત્ ॥ ૩॥

મધ્યે ક્રમાદર્કવિધ્વગ્નિતેજાંસ્યુપર્યુપર્યોમૈરર્ચિતાનિ ॥
રજઃ સત્ત્વં તમ એતાનિ વૃત્તત્રયં બીજાઢ્યં ક્રમાદ્ભાવયેચ્ચ ॥ ૪॥

અર્કઃ-સૂર્યઃ વિધુઃ-સોમઃ, ઉપર્યુપરીતિ । અર્કોપરિ સોમસ્તદુપરિ અગ્નિરિત્યર્થઃ । ઔમૈરિતિ । અકારોકારમકારૈઃ પ્રણવાઽંશભૂતૈઃ । યદાહુરાચાર્યાઃ-

"મધ્યે તં તં પદ્મમસ્મિંશ્ચ સૂર્યં સોમં વહ્નિં તારવર્ણૈર્વિભક્તિઃ"

ઇતિ । તારઃ-પ્રણવ ૐકારઃ । રજઃ સત્ત્વં તમઃ, અત્ર સત્ત્વં રજસ્તમ ઇતિ વ્યુત્ક્રમો જ્ઞાતવ્યઃ । ઉપર્યુપરિ અર્ચયેદિત્યર્થઃ । એતાનિ - સત્ત્વાદીનિ, વૃત્તત્રયં મણ્ડલત્રયત્વેન ભાવયેત્, ચકારાદર્ચયેચ્ચ । બીજાઢ્યં સ્મરેદેતત્પૂર્વકમ્ ॥ ૪॥

આશાવ્યાશાસ્વપ્યથાત્માનમન્તરાત્માનં ચ પરમાત્માનમન્તઃ ॥
જ્ઞાનાત્માનં ચાઽર્ચયેત્તસ્ય દિક્ષુમાયાવિદ્યે યે કલાપારતત્ત્વે ॥ ૫॥

અન્તઃ - કર્ણિકામધ્યે આશાસુ-પૂર્વાદિદિક્ષુ આત્માદીનર્ચયેત્, વ્યાશાસ્વપિ-વિદિક્ષ્વાગ્નેયાદિષ્વપિ તાનેવ પૂજયેત્ । તસ્ય-કમલસ્ય દિક્ષુ ચતસૃષુ,માયેતિ-માયાતત્ત્વં વિદ્યાતત્ત્વં કલાતત્ત્વં પારતત્ત્વં ચપૂજયેત્ । પરમેવ પારમ્ ॥ ૫॥

સમ્પૂજયેદ્વિમલાદીશ્ચ શક્તીરભ્યર્ચયેદ્દેવમાવાહયેચ્ચ ॥
અઙ્ગવ્યૂહાઽનિલજાદ્યૈશ્ચ પૂજ્ય ધૃષ્ટ્યાદિકૈર્લોકપાલૈસ્તદસ્ત્રૈઃ ॥ ૬॥

વિમલાદીશ્ચેતિ- વિમલા ઉત્કર્ષણી જ્ઞાના ક્રિયા યોગા ચેયં પઞ્ચમી પ્રભ્વી સત્યા ઈશાના અનુગ્રહાખ્યા નવ શક્તીઃ પૂર્વાદિષુ મધ્યે ચાઽર્ચયેદિત્યર્થઃ । આવાહયેચ્ચ- આવાહનમુદ્રયાઽઽવાહનં કુર્યાત્ । ઉપલક્ષણમેતત્, સ્થાપનાદીન્યપિ તત્તન્મુદ્રાદિભિઃ કુર્યાત્ । ચકારઃ શ્રીરામસ્ય વિહિતપૂજાં સમુચ્ચેતુમ્ । આવરણમાહ- અઙ્ગેતિ, અઙ્ગાનિ- હૃદયાદીનિ । વ્યૂહશબ્દેન ઓત્માદયો વાસુદવાદયશ્ચ સશક્તિકા દ્વિધાઽપ્યુચ્યન્તે । અનિલજાદ્યૈરિતિ, અનિલો-વાયુસ્તજ્જો-હનૂમાન્ તદાદિભિરષ્ટભિઃ પૂજ્ય- પૂજયિત્વા, ધૃષ્ટ્યાદિકૈર્મન્ત્રિભિઃ ષોડશભિઃ, લોકપાલૈરિન્દ્રાદિભિઃ તદસ્ત્રૈઃ- ઇન્દ્રાયુધૈર્વજ્રાદિભિઃ ॥ ૬॥

વસિષ્ઠાદ્યૈર્મુનિભિર્નીલમુખ્યૈરારાધયેદ્રાઘવં ચન્દનાદ્યૈઃ ॥
મુખ્યોપહારૈર્વિવિધૈશ્ચ પૂજ્યતસ્મૈ જપાદીંશ્ચ સમ્યક્સમર્પ્ય ॥ ૭॥

નીલમુખૈર્નીલપ્રભૃતિભિઃ ષોડશભિર્વાનરૈઃ, ચન્દનાદિભિઃ આદિપદેન પુષ્પાદીનિ । મુખ્યોપહારૈઃ-શ્રેષ્ઠૈઃ પવિત્રૈર્નૈવેદ્યૈઃ જપાદીન્, પૂજાધ્યાનાદય આદિપદાર્થઃ । અયં પૂજાક્રમોરામાર્ચનચન્દ્રિકાયાંસપરિકરઃ સમાકલનીયઃ ॥ ૭॥

પૂજાઙ્ગધ્યાનમાહ-એવમ્ભૂતમિતિ ।

એવમ્ભૂતં જગદાધારભૂતં રામં વન્દે સચ્ચિદાનન્દરૂપમ્ ॥
ગદારિશઙ્ખાબ્જધરં ભવારિં સ યો ધ્યાયેન્મોક્ષમાપ્નોતિ સર્વઃ ॥ ૮॥

અરિ- ચક્રં સુદર્શનાખ્યં ભવસ્ય સંસારસ્યાઽરિં-શત્રુમ્ । ધ્યાનસ્ય તત્ફલમાહ-સ યૈતિ ॥ ૮॥

ઉપપાદિતસ્યોપાસનસ્ય ફલં સનિદર્શનમાહ-વિષ્વવ્યાપીતિ ।

વિશ્વવ્યાપી રાઘવોઽથો તદાનીમન્તર્દધે શઙ્ખચક્રે ગદાબ્જે ॥
ધૃત્વા રમાસહિતઃ સાવૃતિશ્ચસપત્તનઃ સાનુજઃ સર્વલોકી ॥ ૯॥

રાઘવઃ- રઘુવંશે આવિર્ભૂતો વિષ્ણુઃ સાવૃતિઃ-પરિવારસહિતઃ સપત્તનઃ-સનગરવાસી, સર્વલોકી સર્વલોકસહિતઃ અન્તર્દધે-અનવચ્છિન્નાનન્દપ્રકાશજ્ઞાનાત્મકે સ્વરૂપેઽવસ્થિતઃ ॥ ૯॥

તદ્ભક્તા યે લબ્ધકામાંશ્ચ ભુક્ત્વા તથા પદં પરમં યાન્તિ તે ચ ॥
ઇમા ઋચઃ સર્વકામપ્રદાશ્ચયે તે પઠન્ત્યમલા યાન્તિ મોક્ષમ્ ॥ ૧૦॥

તથા યે તદ્ભક્તાસ્તેઽપિ લબ્ધકામાંશ્ચ પરમેશ્વરોપાસનપ્રભાવપ્રકામાત્ અભીષ્ટાન્ ભુક્ત્વા પરમં પદં યાન્તિ । શ્રીરામોપાસનપ્રતિપાદકાનાં “ચિન્મય” ઇત્યાદીનામેતદન્તાનામૃચાં પાઠફલમાહ -ઇમાઇતિ । વીપ્સા પઞ્ચમોપનિષત્સમાપ્તિદ્યોતનાર્થા । ઇતિશબ્દો ગ્રન્થપરિસમાપ્ત્યર્થઃ ॥ ૧૦॥

વિશ્વનાથનગરીવ કાશિકા પાવની જયતિ રામકાશિકા ।
વેદશીર્ષવચનોપપાદિતં વસ્તુ હસ્તફલવદ્વિવૃણ્વતી ॥
શ્રીરામકાશિકા કલ્પલતિકાઽન્વેષિતાઽન્વહમ્ ।
વર્ધિતા ફલદા સમ્યઙ્ નૃઋણામાનન્દકાનને ॥
દૃષ્ટ્વા મુક્તહરાન્ હરોઽપરિમિતાન્ મુહ્યન્નુમાં કોપિકાં
કુર્વન્નઙ્ગમિવાઽઙ્ગાં વહતિ યો યસ્મિન્ સ્થિતોઽહર્નિશમ્ ।
તસ્મિન્ કાશિપુરે પુરારિનિલયે સ્વર્ગઙ્ગયાઽલઙ્કૃતે
ટીકાઽઽનન્દવનેન તેન રચિતા રામાદિકા કાશિકા ॥

ઇતિ શ્રીરામચન્દ્રચરણાનુગૃહીતપરમહંસપરિવ્રાજકાચાર્ય-શ્રીઆનન્દવનવિરચિતાયાં શ્રીરામપૂર્વતાપિનીયટીકાયાં રામકાશિકાયાં પઞ્ચમોપનિષત્ સમાપ્તા ।
॥ સમાપ્તા ચેયં પૂર્વતાપિની ॥

## શ્રીરામોત્તરતાપિની ।

॥ શ્રીઃ ॥
॥ શ્રીરામાય નમઃ ॥

## અથ પ્રથમકણ્ડિકા ।

આનન્દવનકૃતયા આનન્દનિધિનામિકયા ટીકયા સહિતા ।
સત્યં તારકતત્ત્વમોમિદમણુ સ્થૂલં ચતુષ્પાદકં જાગ્રત્સ્વપ્નસુષુપ્તિગં સ્મૃતિવશાદ્વિશ્વાદ્યતીતં વિભુમ્ ।
ભ્રૂનાસાન્ત ઉપાસ્યમાનમમરૈઃ સ્તુત્યં તુરીયાત્મકં ભક્તાનુગ્રહવિગ્રહં જનકજાજાનિં ભજે રાઘવમ્ ॥
યઃ શબ્દે પરિનિષ્ઠિતોઽથ પરમે બ્રહ્મણ્યતિન્યાયતો યત્કારુણ્યસુધોદબિન્દુકણિકા સંસારસન્તાપનુત્ ।
યદ્ગામ્ભીર્યમગાધમપ્યનુચરૈર્ગાધં સમાશ્રીયતે તસ્ય શ્રીગુરુરાઘસ્યચરણદ્વન્દ્વારવિન્દં નુમઃ ॥
આસીદ્વાસિષ્ઠવંશ્યો નૃહરિરિતિ પુરા કેશવાહ્વસ્ય સૂનુસ્તસ્માત્ કૃષ્ણાહ્વયોઽભૂદ્ધરણિસુરવરઃ પત્તને કુણ્ડિનાખ્યે ।
તસ્માત્સૂનુર્ગુણાબ્ધિ સમજનિ કમલામ્બઃપ્રભુત્વાદ્યતીનામાનન્દાઽઽદ્યઃ સ રામોપનિષદિ વિદધે સાધુ ટીકાં વનાખ્યઃ
॥
શ્રીરામોત્તરતાપિનીયવિલસચ્છ્રુત્યર્થસંશોધનવ્યાજેનાઽર્જિતજન્મકોટિદુરિતધ્વંસાનુવંશાત્ કૃશા ।
ટીકા સ્વાત્મહિતાર્થમેવ વિદુષાં બોધાય સા નોચ્યતે તત્ક્ષન્તવ્યમનાથદીનપતિભિર્વિસ્મૃત્ય મે ચાપલમ્ ॥
આનન્દનિધિનામ્નીયં ટીકા પ્રોદ્ઘાટ્યતે મયા । રામચન્દ્રમણિં પ્રાપ્ય કર્તું સામ્રાજ્યમદ્વપમ્ ॥
ઇહ ખલુ સકલપ્રાણભૃતાં સુખાર્થિત્વં દુઃખાનર્થિત્વં ચ ધ્યાયમાનત્વાત્ સુખોપાદિત્સાદુઃખજિહાસયોરનિવારિતપ્રાપ્તૌ કશ્ચિત્ કૃતસુકૃતનિચયખચિતચરમકલેવરકમનીયતયાઽવશ્યમ્ભાવિદુઃખાઽવિનાભૂતત્વેનાઽનિત્યત્વેનસાતિશયત્વેન ચ વિષયજનિતં સુખં દુઃખમેવેતિ મત્વા સકલસંસારાદત્યન્તોપરમપરો ભવતિ । ઉપરતઃ સન્સંસારોચ્છિત્તિહેત્વન્વેષણઙ્કુરોતિ । સંસારસ્ય ચ બ્રહ્માત્મૈકત્વાપરિજ્ઞાનવિલસિતત્વાદ્બ્રહ્માત્મૈકત્વજ્ઞાનેનૈવ તસ્યોચ્છેદસમ્ભવાત્ રમણીયતરશ્રીરામબ્રહ્મવિદ્યાસિષાધયિષયા શ્રીરામોત્તરતાપિનીયોપનિષત્સગુણોપાસનફલભૂતનિર્ગુણશ્રીરામોપાસનતત્પરતય । યદ્યપ્યત્રોપનિષત્પદસ્ય "ઉપનિ'પૂર્વાત્સદેર્નિષ્પન્નસ્યૈવ મુખ્યયા વૃત્ત્યા શ્રીરામબ્રહ્મવિદ્યાપરત્વમ્, તથાપિ લક્ષણયા વૃત્ત્યા બ્રહ્મવિદ્યાર્થાયાં શ્રુતાવપિ બ્રહ્મવિદ્યાપ્રવૃત્તિઃ । "મુખ્યૈવ શબ્દસ્ય વૃત્તિર્ન લક્ષણે'તિ નચ વાચ્યમ્, વૃદ્ધૈરુભયોરપિ શબ્દવૃત્તિત્વેન સ્વીકારાત્ । નનુ ભવતુ શ્રુતિરૂપગ્રન્થોઽપ્યુપનિષત્, તથાપિ ન વ્યાખ્યાનાર્હતામાસાદયેત્ । દેહેન્દ્રિયાન્તઃકરણવિલક્ષણાત્મનઃકર્મવિશેષણત્વેનસ્તુતિપરત્વાત્ । ન,તત્ર વિલક્ષણત્વસ્યૈવોપપાદિતત્વાત્ । નહિ વિલક્ષણત્વમાત્રેણાઽઽત્મસ્વરૂપં શક્યમાકલયિતુમ્ । અત્ર તુ

"અયમાત્મા બ્રહ્મ, "તત્ત્વમસી'ત્યાદિમહાવાક્યૈર્બ્રહ્માત્મૈકત્વલક્ષણમાત્મતત્ત્વં નિરૂપ્યત ઇત્યગતાર્થત્વેન વ્યાખ્યાનાર્હત્વમાસાદયેદેવ ।

નનુ કર્મકાણ્ડદેવતાકાણ્ડયોઃ ફલપરત્વાદેકસ્યૈવ વેદસ્ય વાક્યભેદપ્રસઙ્ગેન ન વ્યાખ્યાનાર્હત્વમિતિ - ચેન્ન, કાણ્ડત્રયસ્યૈકવાક્યતાપ્રસિદ્ધેઃ । કર્મકાણ્ડે "તમેત'મિત્યનયા વિવિદિષાશ્રુત્યા યજ્ઞદાનાદિનાઽન્તઃકરણશુદ્ધિમુત્પાદ્ય, દેવતાકાણ્ડે ચોપાસનયા શુદ્ધાન્તઃકરણૈશ્ચિત્તસ્થૈર્યં શિક્ષિત્વા, જ્ઞાનકાણ્ડે ત્વમ્પદાર્થતત્પદાર્થદ્વયપરિશોધનેન જહદજહલ્લક્ષણયા બ્રહ્માત્મૈકત્વં પ્રતિશ્રવણાદિનાપ્રતિપત્તવ્યમિતિ કાણ્ડત્રયસઙ્ગતિર્ભગવદ્ભિઃશ્રીમચ્છઙ્કરાચાર્યૈરેવ દર્શિતા । નાઽતઃ પૃથક્પ્રયત્ન આશ્રીયતે ।

નનુ ભવતુ કાણ્ડત્રયસઙ્ગતિસ્તથાપિ વેદાનાં શબ્દત્વાચ્છબ્દસ્ય ચ શ્રીરામબ્રહ્મપરત્વાઽસમ્ભવાન્ન વ્યાખ્યા યુક્તિમતી । યતઃ- શબ્દપ્રવૃત્તિસ્તુ ત્રિધા, મુખ્યા લક્ષણા ગૌણી ચેતિ । મુખ્યાપિ દ્વિવિધા રૂઢિયોગભેદેન । તત્ર રૂઢિસ્તાવદ્બ્રહ્મણિ ન પ્રવર્તતે,તસ્યશબ્દાઽગોચરત્વાત્, તસ્યાશ્ચ સ્વરૂપજાતિગુણનિર્દેશાર્હે વસ્તુન્યેવ "ડિત્થઃ ગૌઃ શુક્લ" ઇતિ સંજ્ઞાસંજ્ઞિસઙ્કેતેન પ્રવૃત્તેઃ । નાપિ યૌગી, નાપિ લક્ષણા । બ્રહ્મણોઽસઙ્ગત્વેન સમ્બન્ધાભાવાત્ । યોગવૃત્તેર્નિરાકરિષ્યમાણત્વાલ્લક્ષણાયાશ્ચ સંજ્ઞાસંજ્ઞિસઙ્કેતેનાઽભિહિતાર્થસમ્બન્ધિનિ વસ્તુનિ "ગઙ્ગાયાં ઘોષ" ઇતિવત્ પ્રવૃત્તેઃ । યથાહુઃ-

"અભિધયાઽવિનાભૂતપ્રવૃત્તિર્લક્ષણેષ્યતે"

ઇતિ । ન ગૌણી, બ્રહ્મણો નિર્ગુણત્વાત્ । ગૌણ્યાસ્તુ અભિહિતાર્થલક્ષિતગુણયુક્તે તત્સદૃશે "સિંહો માણવક" ઇતિવત્ પ્રવૃત્તિઃ*। યથાહુઃ-

"લક્ષ્યમાણગુણૈર્યોગાદ્વૃત્તેરિષ્ટા તુ ગૌણતા"

ઇતિ । યોગવૃત્તેરસઙ્ગત્વાદ્ધેતોર્ન બ્રહ્મપરત્વમ્ । તસ્યાશ્ચ રૂઢિલક્ષણાગુણત્રિવિધવૃત્તિપ્રતિપાદિતપદાર્થયોર્વા પ્રકૃતિપ્રત્યયાર્થયોર્વા યોગે વા "પઙ્કજમૌપગવઃ પાચક" ઇત્યાદિવત્ પ્રવૃત્તિઃ । અતો બ્રહ્મણઃ પદાર્થત્વાયોગાદપદાર્થસ્યચ વાક્યાર્થત્વાયોગાન્ન શ્રુતિગોચરત્વમ્ ।

અત્રોચ્યતે- બ્રહ્મણઃ શબ્દાગોચરત્વેનાઽસઙ્ગત્વેન નિર્ગુણત્વેન ચ શ્રુતિગોચરત્વં સાક્ષાન્માભૂત્, તથાપિ સગુણદ્વારા નિર્ગુણે સમન્વયાદ્યુક્તમેવ બ્રહ્મપરત્વં વેદાનામ્ । તથાહિ - "યઃ સર્વજ્ઞઃ સ સર્વવિત્ યસ્ય જ્ઞાનમયં તપઃ સર્વસ્ય વશી સર્વસ્યેશાનઃ યઃ પૃથિવ્યાં તિષ્ઠન્ પૃથિવ્યા આન્તરઃ સોઽકામયત બહુ સ્યાં સ ઐક્ષત તત્તેજોઽસૃજત્ સત્યં જ્ઞાનમનન્તં બ્રહ્મે"ત્યાદ્યાઃ શ્રુતયો ભગવન્તં ષડ્ગુણૈશ્વર્યનિલયં સકલકલ્યાણગુણનિલયં સર્વજ્ઞંસર્વશક્તિંસર્વેશ્વરં સર્વનિયન્તારં સર્વોપાસ્યં સર્વકર્મફલદાતારં સચ્ચિદાનન્દં સગુણં ગુણાનભિભૂતં શ્રીરામચન્દ્રં પ્રતિપાદયન્તિ । તત્ત્વમસ્યાદિવાક્યાનિ તુ તાદૃગીશ્વરત્વાભાવાજ્જીવસ્ય સંસારનિવૃત્તિદ્વારા "તત્ત્વં'પદયોઃ સામાનાધિકરણ્યપ્રતીત્યન્યથાઽનુપપત્ત્યા નિર્ગુણે પર્યવસ્યન્તિ । ન તાવત્સામાનાધિકરણ્યં "વૈશ્વદેવ્યામિક્ષે'તિવદુભયોરેકાર્થાભિધાનેન । કુતઃ- ભિન્નાર્થત્વાત્ । યથોક્તમ્-

આમિક્ષાં દેવતાયુક્તાં વદત્યેવૈષ તદ્ધિતઃ ।

આમિક્ષાપદસાન્નિધ્યાત્તસ્યૈવ વિષયાર્પણમ્ ॥

ઇતિ । નચ અજહત્સ્વાર્થયોઃ સામાનાધિકરણ્યં નિરૂઢલક્ષણયા વિશેષણવિશેષ્યભાવેન "નીલમુત્પલ'મિતિવત્ । કુતઃ-વિરુદ્ધાર્થત્વેન તદયોગાત્ । તદુક્તમ્-

"સ્વબુદ્ધ્યા રજ્યતે યેન વિશેષ્યં તદ્વિશેષણમ્"

ઇતિ । નચ જહત્સ્વાર્થત્વેન સમ્બન્ધિલક્ષણયા "કુસુમિતદ્રુમા

ગઙ્ગે'તિવત્ । કુતઃ- એકાર્થત્વસ્ય વિવક્ષિતત્વાત્ । અતો જહદજહત્સ્વાર્થલક્ષણયા "સોઽયં દેવદત્ત" ઇતિવત્ વિરુદ્ધાંશત્યાગેનાઽનુગતચિદંશેનૈકાર્થ્યેન નિર્ગુણે પર્યવસાનમ્ । અસ્થૂલાદિવાક્યાનાં તુ સાક્ષાદુપાધિનિષેધેન, ઉપાસનાવાક્યાનાં ત્વન્યાર્થપ્રવૃત્તસૃષ્ટ્યાદ્યવલમ્બનેન જ્ઞાનસાધનવિધાનેન નિર્ગુણબ્રહ્મપરત્વં પ્રસિદ્ધમ્ । અતો બ્રહ્મણિ સમન્વયાદુપનિષદો વ્યાખ્યાનમુચિતમિત્યલમતિપ્રસઙ્ગેન ।

તત્ર શ્રીરામપૂર્વતાપિનીયે મન્દાધિકારિણાં સગુણોપાસનં નિર્ગુણોપાધિકં "ચિન્મય" ઇત્યાદિપઞ્ચોપનિષદા નિરૂપિતમ્ । ઇદાનીમુત્તમાધિકારિણાં કર્મસુ તત્ફલે વિરક્તાનાં સંન્યાસિનાં પરમહંસાનાં શ્રીરામોત્તરતાપિનીયોપનિષદા તદેવ નિર્ગુણોપાસનં સગુણફલભૂતં નિરૂપ્યતે । એતામેવ શ્રીરામચન્દ્રબ્રહ્મવિદ્યામવિદ્યાપનોદિનીં પ્રકટયિતું કદાચિન્મિથિલોપવને જનકો વૈદેહ આસાઞ્ચક્રે । તત્ર ચ યોગીશ્વરઃ શિષ્યસઙ્ઘૈર્મુનિગણૈશ્ચ પરિવારિત આસીત્ । તત્રાનેકૈર્મુનિવરૈસ્તદ્બ્રહ્મવેત્તૃત્વમસમાનૈઃ પૃચ્છ્યતે ।

બૃહસ્પતિરુવાચ યાજ્ઞવલ્ક્યં યદનુકુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ ।

અવિમુક્તં વૈ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ । તસ્માદ્યત્ર ક્વચન ગચ્છતિ તદેવ મન્યેત ॥ ૧॥

એવં સતિ તં બૃહસ્પતિઃ- ગુરુરુવાચ યાજ્ઞવલ્ક્યં- યઃ યજ્ઞવલ્ક્યસ્યાપત્યં યત્- પ્રસિદ્ધં અનુ- યત્સર્વસ્માદપ્યૂર્ધ્વં પુણ્યાતિશયચરમકોટિનિવિષ્ટં, સર્વોત્કૃષ્ટં પુણ્યફલમિતિ યાવત્ । કુરુક્ષેત્રં, "કુત્સિતં રૌતી'તિ કુરુ-પાપકર્મ સંસારહેતુભૂતમ્, તસ્ય ક્ષેપણાન્નિરસનાત્ ત્રાતીતિ ક્ષેત્રમ્ । ક્ષેત્રે હિ રૂઢં મૂલતૃણાદિ નિરસ્યતે । યદ્વા કુઃ- પૃથિવી દેહાદ્યાકારપરિણતા, તસ્યાં રૌતિ-રાવં કરોતીતિ કુરુઃ-પ્રાણઃ તસ્ય ક્ષેત્રં-રાવકર્તુઃ પ્રાણસ્ય નિવાસસ્થાનં તત્કુરુક્ષેત્રમ્ । પ્રાણસ્યાઽધિષ્ઠાનમિત્યર્થઃ । દેવાનાં-ઇન્દ્રિયાણાં તદધિષ્ઠાતૃણાં વા દેવયજનમ્, દેવસ્ય- સ્વયમ્પ્રકાશસ્યાત્મનો દ્યોતનાત્મકાન્તર્યામિણઃ, શ્રીરામચન્દ્રસ્યેત્યર્થઃ । યજનં-પૂજાકારણમ્ । યત્ર હિ ઇન્દ્રિયાણિ વિવિધવિષયોપહારૈ'સ્ત્વં'પદાભિધમાત્માનં શ્રીરામચન્દ્રં પૂજયન્તિ । તથાચવાર્તિકકારઃ- "ભોગશ્ચિદવસાનતે'તિ । સર્વેષાં ભૂતાનાં-સમષ્ટિવ્યષ્ટ્યાત્મકાનાં બ્રહ્મસદનમ્, બ્રહ્મ-શ્રીરામાખ્યં દેશકાલવસ્તુપરિચ્છેદશૂન્યં તદેવ સદનં-નિવાસસ્થાનમ્ । યત્ વિશેષણદ્વયવિશિષ્ટં કુરુક્ષેત્રમ્, તત્કિમિતિ શેષઃ । ઉત્તરમાહ, અવિમુક્તં- અવિદ્યાકામકર્માદિભિર્મુક્તમપ્યવિદ્યાદશાયાં અવિમુક્તમ્ । વૈ-પ્રસિદ્ધં બ્રહ્મ પુરુષશબ્દવાચ્યમ્ । તચ્ચ દ્વિવિધમ્, પૂર્ણં તત્પદં ઉપાધ્યુપલક્ષિતં રામં પુરિ શયાનમ્, ત્વં પદં ઉપાધિધર્માનાત્મનિ મન્યમાનં આત્માનમ્ । તદુક્તં -

ઉપાધિરજ્ઞાનમનાદિસિદ્ધમસ્મિંશ્ચિદાભાસનમીશ્વરત્વમ્ ।

ઉપાધિરન્તઃકરણં ત્વમર્થે જીવત્વમાભાસનમસ્ય તદ્વત્ ॥

ઇતિ । તત્ શોધિતપદાર્થદ્વયભૂતં બ્રહ્મૈવ "કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદન'મિત્યનુવાદઃ । પદાર્થદ્વયપરિશોધનેનૈકરસં બ્રહ્મૈવ સ્થાનં ભવતિ યસ્માત્, તસ્માદ્યત્ર ક્વચન- યત્ર ક્વાપિ ગઙ્ગાપ્રયાગાદૌ તદ્વિપરીતે વા ગચ્છતિ તદેવ-તત્સ્થમેવ મન્યેત-જાનીયાત્ । કથમ્, ઇતિ- અનેન પ્રકારેણ ॥ ૧॥

પ્રકારમાહ -

ઇદં વૈ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ । અત્ર હિ જન્તોઃ પ્રાણેષૂત્ક્રમમાણેષુ રુદ્રસ્તારકં બ્રહ્મ વ્યાચષ્ટે । યેનાસૌ અમૃતી ભૂત્વા મોક્ષી ભવતિ । તસ્માદવિમુક્તમેવ નિષેવેત । અવિમુક્તં ન વિમુઞ્ચેદિતિ ॥ ૨॥

એવમેવૈતદ્યાજ્ઞવલ્ક્યઃ ॥ ૩॥

ઇદં વૈ - મયા પ્રાપ્તં સ્થલમેવ તદવિમુક્તમેવેત્યન્વયઃ । ઉક્તવિશેષણમેવ નાન્યદિતિ પુનઃ પુનરાહ -કુત્રક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમિતિ । સ્થલમેવાઽવિમુક્તમિત્યુપચારેણાઽવ્યગ્રત્વસમ્પાદનાર્થં સ્તૂયતે । અત્ર - અવિમુક્તે કુરુક્ષેત્રાદિરૂપે પદાર્થદ્વયપરિશોધને હિ- યસ્માત્ જન્તોઃ- પદાર્થદ્વયસામસ્ત્યમજાનતઃ મુમુક્ષોઃ પ્રાણેષુ - પઞ્ચપ્રાણજ્ઞાનકર્મેન્દ્રિયમનાંસિ ષોડશ તેષુ ઉત્ક્રમમાણેષુ- અભિમાનાભાવેન વિલીનતાં પ્રાપ્તેષુ સત્સુ લીનપ્રાયેષુ સત્સુ । તથાચ સ્મર્યતે -

પ્રાણે ગતે યથા દેહઃ સુખં દુઃખં ન વિન્દતિ ।

તથા ચેત્પ્રાણયુક્તોઽપિ સ કૈવલ્યાશ્રમે વસેત્ ॥

ઇતિ । રુદ્રઃ, રુત્-દુઃખં અવિદ્યાતત્કાર્યભૂતં દ્રાવયતિ-નાશયતીતિ તથા ઈશ્વરસ્તત્પદાર્થો રામ એવાઽઽચાર્યો ભૂત્વા, “આચાર્યવાન્ પુરુષો વેદે’તિ શ્રુતેઃ । તારકં-તારાત્મકત્વાત્ તથા, સર્વસ્માત્સંસારભયાત્ સન્તારયતીતિ વા તથા, બ્રહ્મ-તારકવિશેષણવિશિષ્ટં બ્રહ્મવિદ્યાબ્રહ્માત્મૈક્યબોધકં મહાવાક્યં, શ્રીરામમન્ત્રમિતિ યાવત્ । વ્યાચષ્ટે-કથયતિ । યેન-તારક-બ્રહ્મજનિતજ્ઞાનેન અસૌ-રુદ્રાનુગૃહીતો જીવઃ અમૃતી-અમૃતો ભૂત્વા “બ્રહ્માસ્મી”ત્યભિમાનવાન્ સન્ મોક્ષી ભવતિ-સ્વેન સ્વયઞ્જ્યોતિઃસ્વરૂપરામાત્મનાઽવતિષ્ઠતે । રામમન્ત્રરામયોર્વાચ્યવાચકત્વેન ભેદાત્ પૂર્વસ્ય હેતોર્યસ્માદર્થસ્ય નાન્વયઃ, તસ્માત્- અવિમુક્તસ્ય શુદ્ધત્વમ્પદાર્થસ્ય નિરુપાધિબ્રહ્મરામતાપત્તેઃ અવિમુક્તમેવ નિષેવેત-નિતરાં સેવેત । વિજાતીયપ્રયત્નાઽનન્તરિતસજાતીયપ્રયત્નપ્રવાહેણ સાક્ષાત્કુર્યાદિત્યર્થઃ । અવિમુક્તં ન વિમુઞ્ચેત્- યસ્મિન્ કસ્મિન્દેશે આત્માનુસન્ધાનં ન પરિત્યજેત્ । તદુક્તં પૂજ્યપાદૈરાચાર્યૈઃ -

ત્વમ્પદાર્થવિવેકાય સંન્યાસઃ સર્વકર્મણામ્ ।

શ્રુત્યા વિધીયતે યસ્માત્, તત્ત્યાગી પતિતો ભવેત્ ॥

ઇતિ । એવઙ્ગુણયાજ્ઞવલ્ક્યસ્ય બુદ્ધિપરીક્ષાર્થં સ્વસ્ય બુદ્ધિશુદ્ધ્યર્થં વા પૃષ્ટેન યાજ્ઞવલ્ક્યેનોક્તમઙ્ગીચકાર બૃહસ્પતિઃ, એવમેવૈતત્ - પદાર્થદ્વયૈક્યમેવાવિમુક્તં કુરુક્ષેત્રં દેવયજનં બ્રહ્મસદનમિતિ । પદાર્થદ્વયશુદ્ધિં જ્ઞાતવતઃ પ્રાણાદ્યુપાધિવિલયે ઈશ્વરાનુગ્રહેણોક્તં બ્રહ્મવિદ્યયા બ્રહ્માત્મૈક્યં ભવતીતિ ભાવઃ । “બ્રહ્મૈવ સન્ બ્રહ્માઽપ્યેતી’તિ શ્રુતેઃ ।

યદ્વા પ્રાગ્જન્મનિ સંન્યાસાદ્યધિકારસમ્પાદનેઽપિ કનચિદ્ બલીયસા કર્મણા કસ્યાઞ્ચિદ્યૌનૌ જડભરતવદુત્પન્નાનામધિકારિણામન વા સર્વેષામનુગ્રહાર્થં પૃચ્છતિ, યત્-પ્રસિદ્ધં અનુ-પશ્ચાત્ સર્વત્ર વિહરતામવિહારાર્થં પદં સર્વતીર્થેભ્ય ઉત્કૃષ્ટતમં ભૂમેરુત્તમાઙ્ગમિતિ યાવત્ । કુરુક્ષેત્રં - કુરુણા રાજ્ઞા પાલિતમનાદિસિદ્ધં ક્ષેત્રં દેવાનાં દેવયજનં બ્રહ્માવાપ્તિહેતુભૂતં, તત્કિમિતિ શેષઃ । વિશેષણદ્વયવિશિષ્ટં પ્રસિદ્ધં કુરુક્ષેત્રમેવ કુરુક્ષેત્રમન્યદ્વેતિ સન્દેહે ઉત્તરમાહ, અવિમુક્તં - કદાચિદપિ વિશ્વેશ્વરેણાઽવિમુક્તં કાશ્યભિધેયં વૈ-નિશ્ચયેન કુરુક્ષેત્રમ્ । દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમવિમુક્તાદુત્કૃષ્ટતમં નાસ્તિ યસ્માત્, તસ્માદ્યત્ર ક્વચન ગચ્છતિ-પઞ્ચક્રોશેષુ યત્ર કુત્રચિદ્વિચરતિ

તદેવ - એવમ્ભૂતં પ્રદેશમેવ મન્યેત - જાનીયાત્ । કથમિતિ - અમુના પ્રકારેણ । પ્રકારમાહ, ઇદં વૈ - ઇદમેવ કુરુક્ષેત્રં દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમિતિ । અત્ર-અવિમુક્તે હિ-યસ્માત્ જન્તોઃ- પ્રાણિમાત્રસ્ય પ્રાણેષૂત્ક્રમમાણેષુ- લોકાન્તરં ગચ્છત્સુ, રુદ્રઃ દુઃખહારિત્વાદ્રોદનાદ્વા તારકં બ્રહ્મશ્રીરામમન્ત્રાત્મકં વ્યાચષ્ટે- દક્ષિણે કર્ણે કથયતિ । તદાહ વિશ્વેશ્વરઃશ્રીરામં પ્રતિ-

મુમૂર્ષોર્મણિકર્ણિક્યામર્ધોદકનિવાસિનઃ ।
અહં દિશામિ તે મન્ત્રં તારકં બ્રહ્મસંજ્ઞિતમ્ ।
અતસ્ત્વં જાનકીનાથ પરં બ્રહ્માઽસિનિશ્ચિતમ્ ॥

ઇતિ । યેન - તારકબ્રહ્મવિદ્યોપદેશેન અસૌ-જીવઃ અમૃતી ભૂત્વા-બ્રહ્માસ્મીત્યભિમાનવાન્ સન્ મોક્ષી ભવતિ - વિદેહકૈવલ્યમાપદ્યતે, શુદ્ધાન્તઃકરણસ્ય આચાર્યરૂપેણોપદેશાદ્વિદેહતાં જીવન્મુક્તતાં વાઽઽપાદયતિ । પૂર્ણાનન્દરૂપેણસ્વસન્નિધિલેશવાચ્છુદ્ધતામુત્પાદ્ય વિદેહતાં ભક્તવાત્સલ્યેન ગલગરલાદિદેહદાનેન જીવન્મુક્તતાં ચાઽઽપાદયતીતિ । નચાત્ર તારતમ્યવ્યવસ્થાકરણમુચિતમ્, ઉપદેષ્ટુરુપદેષ્ટૃવાક્યસ્ય ચજલધિજલવદનસમ્પાદતદુત્કૃષ્ટત્વાત્ । જ્ઞાનાદેવ તુ કૈવલ્યમ્ । તજ્જ્ઞાનસૌલભ્યમત્રૈવ યસ્માત્, તસ્માદવિમુક્તમેવ નિષેવેત- અત્યાદરેણ સેવેત । અવિમુક્તં ન વિમુઞ્ચેત્-ક્ષેત્રસંન્યાસં કુર્યાત્ । અઙ્ગીકારાદાહ ગુરુઃ- “એવેમવૈતદ્યાજ્ઞવલ્ક્ય” ઇતિ ।

નન્વેવમપિ “પ્રાણેષૂત્ક્રમમાણેષુ” ઇત્યનયા શ્રુત્યા પ્રાણવતાઞ્જઙ્ગમાનામેવતારકબ્રહ્મોપદેશ ઇતિ ચેન્ન, સ્થાવરાણામપિ પ્રાણધારણાઽવિશેષાત્ । નહિ પ્રાણવ્યતિરેકેણ યસ્ય કસ્યાપિ જન્મ સમ્ભવતિ । “યચ્ચ કિઞ્ચ પ્રાણભૃ’દિતિ શ્રુતેઃ ।

યત્કિચેદં પ્રાણિજાતં જઙ્ગમં ચ પતત્રિ ચ ।
યચ્ચાત્ર સ્થાવરં સર્વં તત્પ્રજ્ઞાને પ્રતિષ્ઠિતમ્ ॥

ઇતિ સ્મૃતેશ્ચ । જઙ્ગમેષુપ્રાણોત્ક્રાન્ત્યભિવ્યક્તિર્યથા,ન તથાસ્થાવરેષ્વિતિ વિશેષઃ । “ભૂતાનાં પ્રાણિનઃ શ્રેષ્ઠા” ઇતિ મનુવાક્યમપિ અભિવ્યક્ત્યભિપ્રાયમેવ, નત્વન્યત્રાઽપ્રાણિત્વપ્રતિપાદનપરમ્ । તર્હિ શાસ્ત્રાધિકારિત્વાન્મનુષ્યાણામેવાઽસ્ત્વિતિ ચેન્ન, પૂર્વજન્મનિસુસંસ્કૃતસ્યાપિકેનચિત્પ્રતિબન્ધકેન કર્મણા યત્કિઞ્ચિદ્દેહાવગતૌ શાસ્ત્રસાફલ્યાત્ । નહ્યેકેન જન્મના વિમુક્તિસૌલભ્યમ્ ।

“બહૂનાં જન્મનામન્તે જ્ઞાનવાન્ માં પ્રપદ્યતે”

ઇતિભગવદ્વચનાત્ । તથાપિ જડભરતવત્પૂર્વસંસ્કારસ્મરણ-સન્નિધિવિરહાન્નેતિ ચેન્ન, પરબુદ્ધેરપ્રત્યક્ષત્વાત્ । અવિમુક્તપ્રાપ્ત્યન્યથાઽનુપપત્તિપ્રમાણબલાદપ્યવગમ્યતે । પૂર્વકૃતસંન્યાસાદ્યધિકારકર્મપરિસમાપ્ત્યભાવાદિતિ ચેન્ન, પ્રારબ્ધકર્મણ એવોર્વરિતત્વાત્ । અવિમુક્તપ્રાન્તેપૂર્વજન્મેહજન્મકૃતાનાઙ્કર્મણામપ્રવેશેન પ્રારબ્ધસ્ય તસ્ય કુલાલચક્રભ્રમણવદાશરીરાન્તમવસ્થાનમ્ । નનુ પ્રારબ્ધશેષવતામપ્યવિમુક્તનિષ્ક્રમણં કથમિતિ ચેત્, ઈશ્વરાનુગ્રહાભાવાદિતિ બ્રૂમઃ । “જડાનાં કર્મણાં ચેતનેશ્વરસહાયાપેક્ષે’તિ ન્યાયાત્ । તથાચસ્કન્દઃ-

ઈશ્વરાનુગ્રહાદેવકાશીવાસઃ સુદુર્લભઃ ।
સુલભઃ સ્યાન્મુને! નૂનં નરૈઃ સુકૃતકોટિભિઃ ॥

ઇતિ । કાશીવાસિકૃતકર્મણામસઙ્ખ્યાન્નોપદેશ ઇતિ ચેન્ન, અવિમુક્તસ્યોપરત્વાત્ ।

"ઊષરઃ પુણ્યપાપાનાં ધન્યા વારાણસી પુરી"
"ઇદં પ્રિયે! ક્ષેત્રમતિપ્રિયં મે સંસારબીજોષરમૂષરાણામ્" ઇત્યાદિવચનનિચયૈરૂપરત્વં સઙ્ગૃહ્યતે ।
"વારાણસ્યાં કૃતં પાપં વજ્રલેપો ભવિષ્યતિ"
"યથાત્ર પુણ્યં કૃતમક્ષયં સ્તાત્તથાઽત્ર પાપ'મિત્યાદિવાક્યવિરોધાદિતિ ચેન્ન, તેષામન્યવિષયત્વાત્ । અત્રકૃતદુષ્કૃતાનામન્યત્ર પ્રાપ્તમરણપરત્વાત્ ।
"અશ્મના ચરણૌ હત્વા તત્રૈવ નિધનં વ્રજેત્"
ઇત્યાદિવાક્યાન્યેતદર્થાન્યેવ । તર્હિ યથેષ્ટાઽઽચરણપ્રસઙ્ગ ઇતિ ચેન્ન, અવિધાનાત્ । નહ્યગ્નિહોત્રાદિવદ્બ્રાહ્મણહનનાદિવિધિઃ શ્રૂયતે, પ્રત્યુત નિષેધશ્ચ શ્રૂયતે ।
અશનં વસનં વિત્તં યેષાં કાશ્યામમાર્ગતઃ ।
કીકટેન સમા કાશી સત્યં સત્યં ખગાધિપ! ॥
ઇત્યાદિવાક્યૈર્યથેષ્ટાઽઽચરણપ્રતિષેધ એવ ક્રિયતે, નત્વનુજ્ઞાપ્યતે । અવિધેયત્વેઽપિ કેષાઞ્ચિદ્વિરુદ્ધાચરણાઽઽદૃતિર્દૃશ્યત એવેતિ ચેત્સત્યમ્, તસ્યાશ્ચાત્રૈવ નિરસનાત્ । કાશીકૃતપાપિનો દણ્ડધરેણ શ્રીકાલભૈરવેણ ત્રિંશત્સહસ્રસઙ્ખ્યાકં કાલં નાનાયોન્યગ્નૌ પચ્યન્તે । તર્હિ "શરીરિણાં નાસ્તિ પુનઃ શરીર'મિત્યાદિસાયુજ્યવચનનિચયવ્યાકોપ ઇતિ ચેન્ન, પ્રાણોત્ક્રમણક્ષણક્ષણેન ભોગ્યત્વાત્ । તથાહિ - સકલસંસારસ્ય માયામયત્વાત્ યથા સ્વપ્ને મનોરથે વા દેશાન્તરરૂપાન્તરસંવત્સરશતાનુભવઃ, યથા માર્કણ્ડેયસ્ય સપ્તકલ્પાનુભવઃ, યથા નારદસ્ય સ્ત્રીત્વાદ્યવાપ્તિઃ, લવણસ્ય વા માતઙ્ગસ્ત્રીપુત્રાગ્નિપતનમ્ । સ્વપ્નાદિસંસારસ્યાસત્યત્વં માર્કણ્ડેયાદિસંસારસ્ય સત્યત્વં કથમિતિ ચેત્, વાસનાદાર્ઢ્યાદિતિ બ્રૂમઃ । સ્વપ્ને હિ વાસનાશૈથિલ્યમ્, અન્યદા દાર્ઢ્યમનુભૂયત એવ । તસ્માદસ્મિન્નેવ શરીરે પ્રાણોત્ક્રમણકાલે યથેષ્ટાઽઽચરણફલાનુભવાન્તે તારકબ્રહ્મોપદેશાદ્વિદેહતૈવ । "મુક્તિરેકેન જન્મને'ત્યુક્તત્વાત્ । તર્હિ "યદસ્તિકણ્ઠે ગરલ'મિત્યાદિવાક્યૈર્દેહાવાપ્તૌ ન સાયુજ્યમિતિ ચેન્ન, તસ્યાઃ ક્રમપરત્વાત્ । તારકબ્રહ્મોપદેશસમાનત્વેઽપીશ્વરાનુગ્રહશૈથિલ્યાન્મુમૂર્ષોરન્તઃકરણવૈકલ્યાદ્વાપરોક્ષજ્ઞાનોત્પત્તાવયોનિ(ગલ)જગરલાદિસારૂપ્ય સમ્યગીશ્વરાનુગ્રહાદપરોક્ષજ્ઞાનેન સાયુજ્યમાપ્નોતીતિ તારકબ્રહ્મોપદેશાન્નિર્વિક્ષેપો મોક્ષ ઇતિ સિદ્ધમ્ ॥ ૧॥

ઇતિ આનન્દનિધિટીકાયાં પ્રથમકણ્ડિકા સમાપ્તા ।

## અથ દ્વિતીયકણ્ડિકા ।

પ્રથમકણ્ડિકાનિર્દિષ્ટસ્ય તારકબ્રહ્મણઃ સ્વરૂપકથનાર્થેયં દ્વિતીયા કણ્ડિકાઽઽરભ્યતે અથેતિ ।
અથ હૈનં ભરદ્વાજઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં કિં તારકં કિં તરતીતિ ॥ ૧॥
સહોવાચ યાજ્ઞવલ્ક્યસ્તારકં દીર્ઘાનલં બિન્દુપૂર્વકં દીર્ઘાનલં પુનર્માય નમશ્ચન્દ્રાય નમો ભદ્રાય નમઃ ઇત્યોં તદ્બ્રહ્માત્મકાઃ સચ્ચિદાનન્દાખ્યા ઇત્યુપાસિતવ્યમ્ ॥ ૨॥
અથ - ગુરુપ્રશ્નસમનન્તરમેવાઽઽહ, ગૌરવાર્થમ્ । એનં- યાજ્ઞવલ્ક્યં ભરદ્વાજઃ-ઋષિઃ પપ્રચ્છ- કિં તારકમ્ । પૂર્વં "તારકમ્બ્રહ્મ વ્યાચષ્ટે" ઇત્યેવોક્તમ્, નતુ તત્સ્વરૂપમિતિ તત્પૃચ્છતિ- કિન્તરતીતિ । તરણવિષયઃ પ્રશ્નઃ । ઇતિશબ્દઃ પ્રશ્નદ્વયસમાપ્તૌ । નહિ સાધનફલપરિજ્ઞાનેન અન્યજ્જ્ઞેયમવશિષ્યત ઇતિ ભાવઃ । "જ્ઞાને પરિસમાપ્યત"

ઇતિ સ્મૃતેઃ । સઃ- યાજ્ઞવલ્ક્યઃ હ ઉવાચ । તારકમિતિ પૂર્વોક્તમનૂદ્ય કથયતિ । તારમિતિ પાઠે ૐકારપૂર્વકત્વમુક્તં ભવતિ, ૐકારસ્ય તારનામત્વાત્ । તદુક્તમ્પ્રપઞ્ચસારે
શ્રીમદાચાર્યૈઃ -
ૐકારો ગુણબીજં પ્રણવસ્તારો ધ્રુવશ્ચ વેદાદિઃ ।
આદિરુમધ્યો મપરો નામાન્યસ્ય ત્રિમાત્રિકશ્ચ તથા ॥
અસ્ય તુ વેદાદિત્વાત્ સર્વમનૂનાં પ્રયુજ્યતે ચાદૌ ।
ઇતિ । દીર્ઘાનલં - દીર્ઘાકારયુક્તમનલમગ્નિબીજમ્ । ઋલૃદીર્ઘ દ્વયરહિતાનાંષણ્ણામપ્યાકારાદીનાં દીર્ઘશબ્દવાચ્યત્વેઽપિ પ્રથમાઽતિક્રમે કારણાભાવાદાકારસ્યૈવ આનન્દપદનિર્વર્ત્યત્વાચ્ચ પ્રકાશભૂતેનાઽનલેન આકારયોજનમેવાઽનવદ્યમ્ । બિન્દુપૂર્વકં-બિન્દુઃ પૂર્વો જન્મભૂઃ, બિન્દોઃ સકાશાત્પૂર્વં જન્મ યસ્યે"તિ વા । બિન્દુપૂર્વમેવ બિન્દુપૂર્વકમ્, સ્વાર્થે કઃ । શબ્દસૃષ્ટ્યાદૌ "તમ એવાગ્ર આસી"દિત્યનયા શ્રુત્યા સચ્છબ્દવાચ્યમવિદ્યાશબલં બ્રહ્મૈવોક્તમ્ । તદીક્ષણેન ક્ષુભિતગુણા વંશશકલકરણવત્ કૃત્તતરાઽવિદ્યા કલા વ્યક્તં ચેત્યુચ્યતે । તતઃ શબ્દાર્થગર્ભવત્યવિદ્યા બિન્દુર્મહત્તત્ત્વં ચેત્યભિધીયતે । "મહતોઽહઙ્કારઃ, તતઃ પઞ્ચતન્માત્રાણિ, તેભ્યો ભૂતાનિ, તેભ્યોઽખિલં જગત્'ઇત્યર્થસૃષ્ટિક્રમઃ । બિન્દોર્નાદઃ, સ ચ પરાપશ્યન્તીમધ્યમાવૈખર્યાખ્યામવસ્થામનુભૂય સ્વરવર્ણપદવાક્યાત્મકો ભવતીતિ શબ્દસૃષ્ટિક્રમઃ । પરસ્ય શબ્દાત્મનો બ્રહ્મણશ્ચતસ્રોઽવસ્થાઃ સમામનન્તિ તત્ત્વવિદઃ ।
આદ્યા તાવત્ પરેતિ ગીયતે । યા ખલુ આદ્યા-શક્તિરિતિ શાક્તૈઃ, ચિતિરિતિ શૈવૈઃ, કુણ્ડલિનીતિ યોગિભિઃ, પ્રકૃતિરિતિ સાઙ્ખ્યૈઃ, બ્રહ્મેતિપારાશર્યૈઃ, બુદ્ધિરિતિ બૌદ્ધૈઃ, સ્વશક્ત્યુમિષિતગોત્વાદ્યપાધિરહિતા મહાસત્તેતિ જાતિવાદિભિઃ,તથાવિધોપાધિરહિતં કેવલં દ્રવ્યમિતિ દ્રવ્યવાદિભિરેકાઽપ્યનેકૈર્નામભિર્વ્યવહ્રિયતે । યાં ચોત્તરાયામવસ્થાયાં નિર્જૈકાશ્રયમાયાખ્યશક્તિકલ્પિતાનેકોપાધિભેદાભિન્નસ્વરૂપામાચક્ષતે વિચક્ષણાઃ । યયા ચ પ્રકાશમય્યા સ્વાભિન્નતયા વિશ્વં પ્રકાશ્યતે । યસ્યૈ વાઽવિદ્યા શાશ્વતિકવિરોધાઽપિ નિત્યસન્નિહિતાઽપિદ્રોગ્ધુન્ન શક્નોતિ । યસ્યાશ્ચ મહોદન્વદમ્ભસ્તતેરિવોદબિન્દુસઞ્ચય ઇવોદઞ્ચતિ પ્રપઞ્ચઃ । યસ્યાઃ કિલાર્ચિઃકણાઃતારાતારાપતિતરણિતનૂનપાત્પ્રભૃતયઃ । યસ્યાં ચ બુદ્ધાવિવ માયાશક્તિનિશાયામિવાઽપગતતમસિ પ્રભાતાયાં સંસારઃ સ્વપ્ન ઇવ સંલીયતે । સૈવ પરાખ્યા શક્તિરનાદિવાસનાપર્યાયાઽવિદ્યાખ્યસ્વશક્તિક્ષોભ્યપ્રાણાસુપ્તોત્થિતેવ યદા વિમર્શોન્મુખી ભવતિ, તદા પશ્યન્તીત્યુચ્યતે । સા દ્વિતીયાવસ્થા ભણ્યતે । યદા પુનઃ સા પ્રાપ્તવિમર્શદશા સ્વાશ્રયાઽવિદ્યાશક્તિપરિકલ્પિતં સ્વસ્યૈવ વિવર્તભૂતંસ્વત્વાનુસ્યૂતમનાદિવાસનાનુકૂલસમયાનુરૂપં સ્વસ્પાદાભિન્નમપિ ભિન્નમિવ વિમૃશન્તી પદાર્થજાતમાભ્યન્તરં બાહ્યં ચ બુદ્ધિપ્રતિભાસલક્ષણં રાગાદિદુષ્ટતયાઽન્તઃકરણસ્ય સમ્મુગ્ધં ગૃહ્ણાતિ, તદા મધ્યમેત્યામ્નાયતે । તાં તૃતીયામવસ્થામાહુઃ । અસ્યામેવાવસ્થાયાં પરાયાઃ શક્તેર્યો વિમર્શોઽંશઃ સ વાચકઃ શબ્દોઽભિધીયતે । યસ્તુ વિમૃશ્યોઽંશઃ સ વાચ્યોઽર્થ ઇતિ વ્યપદિશ્યતે । યઃ પુનરૈકાત્મ્યાવભાસઃ, સ શબ્દાર્થયોર્વાચ્યવાચકભાવાખ્યઃ સમ્બન્ધો નિગદ્યતે । તતશ્ચ શબ્દાર્થસમ્બન્ધાનામનાદિસિદ્ધત્વમ્ । તથાચોક્તં - "સિદ્ધે શબ્દાર્થસમ્બન્ધે ચે'તિ । સિદ્ધે શબ્દેઽર્થે સમ્બન્ધે ચેતિ । એવં કૃત્વા વિમર્શાખ્યશબ્દાનુવિદ્ધત્વાદ્વિમૃશ્યાખ્યપ્રપઞ્ચપ્રજ્ઞાનતાયાઃ, પ્રપઞ્ચસ્ય શબ્દવિવર્તત્વં સિદ્ધં ભવતિ

। સૈવ યદા વિમર્શવિમૃશ્યોભયભાવસ્પર્શિની તાલ્વોષ્ઠાદિસ્થાનવિવૃત્તત્વાદિકરણજનિતૈર્નાદવિશેષૈઃ કૃતસંસ્કારાઽન્તઃકરણવૃત્ત્યા ક્રમવશાન્નાદમયી ચ પરિગૃહ્યતે, તદા વૈખરીત્યામ્નાયવિદ્ભિરામ્નાયતેચતુર્થી અવસ્થા બિન્દોઃ । તદુક્તં -

વૈખરી શબ્દનિષ્પત્તિર્મધ્યમા શ્રુતિગોચરા ।

ઉદ્યતાર્થા ચ પશ્યન્તી સૂક્ષ્મા વાગનપાયિની ॥

ઇતિ । અતઃશબ્દસૃષ્ટેર્બિન્દુપૂર્વકત્વાત્ વટકણિકાનિદર્શનેન

બિન્દુશિરસ્કન્તારકાદ્યમ્બીજમુદ્ધરેત્ । મકારશ્ચૈતન્યાઽવદ્યોતકોઽમૃતરૂપશ્ચન્દ્રસ્તદાકારવાન્ બિન્દુઃ, તદ્યોજનયા પ્રકાશાનન્દચિદાત્મકં બીજમુદ્ધૃતં ભવતીત્યભિપ્રાયઃ । "મઃ શિવશ્ચન્દ્રમા વેધે'તિકોશકારાઃ । બિન્દુપૂર્વકમિતિ બિન્દુગ્રહણં કલાનાદયોરુપલક્ષણમ્ । તતશ્ચ મન્ત્રબીજમસ્તકે નાદબિન્દુકલાઃ પ્રદર્શયેત્ । અતોઽર્થસૃષ્ટિર્વાચ્યા, શબ્દસૃષ્ટિસ્તુ વાચિકા । તદુક્તં -

ન સોઽસ્તિ પ્રત્યયો લોકે યઃ શબ્દાનુગમાદૃતે ।

અનુવિદ્ધમિવ જ્ઞાનં સર્વં શબ્દેનગૃહ્યતે ॥

ઇતિ । દીર્ઘાનલં પુનઃ - અનુક્તત્વાદ્બિન્દુરહિતં તદેવ પુનરુદ્ધરેત્ । "માય નમ" ઇતિ યોજનાયાં ષડક્ષરં તારકસ્વરૂપમુક્તં ભવતિ । સબીજેન રામપદેન "ચન્દ્રાય નમ" ઇતિ યોજનીયમ્, તથા "ભદ્રાય નમ" ઇતિ । એવં મન્ત્રત્રયં ભવતિ । નનુ સબીજેન રામપદેન ચન્દ્રભદ્રપદયોજનયાઽષ્ટાક્ષરમન્ત્રદ્વયસામાનાધિકરણ્યાન્મન્ત્રત્રયમપિ તારકબ્રહ્મવિદ્યા સ્યાત્ । ન સ્યાત્, ષડક્ષરમન્ત્રરાજસ્યૈવ સર્વાત્મકત્વપ્રદર્શનાત્ ।

બ્રહ્માદીનાં વાચકોઽયં મન્ત્રોઽન્વર્થાદિસંજ્ઞિતઃ ।

સર્વવાચ્યસ્ય વાચકઃ ॥

ઇતિ શ્રીરામપૂર્વતાપિનીયશ્રુતિવ્યાખ્યાનાવાસરે સર્વાત્મકત્વં વ્યાખ્યાતમ્ ।

"સર્વેષાં રામમન્ત્રાણાં મન્ત્રરાજઃ ષડક્ષરઃ"

ઇત્યગસ્ત્યસંહિતાયાઞ્ચ । અતઃ સર્વેષામેકાક્ષરાદીનાં રામાનુષ્ટુપ્મધ્યાનાંરામસહસ્રાક્ષરાન્તાનાંશ્રીરામમન્ત્રાણાં સર્વેષાં ગણેશાદિચતુર્ણાં (મન્ત્રાણાં)સકલવેદાનાં કલ્પાનાંલોકાનાં ચાર્થવચાકત્વેન સર્વાત્મકત્વાત્ ષડક્ષરમમન્ત્ર એવાઽનેકપ્રકાશકાંઽશુમાલીવ તારકસ્વરૂપં નાન્યદિતિ । નનુ "ઉક્તમન્ત્રદ્વયાત્મકમેવાસ્તુ, સહપઠિતત્વાત્ । ન, સર્વમન્ત્રાણામુપલક્ષણાર્થત્વેનોક્તેઃ । ન કેવલં સર્વપ્રપઞ્ચકાર્યભૂતમેવ તારકમ્, કિન્તુ સકલકારણૐકારાત્મકમપીત્યાહ - ઇત્યામિતિ । ઇતિ - ઉક્તપ્રકારં ષડક્ષરં તારકં ૐ-ૐકારાત્મકં ભવતિ । નહ્યેતસ્માદન્યઽૐકારઃ, ૐકારાદેતદન્યદપિનેત્યર્થઃ । એવં યસ્માત્, તત્-તસ્માત્ બ્રહ્માત્મકાઃ સચિદાનન્દાખ્યા ઇત્યુપાસિતવ્યમ્ । ષડપિ મન્ત્રવર્ણા બ્રહ્માત્મકાઃ- બ્રહ્મવાચકત્વાદ્બ્રહ્મસ્વરૂપાઃ । સચ્ચિદાનન્દાખ્યાઃ- સચ્ચિદાનન્દરામાવબોધકત્વાદ્ગૌણ્યા વૃત્ત્યા તદાખ્યાઃ, પઞ્ચવર્ણાનાં સચ્ચિદાનન્દબીજાદ્યત્વાદ્વા । ઇતિ તારાવયવતારકબ્રહ્માક્ષરાણામૈક્યસમ્પાદનેન ષડક્ષરં તારકમેવોપાસિતવ્યમ્ । કૃતાધિકારિભિઃ સાધનચતુષ્ટયસમ્પન્નૈર્મુમુક્ષુભિઃ પરમહંસપરિવ્રાજકૈરેતદેવાર્થપુરઃસરં જપેનોપાસિતવ્યમિત્યર્થઃ ।

તદેવ તારતારકયોરૈક્યમાહ- અકાર ઇત્યાદિના ।

અકારઃ પ્રથમાક્ષરો ભવત્યુકારો દ્વિતીયાક્ષરો ભવતિ મકારસ્તૃતીયાક્ષરો ભવતિ અર્ધમાત્રશ્ચતુર્થાક્ષરો ભવતિ બિન્દુઃ પઞ્ચમાક્ષરો ભવતિ નાદઃ ષષ્ઠાક્ષરો ભવતિ તારકત્વાત્તારકો ભવતિ । તદેવ તારકં બ્રહ્મ ત્વં વિદ્ધિ તદેવ ઉપાસ્યમિતિ જ્ઞેયમ્ । ગર્ભજન્મજરામરણસંસારમહદ્ભયાત્સન્તારયતીતિ તસ્માદુચ્યતે તારકમિતિ ॥ ૩॥

"અકારઃ પ્રથમાક્ષરો ભવતિ'- અકારઃ પ્રણવાવયવઃ, પ્રથમમક્ષરં રામમન્ત્રસ્ય ભવતિ । લિઙ્ગવિપર્યયશ્છાદસઃ । તથા "ઉકારો દ્વિતીયાક્ષરો ભવતિ'। ઉકારોઽપ્યકારાન્તર્ગત એવ બોદ્ધવ્યો વાસુદેવત્વાત્ । "મકારસ્તૃતીયાક્ષરો ભવતિ, અર્ધમાત્રશ્ચતુર્થાક્ષરો ભવતિ'। "અર્ધમાત્ર" ઇત્યવયવત્વેન પુંલ્લિઙ્ગત્વમ્ । "બિન્દુઃ પઞ્ચમાક્ષરો ભવતિ, નાદઃ ષષ્ઠાક્ષરો ભવતિ" સર્વાર્થવાચકત્વાત્ । ષણ્ણામપિ ષડવયવાર્થવાચકત્વમિતિ સિદ્ધમ્ । એવમુભયોરેકાર્થવાચકત્વેન સઙ્ખ્યાસામાન્યેન ચ તાદાત્મ્યમનુભૂય સર્વાવસ્થાસ્વેતદેવોપાસિતવ્યમ્ । તારસ્ય સિદ્ધાદિદોષાનુક્તેસ્તારાવયવાનાં મન્ત્રાક્ષરૈક્યેન મન્ત્રગતસિદ્ધાદિદોષનિરસનાત્ "રુદ્રસ્તારકં બ્રહ્મ વ્યાચષ્ટે" ઇતિ સ્વયમેવ શ્રુતિરધિકારિતારતમ્યચિન્તાં ઝટિતિ સાક્ષાત્કારફલાદર્થં પહિરતિ । એવં તારકત્વં સિદ્ધવત્કૃત્ય "તારાત્મત્વાત્ સર્વસમ્ભારભયતારણાદ્વે'તિ ગૂઢાભિસન્ધ્યાઽભિહિતં પૂર્વોક્તં હેતુદ્વયં વિવૃણ્વતી તારકનિર્વચનમાહ-તારકત્વાત્તારકો ભવતીતિ । તારકત્વાત્ -તારકાત્મકત્વાદયમ્મન્ત્રસ્તારકો ભવતિ । અતો મયા યદુક્તં તદેવ જ્ઞાતવ્યં નાન્યદિત્યાહ - તદેવ તારકં બ્રહ્મત્વં વિદ્ધીતિ । અન્યવ્યાવૃત્ત્યર્થમવધારણમ્ ।

"નાઽનુધ્યાયાત્બહૂન્ શબ્દાન્ વાચો વિગ્લાપનં હિ તત્"

ઇતિ વિજાતીયશ્રવણનિષેધાત્ । જ્ઞાત્વા ચ તદેવોપાસ્યમિત્યાહ-તદેવોપાસ્યામિતિ જ્ઞેયમિતિ । તદેવજ્ઞેયમુપાસ્યમિતિ યોજના । અન્યમન્ત્રવાક્યનિચયવિચારણં વિહાય તદેવ તારકમેવોપાસિતવ્યમિતિ । શિષ્યશિક્ષાર્થમવધારણમ્ । એવં પ્રથમહેતું વિવિચ્ય દ્વિતીયમાહ-ગર્ભજન્મજરામરણસંસારમહદ્ભયાત્તારયતીતિ । યસ્માદેવમ્, તસ્માદુચ્યતે-તારકમિતીતિ ।

કિં તારકમિતિ પ્રશ્નસ્યોત્તરમુક્ત્વા, કિં તરતીત્યાહ - ય ઇત્યાદિ આકણ્ડિકાન્તમ્ ।

ય એતત્તારકં બ્રાહ્મણો નિત્યમધીતે સ પાપ્માનં તરતિ સ મૃત્યું તરતિ સ બ્રહ્મહત્યાં તરતિ સ ભ્રૂણહત્યાં તરતિ સ વીરહત્યાં તરતિ સ સંસારં તરતિ સ સર્વં તરતિ સોઽવિમુક્તાત્માશ્રિતો ભવતિ સ મહાન્ ભવતિ સોઽમૃતત્વં ચ ગચ્છતિ ॥

ઇતિ દ્વિતીયકણ્ડિકા ।

## અથ તૃતીયકણ્ડિકા ।

ય એતત્તારકં બ્રાહ્મણો નિત્યમધીતૈતિ । "યો બ્રાહ્મણઃ "તસ્માદ્બ્રાહ્મણઃ પાણ્ડિત્યં નિર્વિદ્ય બાલ્યે ન તિષ્ઠાસે'દિત્યાદિશ્રુત્યુક્તો બ્રાહ્મણઃ, બ્રહ્મબુભુત્સુરિતિ યાવત્ । એતત્તારકં નિત્યમધીતે- અર્થાનુસાન્ધાનેન કેવલમપિ વા નિત્યં જપતિ, સ પાપ્માનં તરતિ । પાપ્મન એવ સપ્તવિશેષણાન્યાહ-'સ મૃત્યું તરતિ સ ભ્રૂણહત્યાં તરતિ, સ બ્રહ્મહત્યાં તરતિ, સ વીરહત્યાં તરતિ, સ સર્વહત્યાં તરતિ, સ સંસારં તરતિ, સ સર્વં તરતિ'તારકબ્રહ્માધ્યયનેનપાપ્માનં તીર્ત્વા યત્પ્રાપ્નોતિ તદાહ-સોઽવિમુક્તાત્માઽઽશ્રિતો ભવતીતિ । અવિમુક્તસ્ય ય આત્મા-સ્વરૂપં પ્રથમકણ્ડિકોક્તં વિશુદ્ધબ્રહ્મણઃ અવિમુક્તાખ્યકાશ્યા વા સ્વરૂપં - બ્રહ્માત્મૈક્યમ્, તદેવાશ્રિત્ય-

અવલમ્બ્ય તિષ્ઠતિ । તારકબ્રહ્મોપાસકસ્ય યતેર્બ્રહ્માશ્રયણમેવ ભવતીતિ ભાવઃ । તદુક્તં ભગવતા- "અનિકેતઃ સ્થિરમતિ'રિતિ । "અવિમુક્તમાશ્રિતો ભવતી"તિ પાઠે-નિરસ્તસમસ્તોપાધિકં બ્રહ્માત્મસ્વરૂપમવિમુક્તશબ્દેન લક્ષણયોચ્યતે, તમાશ્રિતો ભવતિ । તદ્રૂપો ભવતીત્યર્થઃ । સ મહાન્ ભવતિ - ત્રૈલોક્યપૂજ્યો ભવતિ । સોઽમૃતત્વં ગચ્છતિ-નિરાવરણં કૈવલ્યમાપ્નોતિ । અવિમુક્તાત્માશ્રિતાઽમૃતત્વપદયોર્જીવન્મુક્તિવિદેહમુક્તિભેદેનાઽર્થભેદો જ્ઞાતવ્યઃ । અસ્ય મન્ત્રસ્ય મહિમાનં ભગવાન્ ભવાનીવલ્લભઃ પ્રિયઃ પરમાત્મા શ્રીરામચન્દ્ર એવ જાનાતિ નેતરઃ । ઇતિશબ્દઃ પ્રશ્નદ્વયસ્યોત્તરદ્વયસમાપ્તૌ ॥ ૨॥

ઇતિ આનન્દનિધિટીકાયાં દ્વિતીયકણ્ડિકા સમાપ્તા ।

## અથ તૃતીયકણ્ડિકા ।

પ્રથમકણ્ડિકયા નિર્દિષ્ટસ્ય તારકબ્રહ્મણઃ, તદનન્તરિતયા તારતારકૈક્યેન તત્સ્વરૂપં પ્રદર્શ્ય, તૃતીયયા તસ્ય વાચકસ્ય વાચ્યમર્થમભિનયન્ વાચ્યવાચકયોરૈક્યકૃતાતિશયત્વેન સ્વયમેવાહ-યાજ્ઞવલ્ક્યઃ । નનુ કિં તારકં કિં તરતીતિ પ્રશ્નાર્થનિરૂપણેનોપક્ષીણત્વાદ્વાક્યસ્યાતોઽપૃષ્ટમર્થકથનમકાણ્ડતાણ્ડવિતમનુસરતિ, વક્તવ્યાનામનન્તત્વાત્ । ન, કિં તારકમિતિ પ્રશ્નસ્યૈવ શેષાવશિષ્ટત્વાત્ । નહિ વાચ્યમર્થમન્તરેણ વાચકસ્ય પર્યવસાનં દૃષ્ટં શ્રુતં વા । અતસ્તસ્યૈવાર્થકથનમાહ-અથેતિ ।

અથૈતે શ્લોકા ભવન્તિ ।<br>
અકારાક્ષરસમ્ભૂતઃ સૌમિત્રિર્વિશ્વભાવનઃ ।<br>
ઉકારાક્ષરસમ્ભૂતં શત્રુઘ્નસ્તૈજસાત્મકઃ ॥ ૧॥<br>
પ્રાજ્ઞાત્મકસ્તુ ભરતો મકારાક્ષરસમ્ભવઃ ।<br>
અર્ધમાત્રાત્મકો રામો બ્રહ્માનન્દૈકવિગ્રહઃ ॥ ૨॥<br>
શ્રીરામસાન્નિધ્યવશાજ્જગદાનન્દદાયિની ।<br>
ઉત્પત્તિસ્થિતિસંહારકારિણી સર્વદેહિનામ્ ॥ ૩॥<br>
સા સીતા ભવતિ જ્ઞેયા મૂલપ્રકૃતિ સંજ્ઞિતા ।<br>
પ્રણવત્વાત્પ્રકૃતિરિતિ વદન્તિ બ્રહ્મવાદિનઃ ॥ ૪॥

અથ- તારકસ્વરૂપકથનાનન્તરં તદર્થભૂતા એતે-શ્રુતિપ્રસિદ્ધવાક્યપ્રમાણાશ્ચત્વારઃ શ્લોકા ભવન્તિ । અકારશ્ચાસાવક્ષરં ચ તસ્માત્સમ્ભૂતઃ - સમ્યગ્ જાતઃ । અર્થસૃષ્ટેઃ પશ્ચાદ્ભાવિત્વાદકારેણાઽવભાસિતઃ અકારવાચ્યઃ, અકારાર્થં ઇતિ યાવત્ । સૌમિત્રિઃ-સુમિત્રાસુતઃ વિશ્વભાવનઃ-જાગ્રદવસ્થાનઃ, જાગ્રદવસ્થાયાં વિશ્વં સઙ્કલ્પયતીતિ તથા । જાગ્રદવસ્થાસાક્ષ્યાત્મા વિશ્વ ઇત્યર્થઃ । તથા ઉકારાર્થમકારાર્થાઽર્ધમાત્રાર્થાઃ સ્વપ્નસુષુપ્તિતુરીયસાક્ષિણસ્તૈજસપ્રાજ્ઞાનન્દાઃ શત્રુઘ્નભરતરામા જ્ઞાતવ્યાઃ । તત્ર બ્રહ્માનન્દૈકવિગ્રહઃ, બ્રહ્મ ચાસાવાનન્દશ્ચ સ એવૈકો વિગ્રહઃ-શારીરં યસ્ય સ તથા । શ્રીરામસાન્નિધ્યવશાત્- રામશબ્દસ્ય શ્રીપૂર્વત્વં ભક્ત્યતિશયાધાનાર્થમ્ । રામસાક્ષાત્કારસ્યૈવ પરમપુરુષાર્થત્વાપત્તેઃ । "યો વા એતદક્ષરં ગાર્ગ્યવિદિત્વા અસ્માલ્લોકાત્પ્રૈતિ સ કૃપણઃ"।

કિં તેન ન કૃતં પાપં ચૌરેણાઽઽત્માપહારિણા ।
યોઽન્યથા સન્તમાત્માનમન્યથા પ્રતિપદ્યતે ॥

ઇતિશ્રુતિસ્મૃતિભ્યાં પુરુષાર્થાપ્રયત્ને વિનિન્દનશ્રવણાચ્ચ । તસ્ય બ્રહ્માનન્દવિગ્રહસ્ય શ્રીરામસ્ય સાન્નિધ્યં નામ આશ્રયઃ । લૌકિકમાયાવત્ સ્વાશ્રયાવ્યામોહકત્વેન સ્વસ્ય ચ જડત્વેન તદાશ્રયણં સદ્રશત્વં ચ નાનુચિતમતઃ સાન્નિધ્યવશાચ્ચિદાભાસબલલાભાત્ । જગદાકારકારિણી, જગત આકારસ્તત્કુરોતીતિ તથા । ઉત્પત્તિસ્થિતિસંહારકારિણી સર્વદેહિનામ્, સર્વેષાં દેહિનાં-આકારિતાનાં તેષામુત્પત્ત્યાદિકારિણી । યા ચ "મૂલપ્રકૃતિરવિકૃતિ'રિત્યુક્તનામ્ની, સા સીતા ભવતિ જ્ઞેયા- સીતેતિ જ્ઞેયા ભવતિ । પ્રકૃતિનિર્વચનમાહ- પ્રણવત્વાત્પ્રકૃતિરિતિ વદન્તિ બ્રહ્મવાદિનૈતિ । "ણૂસ્તુતા'ધિત્યસ્ય ધાતોઃ પ્રણૂયતે - પ્રસ્તૂયતે મહદાદ્યાકારનિર્માણં યયા સા પ્રણવા તસ્યા ભાવસ્તત્ત્વં તસ્માત્પ્રણષત્વાત્, પ્રકર્ષેણ ક્રિયતેઽનયેતિ પ્રકૃતિઃ, બ્રહ્મપ્રણવમૂલો વેદસ્તદ્વદનશીલા વિચારપરાઃ વદન્તિ-કથયન્તિ । "માયા વ્યક્તં પ્રકૃતિઃ સીતે'તિ પર્યાયાઃ । તથાચશ્રીરામાયણેરામં પ્રતિ કાલોક્તમુપનિબબન્ધાઽઽદિકવિર્ભગવાન્વાલ્મીકિઃ-

સઙ્ક્ષિપ્ય હિ પરાંલ્લોકાનેકસ્ત્વં માયયા સહ ।
ભાર્યયા શુભયા દેવ્યા માં ત્વં પૂર્વમજીજનઃ ॥

ઇતિ । જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયસાક્ષિત્વેનોક્તવિશ્વતૈજસપ્રાજ્ઞેશ્વરાઃ સૌમિત્રિશત્રુઘ્નભરતરામાસ્તેષામૈક્યેઽપ્યનેકત્વકર્ત્રી સીતા ચેત્યેતાવાનેવ સ્થૂલસૂક્ષ્મસર્વપ્રપઞ્ચ ૐકારાત્મકસ્ય તારક- બ્રહ્મણોઽર્થ ઇતિ । ઉપસંહૃતાવિતિશબ્દઃ । નતુ "અકારાક્ષરસમ્ભૂત" ઇત્યાદિના ૐકારસ્યૈવાર્થઃ પ્રદર્શિતઃ, નતુ ષડક્ષરતારકસ્યેતિ ચેન્ન, તારતારકયોરભેદપ્રદર્શનાત્ । પૂર્વં "ૐકારાત્મકત્વેન ષડક્ષરં તારકં બ્રહ્મ પ્રાધાન્યેનોપાસિતવ્ય-'મિત્યુક્તમ્, ઇદાનીં તારકષડક્ષરાત્મકત્વેન ૐકારપ્રાધાન્યેનેત્યુચ્યતે । તત્ર બ્રહ્મચર્યગૃહવાનસ્થાભિપ્રાય આદ્યઃ પ્રકારઃ । દ્વિતીયસ્તુચતુર્થાશ્રમાભિપ્રાયેણ । ઇદાનીં ૐકારોપાસનયા ક્રમેણ મુક્તિપ્રકારમાહ-ઓમિત્યેતદક્ષરં સર્વમિત્યાદિના યાવત્કણ્ડિકાસમાપ્તિ ।

ઓમિત્યેતદક્ષરં સર્વં તસ્યોપવ્યાખ્યાનં ભૂતં ભવ્યં ભવિષ્યદિતિ સર્વમોઙ્કાર એવ । યચ્ચાન્યત્ત્રિકાલાતીતં તદપ્યોઙ્કાર એવ । સર્વં હ્યેતદ્ બ્રહ્મ, અયમાત્મા બ્રહ્મ । સોઽયમાત્મા ચતુષ્પાજ્જાગરિતસ્થાનો બહિઃપ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ સ્થૂલભુગ્વૈશ્વાનરઃ પ્રથમઃ પાદઃ ॥ ૫॥

ઓમિત્યેતદક્ષરં સર્વમિતિ । સર્વં - વાચ્યમર્થજાતં ૐઇત્યેતદક્ષરં-ૐકારરૂપમેવાક્ષરમ્ । અક્ષરરૂપશ્રીરામપરમાર્થપ્રદત્વાત્તદક્ષ । સર્વવાગાત્મકે ૐકારે ભાવાભાવાત્મકસર્વાર્થવાચ્યવાચકત્વં નાઽસમઞ્જસમિતિ ભાવઃ । "વાગ્વા ૐકાર" ઇતિ, "તદ્યથા શઙ્કુના સર્વાણિ પર્ણાનિ સન્તૃણ્ણાન્યેવમોઙ્કારેણ સર્વા વાક્સન્તૃણ્ણે'તિ ચ, "ૐકારો વૈ સર્વાવાક્" ઇત્યાદિશ્રુતિભિઃ ૐકારસ્ય સર્વવાગાત્મકત્વમભિધીયતે । ૐકારેણાઽવભાસ્યમાનત્વાત્સર્વં ૐકારાત્મકમેવેતિ જ્ઞાતે સતિ કથં પરમાર્થાવાપ્તિરિત્યત આહ -તસ્યોપવ્યાખ્યાનમિતિ । તસ્ય - પરમાર્થપ્રકાશકસ્ય ૐકારસ્ય ઉપ-અક્ષરરૂપશ્રીરામપ્રતિપત્ત્યુપાયત્વાદક્ષરરૂપશ્રીરામસામીપ્યેન વ્યાખ્યાનં - વિસ્પષ્ટં પ્રકટકથનં, જાનીયાદિતિ શેષઃ । કથમિત્યત આહ -ભૂતં ભવ્યં ભવિષ્યદિતિ સર્વં ૐકારએવેતિ । કાલત્રયપરિચ્છિન્નં સમષ્ટિવ્યષ્ટ્યાત્મકં વિરાડ્હિરણ્યગર્ભરૂપં ૐકાર એવેતિ । તર્હિ કાલત્રયાતિક્રાન્તસ્ય ૐકારાત્મકત્વં ન સ્યાદિત્યત આહ- યચ્ચાન્યત્ત્રિકાલાતીતં તદપિ ૐકાર એવેતિ । યચ્ચાન્યત્ત્રિકાલાતીતં - કાર્યૈકસમધિગમ્યં કાલત્રયાઽનાકલિતં

અવ્યાકૃતાદિ, તદપિ ૐકાર એવ । એષહ્રાર્યકારણરૂપસ્યસર્વપ્રપઞ્ચસ્ય વાચ્યસ્ય વાચકત્વં ૐકારે પ્રદર્શિતમ્ । ઇદાનીં વાચ્યવાચકયોર્ભેદાત્ પરમાર્થરૂપશ્રીરામાવાપ્તિર્ન સ્યાદિત્યતસ્તયોરભેદં દર્શયતિ -સર્વં હ્યેતદ્બ્રહ્મેતિ । સર્વં - કાર્યકારણાત્મકં વાચ્યં વાચકં ૐકારં પરાદિવાક્યતુષ્ટયરૂપં પરમાર્થભૂતશ્રીરામાવભાસકમક્ષરં ચ । હિ યસ્માદિત્યર્થે । એતદુક્તરીત્યા નામરૂપાત્મકંશબ્દસૃષ્ટ્યર્થસૃષ્ટિક્રમેપૂર્વં પ્રદર્શિતં બ્રહ્મ શુદ્ધે શ્રીરામાખ્યે બ્રહ્મણ્યારોપિતમ્ । "વાચારમ્ભણં વિકારો નામધેયં મૃત્તિકેત્યેવ સત્ય'મિતિ શ્રુતેઃ ।

નનુ "સર્વં હ્યેતદ્બ્રહ્મે"ત્યત્ર "સર્વં ખલ્વિદં બ્રહ્મે"ત્યત્ર ચ સર્વાત્મકં બ્રહ્મોચ્યતે । તત્કિં સર્વં બ્રહ્મેતિ સર્વમનૂદ્ય બ્રહ્માત્મતાવિધિઃ, અથવા બ્રહ્માઽનૂદ્ય સર્વાત્મતાવિધિઃ? ન પ્રથમઃ, મિથ્યાત્વેનાઽભિમતસ્ય સર્વસ્ય બ્રહ્માત્મતાયામમિથ્યાત્વાપત્તેઃ । નહિ બ્રહ્મ મિથ્યા । ન દ્વિતીયઃ, બ્રહ્મણો મિથ્યાત્વાપત્તેઃ । નહિ મિથ્યાભૂતાત્સર્વસ્માદભિન્નમમિથ્યાભવિતુમર્હતિ ।

અત્રોચ્યતે-સર્વમનૂદ્ય તસ્ય બ્રહ્માત્મતા વિધીયતે । નચ બ્રહ્માત્મતાયાંસર્વસ્યસત્યત્વાપત્તિર્દોષાય । સર્વસ્યાપિ બ્રહ્માત્મના સત્યત્વસ્યેષ્ટત્વાત્ । તર્હિ "પ્રપઞ્ચો મિથ્યે'તિ વાચોયુક્તિરયુક્તા સ્યાદિતિ ચેન્ન, સ્વરૂપતો મિથ્યાત્વસ્ય બ્રહ્મરૂપેણસત્યભૂતત્વેઽપ્યપ્રત્યૂહત્વાત્ । નહિ સ્વરૂપેણ મિથ્યાભૂતમપિ રજતં શુક્તિરૂપેણાપિ મિથ્યા ભવતિ । નનુ તર્હિ "સુવર્ણં કુણ્ડલ'મિત્યત્રાપિ કેનચિદ્રૂપેણ સત્યત્વં કેનચિદ્રૂપેણ મિથ્યાત્વમાપદ્યેતેતિ ચેન્નૈવમ્, વૈષમ્યાત્ । તત્ર હિ સુવર્ણકુણ્ડલાંશયોરન્યતરસ્યાપિ બાધાભાવાદ્ભિનૈવબાધં સામાનાધિકરણ્યપ્રયોગાત્ । "સર્વં બ્રહ્મે'ત્યત્ર ચ સર્વસ્ય સ્વરૂપતો બાધ્યતયા બાધે સામાનાધિકરણ્યમયોગાનુપપતિઃ । ચોરઃ સ્થાણુરિતિવત્ । એતદેવશ્રીરામપૂર્વતાપિનીયે'જીવત્વેનેદમોં યસ્યે'ત્યત્ર વિશદીકૃતમ્ ।

નન્વાત્મનો વ્યતિરેકેણ કેવલસ્વરૂપનિરૂપણેન પરોક્ષેણ કથં પરમાર્થભૂતરામાવાપ્તિઃ । નહિ "સૌરં તેજો દહતી'તિ કથયા પાકનિષ્પત્તિર્દૃષ્ટા, યાવત્તન્મણૌન સ્ફુરતિ । અતો "ગુડજિહ્વિકા'ન્યાયેન પરમાર્થાપત્તિમાહ-અયમાત્મા બ્રહ્મેતિ । પૂર્વોક્તહેતોરર્થોઽત્ર દ્રષ્ટવ્યઃ । યસ્માત્સર્વં બ્રહ્મ તસ્માત્ અયં-'અયમહમસ્મી'ત્યનુભવગોચર આત્માપિ બ્રહ્મ । નહિસર્વસ્માદ્ભિન્નત્વેનનિષ્કૃષ્ય મૌઞ્જેષિકાવત્ પૃથક્ ક્રિયતે આત્મા । નન્વાત્મનઃ પ્રત્યગાત્મત્વેન સર્વસ્ય દૃશ્યત્વેન ચસર્વસ્માત્પાર્થક્યમાત્મનઃશ્રુતિસ્મૃતિપુરાણેતિહાસાદિષ્વવગમ્યત એવ । સત્યમ્, તત્કેન વા નેત્યુચ્યતે । વ્યવહારમવલમ્બ્ય પ્રથમત આત્મનો બ્રહ્મત્વં દર્શયિતું સર્વાન્તઃપાતિત્વમુક્તમ્ । સ્વરૂપેણ સર્વવ્યતિરિક્તાત્મા ત્વિદાનીં નિરૂપ્યતે । અતો ન દોષાવકાશઃ । નનુ પૂર્ણત્વાદ્બ્રહ્મણ આત્મવ્યતિરિક્તે યસ્મિન્ કસ્મિન્ વા વિશેષે બ્રહ્મસાક્ષાત્કારોદયયત્નેનાઽલમ્, કિમિતિ આત્મન્યેવેત્યાગ્રહઃ । નાયમાગ્રહઃ તત્રૈવ ન્યાય્યત્વાત્ । "અહમજ્ઞ" ઇત્યનુભવસિદ્ધાત્મનિ અજ્ઞાનાધ્યાસનિરાસપ્રયત્નસ્યૈવ પ્રાશસ્ત્યમ્ । નહિ દેવદત્તાઽઽન્ધ્યનિરાસાય યજ્ઞદત્તાઽઞ્જનપ્રયોગઃ । અત આત્મનોઽધ્યસ્તઽજ્ઞાનનિરાસોઽધ્યાસાધિષ્ઠાનવિકાસશ્ચેત્યુભયમભયદં ભવતીતિ ભાવઃ ।

ભવતુ અયમાત્મા બ્રહ્મ । તથાપિ બ્રહ્માપરોક્ષત્વં કથમાગતમિતિ ચેત્, ઉચ્યતે-અયમસ્મીત્યનુભવાદપરોક્ષ આત્મૈવ । તદુક્તં ભટ્ટપાદૈઃ-

ઇદમઃ પ્રસક્ષગતં સમીપતરવર્તિ ચૈતદો રૂપમ્ ।

અદસસ્તુ વિપ્રકૃષ્ટં તદિતિ પરોક્ષે બિજાનીયાત્ ॥

ઇતિ । યદિ પરોક્ષઃ સ્યાદાત્મા તદા તસ્ય જડત્વેન પ્રકાશત્વાનુપપત્તૌ જગદાન્ધ્યં પ્રસજ્યેત ।

“અન્ધસ્યેવાઽન્ધલગ્નસ્ય વિનિપાતઃ પદે પદે”

ઇતિ ન્યાયાત્ । અત આત્મનો બ્રહ્મત્વે બ્રહ્મણોઽપિ પારોક્ષ્યનિવૃત્ત્યાઽપરોક્ષત્વાપ્તિર્નિરાયાસત એવેત્યભિપ્રાયઃ । યદ્યપિ બૃહત્ત્વાદ્બૃંહણત્વાદ્વા બ્રહ્મપદાર્થજ્ઞાનમસ્તિ, અયમસ્મીત્યાત્મજ્ઞાનમપ્યસ્તિ । તથાપિ આત્મૈવ બ્રહ્મેતિ જ્ઞાપયતિ શાસ્ત્રમ્ । તદેવ હ્બ્રહ્માત્મૈક્યમ્પરમાર્થશ્રીરામાવાપ્તિરિત્યુક્તં ભવતિ । અયમાત્મા બ્રહ્મેત્યનેન મહાવાક્યેનોક્તમર્થં દ્રઢયિતુમ્-

“અધ્યારોપાપવાદાભ્યાં નિષ્પ્રપઞ્ચં પ્રપઞ્ચ્યતે”

ઇતિ ન્યાયેનતત્ત્વમ્પદાર્થયોરુપાસ્યોપાસકયોરારોપાપવાદદ્વારાઽખણ્ડૈકરસશુદ્ધબ્રહ્માવાપ્તિમાહ-સોઽયમાત્મા ચતુષ્પાદિતિ । સઃ-પૂર્વોક્તઃ અયમાત્મા પરાવરત્વેન વ્યવસ્થિતઃ ચતુષ્પાત્-ચતુશ્ચરણઃ કાર્ષાપણવત્, ન ગૌરિત્ર ચતુષ્પાત્ । યથાહિ-

“કાર્ષાપણસ્તુ વિજ્ઞેયઃ કાર્ષિકસ્તામ્રિકઃ પણઃ”

ઇતિ મનૂક્ત્યા કર્ષેણ-પલચતુર્થાંશેન ઉન્મિતસ્તામ્રવિકારોમાષષોડશાત્મકઃ । સ ચ પૂર્વપૂર્વપાદાનામુત્તરોત્તરમેલનેનૈવ કાર્ષાપણસઙ્ખ્યાસંજ્ઞાં લભતે નાન્યથા । તથા ત્રયાણાં વિશ્વાદીનામ્પૂર્વપૂર્વવિલાપનેનતુરીયસ્ય પ્રતિપત્તિં ગમયિતું કરણસાધનઃ પાદશબ્દઃ । કથં ચતુષ્પાત્ત્વમિત્યત આહ-જાગરિતસ્થાનૈત્યાદિના ચતુર્થં મન્યન્તે ઇત્યન્તેન । જાગરિતસ્થાનઃ, જાગરિતં સ્થાનમસ્યેતિ જાગરિતસ્થાનઃ બહિઃપ્રજ્ઞઃ-સ્વાત્મવ્યતિરિક્તે વિષયે પ્રજ્ઞા યસ્ય સ બહિઃપ્રજ્ઞઃ । બહિર્વિષયે વા યસ્ય પ્રજ્ઞા, વિદ્યાકૃતાઽવભાસ ઇત્યર્થઃ । સપ્તાઙ્ગઃ-સપ્ત મસ્તકાદીન્યઙ્ગાનિ યસ્ય સ તથા । તાન્યેવોક્તાનિ વાર્તિકકૃદ્ભિઃ-

શિરશ્ચક્ષુર્મુખં પ્રાણો મધ્યં બસ્તિસ્તતોઽપ્યધઃ ।
ઇત્યઙ્ગસપ્તકં વૈશ્વાનરોપાસ્તિશ્રુતૌ સ્મૃતમ્ ॥

ઇતિ । તાનિ કાનીત્યુચ્યતે-’દ્યૌર્મૂર્ધા, ચક્ષુરાદિત્યઃ, અગ્નિર્મુખં, પ્રાણો વાયુઃ, દેહમધ્યમાકાશઃ, બસ્તિઃ સમુદ્રઃ, પૃથિવી પાદા”વિતિ । સપ્તસુ લોકેષુ શિરાદીન્યઙ્ગાનિ યસ્યેતિ વા । એકોનવિંશતિમુખઃ-પઞ્ચ જ્ઞાનેન્દ્રિયાણિ પઞ્ચ કર્મેન્દ્રિયાણિ પઞ્ચ પ્રાણાઃ ચત્વાર્યન્તઃકરણાનિ, એવં એકોનવિંશતિઃ સાધિદૈવતાનિ નામરૂપાશ્રયક્રિયાસારાણિ મુખાન્યુપલબ્ધિસ્થાનાન્યસ્યેતિ એકોનવિંશતિમુખઃ । શ્રીનૃસિંહપૂર્વતાપિનીયે’પ્રણવમઙ્ગં જાનીયા”દિતિ શ્રુત્યા મન્ત્રરાજાઙ્ગત્વં ૐકારસ્યાભિહિતમ્ । તથૈવ શ્રીમચ્છઙ્કરાચાર્યૈર્વ્યાખ્યાતં નૃસિંહોત્તરતાપિનીયે’દેવા હ વૈ પ્રજાપતિમબ્રુવન્ અણોરણીયાંસમાત્માનં ૐકારં નો વ્યાચક્ષ્વે”ત્યનયા શ્રુત્યા પ્રાધાન્યમેવ ૐકારસ્યાભિહિતમ્ । માણ્ડૂક્યોપનિષદિ પ્રણવવિદ્યાયાઃસ્વાધીનત્વાત્સ્વાધીનત્વેન પ્રાધાન્યં ૐકારસ્યોક્તમ્ । તથાશ્રીરામપૂર્વતાપિનીયે’જીવત્વેનેદમોં યસ્યે”ત્યનયા શ્રુત્યા શ્રીતારકષડક્ષરમન્ત્રરાજસ્ય પૂર્વાઙ્ગત્વેનોત્તરાઙ્ગત્વેન ચ ૐકારોપાસના નિરૂપિતા । અત્ર શ્રીરામોત્તરતાપિનીયે પ્રાધાન્યં વાઽપ્રાધાન્યં વા, પ્રાધાન્યાપ્રાધાન્યં વા અપ્રાધાન્યં પ્રાધાન્યં વા ન તથોચ્યતે । કિન્તુ ૐકાર એવ ષડક્ષરં તારકં બ્રહ્મોચ્યતે । અતોવ્યાખ્યાભેદેચ પાઠભેદે ચ ન્યૂનાતિરિક્તત્વે ચછાન્દોગ્યાદૌૐકારોપાસનાભેદે વા અન્યથા પ્રતિપત્તિર્ન મન્તવ્યા । તથા સ્થૂલભુક્, સ્થૂલાન્ વિષયાન્ પ્રાધાન્યેન સ્વાત્મસાત્કરોતીતિ સ્થૂલભુક્ વૈશ્વાનરઃ, વિશ્વેષાં નરાણાં નયનાદ્વૈશ્વાનરઃ । સ્થાનાદિપઞ્ચવિશેષણવિશેષ્યો વિરાડકારાર્થ ઇતિ યાવત્ । સપ્તાઙ્ગવૈશ્વાનરપદપ્રક્ષેપસ્તુ સમષ્ટિવ્યષ્ટ્યાત્મનોરેકત્વપ્રદર્શનાર્થમ્ । અન્યથા અષ્ટાઙ્ગો વિશ્વશ્ચેતિ

વક્તવ્યમ્, અગ્રે તૈજસાદીનામુક્તત્વાત્ । તર્હિ દ્વિતીયતૃતીયપાદયોર્હિરણ્યગર્ભાઽવ્યાકૃતયોરનુક્તત્વાત્ સમષ્ટિવ્યષ્ટ્યોરેકત્વભઙ્ગપ્રસઙ્ગ ઇતિ ચેન્ન, યથા પ્રથમપાદે વૈશ્વાનરો વિશ્વૈક્યપ્રદર્શનાર્થસ્તથૈવાઽગ્રિમપાદદ્વયે તૈજસપ્રાજ્ઞૌ હિરણ્યગર્ભાઽવ્યાકૃતૈક્યપ્રદર્શનપરાવિત્યવસેયમ્ । પ્રથમઃ પાદઃ । એતત્પૂર્વકોત્તરપાદાધિગમાત્પ્રાથમ્યમ્ ।

દ્વિતીયમાહ-

સ્વપ્નસ્થાનોઽન્તઃ પ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ પ્રવિવિક્તભુક્ તૈજસો દ્વિતીયઃ પાદઃ ॥ ૬॥

સ્વપ્નસ્થાનઃ સ્વપ્નઃ સ્થાનમસ્ય તૈજસસ્યેતિ સ્વપ્નસ્થાનઃ અન્તઃપ્રજ્ઞઃ, જાગ્રત્પ્રજ્ઞાનૈકસાધનબહિર્વિષયેષ્વવભાસમાના (અન્તઃપ્રજ્ઞા)મનસિ સ્પન્દમાના સતી તથાભૂતં સંસ્કારં મનસ્યાધત્તે । તન્મનસ્તથા સંસ્કૃતં વિચિત્રપટ ઇવ બાહ્યસાધનાનપેક્ષાઽવિદ્યાકર્મભ્યાં પ્રેર્યમાણં જાગ્રદ્વદ્ભવતિ । તથાચ બૃહદારણ્યકે “અસ્ય લોકસ્ય સર્વાવતો માત્રામુપાદાયે’ત્યાદિશ્રુત્યોક્તમ્ । મનસ્યેકીભવતીતિપ્રસ્તુત્ય “અત્રૈષ દેવઃસ્વપ્ને મહિમાનમનુભવતી’ત્યથર્વણે । ઇન્દ્રિયાપેક્ષયા સૂક્ષ્મત્વાન્મનસઃ તદ્વાસનારૂપાન્તર્લબ્ધમજ્ઞોઽન્તઃપ્રજ્ઞઃ । “સપ્તાઙ્ગ એકોનવિંશતિમુખ” ઇત્યઙ્ગમુખયોરુક્તન્યાયેન વાસનારૂપમેવાત્ર બોદ્ધવ્યમ્ । સ્વપ્ને વાસનામયયોઃ પ્રતીયમાનત્વાત્ । પ્રવિવિક્તભુક્, પ્રકર્ષેણ વિવિક્તે તતઃ કેવલં વાસનામયાન્ભોગાન્ ભુનક્તીતિ પ્રવિવિક્તભુક્ તૈજસઃ, જાગ્રત્સુષુપ્તી સ્વતેજસા ગચ્છતીતિ તૈજસઃ-ઉકારાર્થઃ દ્વિતીયઃ પાદઃ ।

ત્રિષ્વપિ સ્થાનેષુ તત્ત્વાઽપ્રતિબોધલક્ષણસ્ય સ્વાપસ્ય તુલ્યત્વાદતઃ પૂર્વાભ્યાં સુષુપ્તં વિભજતે તૃતીયપાદકથનાર્થમ્-

યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તમ્ । સુષુપ્તસ્થાન એકીભૂતઃ પ્રજ્ઞાનઘન એવાનન્દમયો હ્યાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ પાદઃ ॥ ૭॥

યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે, ન કશ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તમિતિ । યત્ર-યસ્યામવસ્થાયાં સુપ્તઃ-નિદ્રિતઃ પુમાન્ કઞ્ચન-કમપિ કામં-વિષયં ન કામયતે-આસક્તબુદ્ધ્યા માભિલષતિ, ન કશ્ચન સ્વપ્નં પશ્યતિ-કમપિ વાસનામયભોગં નાનુસન્ધત્તે, તત્સુષુપ્તં-સા સુષુપ્તાવસ્થા । તૃતીયપાદમાહ-સુષુપ્તસ્થાનૈત્યાદિના । સુષુપ્તસ્થાનઃ, ઉક્તં સુષુપ્તં સ્થાનમસ્યેતિ સ તથા । અસત્કાર્યવાદસ્યાઽયુક્તત્વાદ્વિદ્યમાનમપ્યત્ર સપ્તાઙ્ગત્વમેકોનવિંશતિમુખત્વં ચ સન્માત્રાન્ન પૃથગ્ વિભાવ્યત ઇત્યાહ-એકીભૂત ઇતિ । કિમાત્મકોઽસાવેકીભાવ ઇત્યાકાઙ્ક્ષાયાં સન્માત્રરૂપઃ પ્રજ્ઞાનાત્મક ઇત્યાહ । પ્રજ્ઞાનઘન એવેતિ । જાગ્રત્સ્વપ્નપ્રજ્ઞાનાનાં ઘનત્વાન્નિવિડત્વાત્ સર્વરસાનામિવ સૈન્ધવખિલ્યે પ્રજ્ઞાનઘનઃ । એવકારેણ જાત્યન્તરપ્રતિષેધઃ । અત એવ એકત્વેન વિશેષવિજ્ઞાનાભાવાત્ । આનન્દમયઃ-આનન્દપ્રાયઃ । દુઃખબીજસ્ય વિદ્યમાનત્વાદાનન્દ એવેતિ વક્તું ન યુક્તમ્ । અનેન સચ્ચિદાનન્દાઽઽભાસગ્રસ્તાન્તર્મુખસન્માત્રરૂપબ્રહ્મજ્ઞાનાત્મકસામાન્યશરીરપ્રવેશોપાયઃ પ્રદર્શિતઃ । વિશ્વ તૈજસયોરિવાસ્યાપિ ભોગ્યમાહ-અત્યાનન્દભુગિતિ । અતિશયેન આનન્દં ભુનક્તીતિ તથા । યથા હિ લોકે નિરીહઃ સ્થિતઃ સુખાનન્દભુક્ ઉચ્યતે, તથાત્ર સ્વાભાવિકપરમાનન્દયોગ ઉપપન્નઃ । કેન કારણેન આનન્દભોગ્યત્વમત આહ-ચેતોમુખ ઇતિ । પ્રજ્ઞાનઘનરૂપોઽયં સુષુપ્ત આત્મેતિ કથમવગમ્યતે ઇતિચેત્, સ્વપ્નજાગ્રત્પ્રજ્ઞાકારણત્વાદિત્યાહ-ચેતોમુખ ઇતિ, ચેતઃ-ચિત્પ્રતિબિમ્બસહિતા વિદ્યાવૃત્તયો મુખં કરણં યસ્ય સ ચેતોમુખઃ । “આનન્દમયઃ અત્યાનન્દભુક્ ચેતોમુખ” ઇતિ ત્રિભિઃ પદૈઃ ભોક્તૃભોગ્યકરણાન્યુચ્યન્તે । સ્વપ્નાદિમતિબોધે ચેતઃ પતિ દ્વારીભૂતત્વાત્તથાબોધલક્ષણં વા ચેતો મુખં-દ્વારમસ્ય સ્વપ્નાદ્યાગમનં પ્રતીતિચેતોમુખઃ ।

“અવિદ્યાવૃત્ત્યવચ્છિન્નચૈતન્યં ભોગસાધનમ્”

ઇતિ વાર્તિકે । ભૂતભવિષ્યજ્જ્ઞાનત્વાત્સર્વવિષયજ્ઞાનત્ત્વમસ્યૈવેત્યાહ પ્રાજ્ઞ ઇતિ । સુપ્તો હિભૂતપૂર્વગત્યા પ્રાજ્ઞ ઇત્યુચ્યતે । અથવા પ્રજ્ઞપ્તિમાત્રમસ્યૈવાઽસાધારણરૂપમિતિ પ્રાજ્ઞઃ । ઇતરયોર્વિશિષ્ટમેવ જ્ઞાનમસ્તિ । સોઽયં પ્રાજ્ઞો-મકારાર્થસ્તૃતીયઃ પાદઃ ।

અસાવેવ સર્વસ્ય કારણમિતિ ચતુર્થમાહ-એષ સર્વેશ્વરૈત્યાદિના ।

એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનામ્ ॥ ૮॥

નબહિઃપ્રજ્ઞં નાન્તઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં નપ્રજ્ઞં નાપ્રજ્ઞં નપ્રજ્ઞાનઘનમદૃષ્ટમવ્યવહાર્યમગ્રાહ્યમલક્ષણમચિન્ત્યમવ્યપદેશ્યમેકાત્મપ્રત્યય

પ્રપઞ્ચોપશમં શિવમદ્વૈતં ચતુર્થં મન્યતે ।

એષ સર્વેશ્વરઃ, એષ પ્રાજ્ઞ આત્મા સ્વરૂપાવસ્થઃ । અયમેવ હિ સર્વસ્યેશ્વરઃ । યદ્યપિ પ્રાજ્ઞસ્યાપિ સર્વેશ્વરત્વાદિધર્મજાતં યુજ્યતે, તથાપિ સાપેક્ષત્વેન સબીજત્વેન ચ નિરસ્યતે । તુરીયસ્ય તુ નિરપેક્ષત્વાન્નિર્બીજત્વાત્ સર્વેશ્વરત્વાદિધર્મજાતં સઙ્ગચ્છત ઇતિ ભાવઃ । સર્વેશ્વરત્વે હેતુમાહ-એષ સર્વજ્ઞૈતિ । અયમેવ હિ સર્વાવસ્થાભેદજ્ઞાતા । સર્વેશ્વરત્વેઽપ્યન્તરેશ્વરત્વં ન સ્યાદિત્યત આહ-એષોઽન્તર્યામીતિ । સ્વયમન્તરનુપ્રવિશ્ય સર્વેષાં ભૂતાનાં નિયન્તા । બ્રાહ્માભ્યન્તરનિયન્તૃત્વે હેતુમાહ-એષ યોનિઃ સર્વસ્યેતિ । યો યસ્ય કારણં સ તસ્ય નિયન્તા ભવતિ । સર્વયોનિત્વે હેતુમાહ-પ્રભવાપ્યયૌ હિ ભૂતામિતિ । હિ-યસ્માત્ ભૂતાનામયમેવ પ્રભવાપ્યયૌ-ઉત્પત્તિપ્રલયૌ કૃતવાન્ તસ્માત્ સર્વયોનિઃ ।

પ્રથમદ્વિતીયપાદે સ્થાનાદીનિ પશ્ચ વિશેષણાનિ નિરૂપિતાનિ । તૃતીયે ષટ્ । ચતુર્થે પઞ્ચવિશેષણૈરીશ્વરત્વં પ્રદર્શિતમ્ । તદીશ્વરત્વાદિકં માયામાત્રં વિહાય શુદ્ધં સ્વરૂપમાત્મનઃ પઞ્ચદશવિશેષણૈર્વિશેષિતંશિવં ચતુર્થપાદમાહ-નબહિઃપ્રજ્ઞમિતિ ।

બહિર્વિષયવ્યાપારોપરમાદ્વિશ્વસાક્ષિણી જાગ્રદવસ્થા પ્રતિષિધ્યતે । તર્હિ મનોવ્યાપારસ્ય દુર્વારત્વાદન્તઃપ્રજ્ઞત્વં પ્રસક્તમ્, તન્મા ભૂદિત્યત આહ-નાન્તઃપ્રજ્ઞમિતિ । અનેન તૈજસસાક્ષિણી સ્વપ્નાવસ્થા નિષિધ્યતે । ઉભયવ્યાપારપ્રતિષેધેન તદન્તરાલવ્યાપારે પ્રાપ્તે તન્નિષેધતિ-નોભયતઃપ્રજ્ઞમિતિ । જાગ્રત્સ્વપ્નાન્તરાલે મનો વ્યાપૃતમ્પ્રજ્ઞાર્થન્ન કુર્યાદિત્યર્થઃ । અન્તરાલપ્રતિષેધેનોભયત્ર યુગપત્પ્રજ્ઞાર્થ વ્યાપારે પ્રાપ્તે તન્નિષેધતિ-નપ્રજ્ઞમિતિ । એવં સર્વતો મનોવ્યાપારપ્રતિષેધાદવ્યાપૃતમ્મનોઽવિદ્યાત્મકં સમવતિષ્ઠતે, તત્સ્થિતિ પ્રતિષેધતિ-નાપ્રજ્ઞમિતિ । તત્ર સ્થિતિપ્રતિષેધાદજ્ઞાનાસાક્ષિકત્વેપ્રાપ્તે સન્નિષેધતિ-નપ્રજ્ઞાનઘનમિતિ । એભિઃ ષડ્ભિઃ પદૈઃ પ્રતિષેધભૂતૈરુપાસ્યપ્રતિકૂલં પ્રતિષિધ્ય યસ્મિન્નુપાસ્યે મનોવ્યાપૃતઙ્કાર્યં તદુપાસ્યં નિર્દિશતિ નવભિઃ પદૈઃ-અદૃષ્ટમિતિદૃષ્ટ્યવિષયત્વાદ્દર્શનાયોગ્યમ્ । “યસ્યેન્દ્રિયસ્ય યો વિષયસ્તેનૈવ સ જ્ઞાયતે નાન્યેને”તિ નિયમાત્ । અત એવ અવ્યવહાર્યમ્ । અત એવ અગ્રાહ્યમ્ । અત એવ અલક્ષણમ્, ન લક્ષણં-લિઙ્ગં વિદ્યતે યસ્ય તદલક્ષણમ્ । અત એવ અચિન્ત્યં, અનુમાનેન તર્કેણ વા । અત એવ અવ્યપદેશ્યં, નિયતકારોપાસ્યપ્રતિપાદકૈઃ શબ્દૈઃ । અત એવ એકાત્મપ્રત્યયસારમ્, એકસ્મિન્ સર્વેષામાત્મનાં પ્રત્યયઃ એકાત્મપ્રત્યયઃ સ એવ સારં યસ્ય તત્તથોક્તમ્ । યદ્વા એક એવ આત્મા ઉપાસ્યોપાસકયોરિત્યેવ પ્રત્યયઃ, શેષં પૂર્વવત્ । અત એવ પ્રપઞ્ચોપશમમ્, પ્રાગુક્તન્યાયેન મનસો હિ બાહ્યદર્શનસ્મરણવ્યાપારાભાવાદ્વ્યાવૃત્તત્વાચ્ચ । સ્વાપાભાવાચ્ચ ઉપાસ્યવ્યતિરેકેણ પ્રપઞ્ચાપ્રતીતેઃ પ્રપઞ્ચોપશમમિતિ । શિવં-શઙ્કરમ્, કથમ્ભૂતં અદ્વૈતમ્-સજાતીયવિજાતીયસ્વગતભેદરહિતં, અર્ધમાત્રં નાદાત્મકં

ચતુર્થં-તુરીયં પાદં મન્યન્તે । જાગ્રદાદિસ્વરૂપ-
નિરુણમાચાર્યોક્તમેવોચ્યતે-
જાગ્રત્સત્ત્વગુણા પ્રોક્તા કેવલં શક્તિરૂપિણી ।
મરણં વિસ્મૃતિર્મૂર્છા નિદ્રા ચ તમસાऽऽવૃતા ॥
સુષુપ્તેસ્તુ કલા જ્ઞેયા સુષુપ્તિઃ શિવરૂપિણી ।
સંયોગઃ સત્ત્વતમસો રજ ઇત્યભિધીયતે ॥
સુષુપ્ત્યન્તે જાગરાદૌ સ્વપ્નાવસ્થા રજોમયી ।
સુષુપ્ત્યાદૌ જાગરાન્તે સ્ફુરત્તામાત્રલક્ષણા ॥
અવસ્થાશેષતાં પ્રાપ્તા તુર્યા તુ પરમા કલા ।
ચૂતરમ્ભાદિફલવત્પાકાત્ કૈવલ્યદાયિની ॥
તથાચ વાર્તિકે-
વિરાટ્ હિરણ્યગર્ભશ્ચકારણં ચેત્યુપાધયઃ ।
ઈશસ્ય યત્રિભિર્હીનં તુરીયં તત્પદં વિદુઃ ॥
ઇતિ । એતચ્ચોપાસ્યં શ્રીરામાખ્યં વસ્તુ પ્રત્યગાત્મતયોપાસ્યમિત્યાહ-સ આત્મા વિજ્ઞેય ઇતિ ।
સ આત્મા વિજ્ઞેયઃ સદોજ્જ્વલોऽવિદ્યાતત્કાર્યહીનઃ સ્વાત્મબન્ધહરઃ સર્વદા દ્વૈતરહિત આનન્દરૂપઃ સર્વાધિષ્ઠાનસન્માત્રો નિરસ્તાવિદ્યાતમોમોહોऽહમેવેતિ સમ્ભાવ્યોऽહમોં તત્સદ્યત્પરં બ્રહ્મ રામચન્દ્રશ્ચિદાત્મકઃ સોऽહમોં તદ્રામભદ્રઃ પરઞ્જ્યોતીરસોऽહમિત્યાત્માનમાદાય મનસા બ્રહ્મણૈકીકુર્યાત્ ।
સદા રામોऽહમિત્યેતત્તત્ત્વતઃ પ્રવદન્તિ યે ।
ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ॥
ઇત્યુપનિષદ્ય એવં વેદ સ મુખ્યો ભવતીતિ યાજ્ઞવલ્ક્યઃ ।
સ ઉપાસ્ય આત્મા-શ્રીરામઃ પ્રત્યગાત્મનિ એવં વિજ્ઞેયો-દ્રષ્ટવ્યઃ । "આત્મન્યેવાऽऽત્માનં પશ્યેદિ"તિ શ્રુત્યન્તરાત્ । કથમ્ભૂતો વિજ્ઞેય ઇત્યાહ-સદોજ્જ્વલ ઇત્યાદિસપ્તવિશેષણાનિ । સદા ઉજ્જ્વલઃ-વૃત્ત્યલિપ્તઃ, અવિદ્યાતત્કાર્યહીનઃ-સ્વરૂપાસ્ફૂર્તિદુઃખાદ્યનુભવરહિતઃ સ્વાત્મબન્ધહરઃ-સ્વરૂપપ્રતિબન્ધરહિતઃ, સર્વદા દ્વૈતરહિતઃ-દૃશ્યસ્ફુરણશૂન્યઃઆનન્દરૂપઃ-આનન્દગુણવાન્ ન ભવતિ । સર્વાધિષ્ઠાનસન્માત્રઃ, સર્વસ્યાધિષ્ઠાનં ચાસૌસન્માત્રશ્ચ નિરસ્તાऽવિદ્યાતમોમોહઃ-માયા માયાભાસશ્ચેતિ માયાऽવિદ્યેત્યુચ્યતે । અવિદ્યાતત્કાર્યરાહિત્યં પ્રથમતઃ, માયામાયાકાર્યરાહિત્યં પશ્ચાદિત્યપૌનરુક્ત્યમ્ । પૂર્વપૂર્વસ્યોત્તરોત્તરં યથેષ્ટં હેતુહેતુમદ્ભાવઃ । એવં સપ્તવિશેષણવિશિષ્ટ આત્મા વિજ્ઞેય ઇત્યુક્તમ્ । સ કથં વિજ્ઞેય ઇત્યત આહ-અહમેવેતિ । સમ્ભાવ્યેતિ-ઉક્ત આત્મા ત્વહમેવેતિ સમ્યક્ ભાવયિત્વા । સમ્યક્પદેનોક્તાં ભાવનાં "તત્ત્વમસિ, ત્વં તદસી'તિવત્ પરસ્પરવ્યત્યયેન દર્શયતિ-અહમોં તત્સદ્યત્પરં બ્રહ્મેતિ । ઓમિત્યુચ્ચરન્ અહં-ઉક્તસ્વરૂપ આત્મા તત્-વ્યાપકં-સત્-સન્માત્રં યત્-પ્રસિદ્ધં પરં બ્રહ્મ વાઙ્મનોऽગોચરમ્ । તત્કિમિત્યપેક્ષાયામાહ-રામચન્દ્રશ્ચિદાત્મકેતિ । અનેન બ્રહ્મણઃ પારોક્ષ્યનિવૃત્ત્યર્થ'મહં બ્રહ્માસ્મી"ત્યુક્તં ભવતિ । એવં સતિ પ્રાપ્તામશનાયાપિપાસાદિપ્રસક્તિં વારયિતું પુનઃ ઓમિત્યુચ્ચરન્ સઃ અહમ્ । તચ્છબ્દપરામૃષ્ટમર્થં પૂર્વોક્તમનુવદતિ-

તદ્રામભદ્રઃ પરઞ્જ્યોતીરસૈતિ । તદાદિવિશેષણત્રયવિશિષ્ટરામભદ્રઃ પરઞ્જ્યોતીરસઃ-પરમજ્યોતિઃસારઃ અહં આત્મા । અનેન "બ્રહ્માહમસ્મીત્યુક્તં ભવતિ । એવં સતિ અશનાયાપિપાસાદ્યપરોક્ષનિવૃત્તિઃ સ્વતઃ સિદ્ધૈવ, બ્રહ્મણઃ અશનાયાદિરહિતત્વાત્ । "અશનાયાપિપાસે શોકં મોહં જરામૃત્યુમત્યેતી'તિશ્રુતેઃ । ઉક્તમર્થમુપસંહરતિ-ઇત્યાત્મનમાદાય મનસા બ્રહ્મણૈકીકુર્યાદિતિ । ઇતિ ઉક્તપ્રકારેણ આત્માનમાદાય-આત્માનમાત્મત્વેન જ્ઞાત્વા । મનસાસાધનેન "મનસૈવાઽનુદ્રષ્ટવ્યમિતિ શ્રુતેઃ । બ્રહ્મણા-શ્રીરામચન્દ્રેણ સહ એકીકુર્યાત્, ઐક્યં કુર્યાદિત્યર્થઃ । એતદેવાઽસકૃદાવર્તની-યમુપાસકેનેત્યાહ-

સદા રામોઽહમિત્યેતત્તત્વતઃ પ્રવદન્તિ યે ।
ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ॥

ઇતિ । સદા-આસાક્ષાત્કારં રામોઽહમિત્યેતત્ । તત્ત્વત ઇતિ,
તસ્ય ભાવસ્તત્ત્વં તસ્માત્તત્ત્વત । અયમર્થઃ-પ્રથમતસ્તુ વૈખરીં મધ્યમાયાં વિલાપ્ય, મધ્યમાં પશ્યન્ત્યાં પશ્યન્તીં પરાયામિત્યેકો યોગઃ । સા પરા ૐકારે, તં ચોઙ્કારં વિભજ્ય અકાર ઉકારે, ઉકારો મકારે, મકારોઽર્ધમાત્રાયામિતિ દ્વિતીયઃ । તતઃ ૐકારાર્થદ્વયમધિદૈવાધ્યાત્મરૂપં પ્રથમતઃ ક્રમેણ અકારોકારમકારાર્ધમાત્રાસુ લક્ષ્મણશત્રુઘ્નભરતરામાઃ વૈશ્વાનરહિરણ્યગર્ભાઽવ્યાકૃતેશ્વરાપરપર્યાયાઃ, તતો વિશ્વતૈજસપ્રાજ્ઞતુરીયા ઇતિ તૃતીયો યોગઃ । સ ચ ૐ કારઃ સર્વે , તચ્ચ સર્વમાત્મન્યારોપિતમ્ । સ ચ આત્મા ચતુષ્પાત્ । તસ્યાત્મનો જાગ્રદાદિપાદત્રયાનુસન્ધાનેન એકત્વમવધાર્ય ચતુર્થપાદશ્રીરામસ્વરૂપેણાઽવતિષ્ઠેદિતિ ચતુર્થો યોગઃ । એવં યોગચતુષ્ટયરૂપં તત્ત્વં યે તતઃ પ્રવદન્તિ । શ્રવણમનનનિદિધ્યાસનપરઃ પ્રશબ્દાર્થઃ । તે સંસારે વર્તમાના અપિ પ્રસુપ્તપુરુષવદન્યૈઃ સંસારિણ ઇવ પરિદૃશ્યમાના અપિ નૂનં-નિશ્ચયેન સે ન સંસારિણઃ-રામ એવ તે નાત્ર સંશયઃ । સંશયકર્તુર્નરકાવાપ્તિરેવ ફલં નાન્યત્ । "સંશયાત્મા વિનશ્યતી'તિસ્મૃતેઃ ।

નનુ યદિ તે શ્રીરામઃ, તર્હિ શ્રીરામવત્ સેતુબન્ધનાદ્યદ્ભુતદેવદુષ્કરકર્મસામર્થ્યં કિમિતિ તેષુ ન દૃશ્યતે । અતઃ સંસારિણ એવેત્યુચ્યતે । શ્રીરામે ભગવતિ માયાવૈભવયોગબલાઽસાધારણસામર્થ્યં સ્વાભાવિકમ્ । "માયિનં તુ મહેશ્વર'મિતિ શ્રુતેઃ । અવિદ્યાવરણવિશિષ્ટે જીવે ત્વસામર્થ્યમ્ । સ્વકીયં માયાશાબલ્યં પરિહૃત્ય જીવસ્ય ચાઽવિદ્યાશાબલ્યં પરિહૃત્ય ભક્તાનુકમ્પયા શુદ્ધાંશં બ્રહ્માત્મૈક્યં સમર્પિતમ્ । અતો માયામાયાકાર્યાઽવિદ્યાવિદ્યાકાર્યરહિતાઃ શુદ્ધશ્રીરામબ્રહ્મરૂપાએવ જીવન્મુક્તાઃ સંસારિભિરનિર્ધારિતશીલા વિચરન્તીતિ નૈષ દોષઃ । તથા શ્રીમદ્ભાગવતે-

ન કુર્યાન્ન વદેત્કિઞ્ચિન્ન ધ્યાયેત્ સાધ્વસાધુ વા ।
આત્મારામોઽનયા વૃત્યા વિચરેજ્જડવન્મુનિઃ ।

ઇતિ । નનુ "જીવન્મુક્તિર્નામ દેહાભાવો વા,સદેહસ્યભોગાભાવો વા? નાદ્યઃ, વિરોધાત્ । નહિ દેહવતો દેહાભાવસમ્ભવઃ । ન દ્વિતીયઃ, ભોગાપરિહાર્યત્વાત્ । નહિ ભોગકારણે વિદ્યમાને ભોગવિચ્છેદઃ સમ્ભવતિ । નનુ ભોગસ્તાત્ત્વિકઃ, અતાત્ત્વિકો વા? નાદ્યઃ, અનિર્મોક્ષપ્રસઙ્ગાત્ । નહિ તાત્ત્વિકં શુક્ત્યાદિપ્રમાણજ્ઞાનનિરસ્યમ્ । દ્વિતીયમઙ્ગીકુર્મહે । ભોગસ્ય આત્માઽજ્ઞાનપરિકલ્પિતસ્ય આત્મજ્ઞાનેન વિચ્છેદસમ્ભવાત્ ।

તદિદં ન સમઞ્જસમ્ । દિઙ્મોહાદેર્બાધિતસ્યાપ્યનુવૃત્તિદર્શનાત્ । નહિ કાચકામલાદિકારણે વિદ્યમાને પીતશઙ્ખાદ્યદર્શનમ્ । અન્યથાદેહવર્તનં ન સ્યાત્ । અતો વિદુષાં જનકાદીનાં રાજ્યં શ્રૂયતે । "ન હ વૈ સશરીરસ્ય

સતઃ પ્રિયાપ્રિયયોરપહતિરસ્તી"તિ શ્રુત્યાપિ દેહવતો ભોગાઽસમ્ભવો નિરસ્યતે । અતોઽયુક્તાજીવન્મુક્તિરિતિ । અત્રોચ્યતે-તત્ત્વજ્ઞાનોત્પત્તિર્જીવતો મૃતસ્ય વા? નાન્ત્યઃ, શમદમાદિપૂર્વકશ્રવણાદિકારણાનામસમ્ભવાત્ । અત આદ્યોઽઙ્ગીકાર્યઃ । વિદુષો યાજ્ઞવલ્ક્યસ્ય જીવત એવ સંન્યાસઃ શ્રૂયતે, ન મૃતસ્ય । જીવતસ્તત્ત્વજ્ઞાનોત્પત્તૌ કો લાભ ઇતિ ચેત્, "જ્ઞાનાદેવ તુકૈવલ્ય'મિતિબ્રૂમઃ । "સ યો હ વૈતત્પરમં બ્રહ્મ વેદ બ્રહ્મૈવ ભવતિ બ્રહ્મવિદાપ્નોતિ પર'મિત્યાદિશ્રુતિભ્યઃ । તર્હિ ભોગસન્તતિર્દુર્નિવારેતિ ચેન્ન, ભોગસ્યાત્માઽજ્ઞાનકલ્પિતત્વાત્ । કારણાનાં વિદ્યમાનત્વે દિઙ્મોહાદિવદનુવૃત્તિર્દૃષ્ટેતિ ચેત્,દૃશ્યતાન્નામ । નતથાપિ સુપ્તોત્થિતસ્યસ્વપ્નવ્યામોહવત્પ્રમાણજનિતજ્ઞાનેન બાધિતાનુવૃત્તિઃ કાર્યક્ષમત્વં લભતે । વિદુષાં જનકાદીનાં રાજ્યશ્રવણં તુ લોકસઙ્ગ્રહાર્થમ્ ।

નનુ યદિ તે વિદ્વાંસઃ, તર્હિફલબાધનાત્સકલકર્મસંન્યાસેનૈવાનુગૃહ્યતામ્, નત્વગ્નિહોત્રાદિનેતિ ચેન્ન । અયમાક્ષેપસ્તિન્તિણીચોદ્યમનુસરતિ । યસ્ય યાદૃક્ પ્રારબ્ધકર્મસંસ્કારઃ, તસ્ય તાદૃગેવ વર્તનમ્ । ઉત્પન્નેઽપિ જ્ઞાને તેષામનયૈવ નીત્યા લોકસઙ્ગ્રહે ક્રિયમાણે નૈષ દોષઃ । "ન હ વૈ સશરીરસ્યે'તિશ્રુતેઃ કા ગતિરિતિ ચેત્, તસ્યાઃ સામાન્યવિષયત્વેન વિદુષઃ (ઇતિ)પદવિશેષાશ્રવણેન ચાઽસ્ખલિતગતિરેવ । અતો જીવન્નેવ મુક્તઃ, તસ્ય બાધિતાનુવૃત્તિર્ભવતીતિ યુક્તા જીવન્મુક્તિઃ ।

નનુ "નેતિ નેતિ નહ્યેતસ્માદિતિ નાન્યત્પરમસ્તિ નેહ નાનાસ્તિ કિઞ્ચને'ત્યાદિવાક્યસહિત "તત્ત્વમસિ" મહાવાક્યોત્પન્ન જ્ઞાનેન પ્રપઞ્ચમવિલયદ્વારા જ્ઞાનોત્પત્તૌ પ્રપઞ્ચસ્ય પ્રત્યયેન બાધ્યતાયાં દેહસ્યાપિ પ્રપઞ્ચાન્તઃપાતિત્વાત્ જ્ઞાનોદયસમનન્તરમેવ શરીરપ્રવિલયઃ પ્રાપ્ત ઇત્યસિદ્ધા જીવન્મુક્તિરિતિ ચેન્ન, પ્રારબ્ધકર્મવશાત્તદનુવૃત્તેઃ । જ્ઞાનોદયેન સકલકર્મક્ષયેઽપિ પ્રારબ્ધકર્મસંસ્કારવશાત્ કુલાલચક્રભ્રમણવત્ શરીરભ્રમણમિતિ જીવન્મુક્તિઃ સિદ્ધૈવ । અતો જીવન્મુક્તાસ્તે વિચરન્તિ । તથાચજાબાલોપનિષચ્છ્રુતિઃ- 'તત્ર પરમહંસા નામ સંવર્તકાઽરુણિશ્વેતકેતુદુર્વાસઋભુનિદાઘજડભરતદત્તાત્રેયરૈવતકપ્રભૃતયોઽવ્યક્તલિઙ્ગા અવ્યક્તાચારા અનુન્મત્તા ઉન્મત્તવદાચરન્તસ્ત્રિદણ્ડકમણ્ડલં શિક્યં પાત્રં જલપવિત્રં શિખાં યજ્ઞોપવીતં ચેત્યેતત્સર્વં ભૂઃ સ્વાહેત્યપ્સુ પરિત્યજ્યાત્માનમન્વિચ્છેદ્યથા જાતરૂપધરો નિર્દ્વન્દ્વો નિષ્પરિગ્રહસ્તત્ત્વમ્બ્રહ્મમાર્ગે સમ્યક્ સમ્પન્નઃ શુદ્ધમાનસઃ પ્રાણસન્ધારણાર્થં યથોક્તકાલે વિમુક્તો ભૈક્ષ્યમાચરન્નુદરપાત્રેણ લાભાલાભૌ સમૌ કૃત્વા શૂન્યાગારદેવગૃહતૃણકૂટવલ્મીકવૃક્ષમૂલકુલાલશાલાગ્નિહોત્રનદીપુલિનગિરિકુહરકન્દરકોટરનિર્ઝરસ્થણ્ડિલેષુ અનિકતવાસ્યપ્રયત્નોનિર્મમઃ શુક્લધ્યાનપરાયણોઽધ્યાત્મનિષ્ઠોઽશુભકર્મનિર્મૂલનપરઃ સંન્યાસેન દેહત્યાગં કરોતિ સ પરમહંસો નામે'તિ । યદ્વાલક્ષણલક્ષિતાઃ આરબ્ધકર્મસંસ્કારસદૃશાઃસ્વચ્છન્દા વિચરન્તિ । "તસ્માદ્બ્રાહ્મણઃ પાણ્ડિત્યં નિર્વિદ્ય બાલ્યે ન તિષ્ઠાસેદ્બાલ્યં ચ પાણ્ડિત્યં નિર્વિદ્યાઽથ મુનિરમૌનં ચ મૌનં ચ નિર્વિદ્યાઽથ બ્રાહ્મણઃ સ બ્રાહ્મણઃ કેન સ્યાદ્યેન સ્યાત્તેનેદૃશ એવાઽતોઽન્યદાર્ત'મિતિશ્રુત્યુક્તાવા વિચરન્તિ । ઉપસંહરતિ-ઇત્યુપનિષદ્ય એવં વેદ સ મુખ્યો ભવતીતિ યાજ્ઞવલ્ક્ય ઇતિ । એવંવિધા ઉપનિષદ્બ્રહ્મવિદ્યા તાં યઃ-શ્રીરામોપાસકઃ એવં-ઉક્તપ્રકારેણ-વેદ જાનાતિ, સ મુખ્યો ભવતિ-ત્રૈલોક્યપૂજ્યો ભવતિ । સ મુક્તો ભવતીતિ વા પાઠઃ । ઇતિ યાજ્ઞવલ્ક્યઃ-એવં ભરદ્વાજમુપદિષ્ટવાન્ યાજ્ઞવલ્ક્ય ઇતિ ॥ ૩॥

ઇતિ આનન્દનિધિટીકાયાં તૃતીયકણ્ડિકા સમાપ્તા ।

## અથ ચતુર્થકણ્ડિકા ।

પ્રથમકણ્ડિકાયાં બૃહસ્પતિપ્રશ્નોત્તરે યત્તારકં બ્રહ્મ નિર્દિષ્ટમ્, દ્વિતીયાયાં ભરદ્વાજપ્રશ્નોત્તરે તારતારકૈક્યેન તત્સ્વરૂપં દર્શિતમ્ । તૃતીયાયાં તસ્યાર્થમુક્ત્વા તેનવાચ્યેન વાચકૈક્યન્નિરૂપિતમ્ । તસ્માદ્બ્રહ્માત્મૈકસ્ય શ્રીરામચન્દ્રસ્યપ્રાપ્તિઃ કથં ભવતીતિ વક્તું ચતુર્થ્યારભ્યતે । તત્ર ભરદ્વાજાય બ્રહ્મવિદ્યાયાં સર્વશાસ્ત્રાર્થભૂતાયાં સમાપિતાયામત્યોત્સુક્યેનાઽત્રિઃ પૃચ્છતિ-

અથ હૈનમત્રિઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં ય એષોઽનન્તોઽવ્યક્ત આત્મા તં કથમહં વિજાનીયામિતિ । સ હોવાચ યાજ્ઞવલ્ક્યઃ-સોઽવિમુક્તે ઉપાસ્યઃ । ય એષોઽનન્તોઽવ્યક્ત આત્મા સોઽવિમુક્તે પ્રતિષ્ઠિત ઇતિ । સોઽવિમુક્તઃ કસ્મિન્પ્રતિષ્ઠિત ઇતિ । વરણાયાં નાશ્યાં ચ મધ્યે પ્રતિષ્ઠિત ઇતિ । કા વૈ વરણા કા ચ નાશીતિ । સર્વાનિન્દ્રિયકૃતાન્દોષાન્ વારયતીતિ તેન વરણા ભવતીતિ । સર્વાનિન્દ્રિયકૃતાન્પાપાન્નાશયતીતિ તેન નાશી ભવતીતિ ।

અથ હૈનમત્રિઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં ય એષોઽનન્તોઽવ્યક્ત અત્મા તં કથમહં વિજાનીયામિતીતિ । “યસ્ત્વયા સમનન્તરકણ્ડિકાયાં ચતુષ્પાદાત્મા ઉક્તઃ, તમાત્માનમનન્તત્વાદવ્યક્તત્વાત્કથમહં વિજાનીયા’મિતિ પ્રશ્નાર્થઃ । ઉત્તરમાહ-સ હોવાચ યાજ્ઞવલ્ક્યઃ સોઽવિમુક્ત ઉપાસ્યૈતિ । આત્મના ન વિમુક્તં અવિમુક્તમ્, સન્ધિં તુરીયમિતિ યાવત્ । તસ્મિન્નુપાસ્યઃ-પ્રત્યગાત્મતયોપાસનીયઃ । સર્વત્રાઽવસ્થિતત્વાદવિમુક્ત એવોપાસ્ય ઇતિ કોઽયં નિયમઃ ઇત્યત આહ-ય એષોઽનન્તોઽવ્યક્ત આત્મા સોઽવિમુક્તે પ્રતિષ્ઠિત ઇતીતિ । ય ઇત્યાદ્યનૂદ્ય સોઽવિમુક્તે પ્રતિષ્ઠિત ઇત્યનન્તસ્ય વ્યાપકસ્યાપિ તેજસોઽર્કમણ્ડલવદવિમુક્તસન્ધૌપ્રતિષ્ઠાઽવસ્થાનં યુક્તમિતિ ભાવઃ । અનેનોપાસનાસૌલભ્યં દર્શિતમ્ । સોઽવિમુક્તશબ્દવાચ્યઃ સન્ધિરેવ કથં જ્ઞાતવ્ય ઇતિ પૃચ્છતિ-સોઽવિમુક્તઃ કસ્મિન્ પ્રતિષ્ઠિત ઇતીતિ । સ્પષ્ટમ્ । ઉત્તરમાહ-વારણાયાં નાશ્યાં ચ મધ્યે પ્રતિષ્ઠિત ઇતીતિ । સ્પષ્ટમ્ । પુનઃ પૃચ્છતિ-કા વૈ વરણા કા ચ નાશીતીતિ । સ્પષ્ટમ્ । ઉત્તરમાહ-સર્વાનિન્દ્રિયકૃતાન્ દોષાન્ વારયતિ તેન વરણા ભવતિ, સર્વાનિન્દ્રિયકૃતાન્પાપાન્નાશયતિ તેન નાશી ભવતીતિ । સ્પષ્ટમ્ ।

પુનઃ પૃચ્છતિ-કતમચ્ચાસ્ય સ્થાનં ભવતીતિ ।

કતમચ્ચાસ્ય સ્થાનં ભવતીતિ । ભ્રુવોર્ઘ્રાણસ્ય ચ યઃ સન્ધિઃ સ એષ દ્યૌર્લોકસ્ય પરસ્ય ચ સન્ધિર્ભવતીતિ । એતદ્વૈ સન્ધિં સન્ધ્યાં બ્રહ્મવિદ ઉપાસતે ઇતિ સોઽવિમુક્ત ઉપાસ્ય ઇતિ । સોઽવિમુક્તં જ્ઞાનમાચષ્ટે યો વૈતદેવં વેદેતિ । અસ્ય-અવિમુક્તસ્ય સન્ધેરિત્યર્થઃ । ઉત્તરમાહ-ભ્રુવોર્ઘ્રાણસ્ય ચ યઃ સન્ધિઃ સ એષ દ્યૌર્લોકસ્ય પરસ્ય ચ સન્ધિર્ભવતીતિ ।*સમ્યક્ ધીયતે સૃષ્ટિપ્રલયાદિ સર્વમસ્મિન્નિતિ સન્ધિઃ, ઉભયરાહિત્યમિત્યર્થઃ*। ભ્રુવોર્ઘ્રાણસ્ય ચ યઃ સન્ધિર્વ્યષ્ટૌ સ્વદેહે, દ્યૌર્લોકસ્ય પરસ્ય ચ યઃ સન્ધિઃ સમષ્ટૌ કાશ્યભિધે અવિમુક્તે સ એષ ત્વયા પૃષ્ટઃ સન્ધિર્ભવતીત્યન્વયઃ । એતદેવોપાસનસ્થાનમિતિ સદાચારેણ દ્રઢયતિ-એતદ્વૈ સન્ધિં સન્ધ્યાં બ્રહ્મવિદ ઉપાસત ઇતીતિ । એતત્-પ્રસિદ્ધં સન્ધિં, નપુંસકત્વમાર્ષમ્ । સન્ધ્યાં-સન્ધ્યોપાસનં બ્રહ્મવિદઃ-પૂર્વોક્તા બ્રહ્માત્મૈકત્વજ્ઞાઃ ઉપાસતે-ઉપાસનાં કુર્વન્તિ ।

નિરુદકા ધ્યાનસન્ધ્યા વાક્કાયક્લેશવર્જિતા ।

સન્ધિની સર્વભૂતાનાં સા સન્ધ્યા હ્યેકદણ્ડિનામ્ ॥
ઇતિ સ્મૃતેઃ । ઉપસંહરતિ-સોઽવિમુક્ત ઉપાસ્ય ઇતીતિ । યસ્ત્વયા પૃષ્ટ આત્મા "બ્રહ્માત્મૈક્યં કથમહં વિજાનીયા'મિતિ, સ આત્મા અવિમુક્તે-ભ્રુવોર્ઘ્રાણસ્ય ચ સન્ધૌ ઉપાસ્યઃ-સર્વદોષાસનીયઃ । "દેવોભ્રૂમધ્યગોચરઃ, ભ્રૂમધ્યે સંસ્થિતં દેવ'મિત્યાદિસ્મૃતિભ્યઃ । તથાચ વસિષ્ઠઃ-
નિદ્રાદૌ જાગરસ્યાન્તે યો ભાવૌપજાયતે ।
તં ભાવં ભાવયન્ રામ! જીવન્મુક્તઃ સદા ભવ ॥
યદિ દેહં પૃથક્કૃત્ય ચિતિવિશ્રમ્યતિષ્ઠસિ ।
અધુનૈવ સુખી શાન્તો જીવન્મુક્તો ભવિષ્યસિ ॥
ઇતિ । ગોવિન્દભગવત્પૂજ્યપાદાચાર્યૈરપિ ગોવિન્દભગવદ્ગ્રન્થે નિરૂપિતમ્-
ભ્રૂયુગમધ્યગતં યચ્છશિવિદ્યુત્સૂર્યવજ્જગદ્ભાસિ ।
કેષાઞ્ચિત્પુણ્યવશાદુન્મીલતિ ચિન્મયં જ્યોતિઃ ॥
પરમાનન્દૈકમયમ્પરમં જ્યોતિઃસ્વભાવમવિકલ્પમ્ ।
વિગલિતસર્વક્લેશં જ્ઞેયં શાન્તં સ્વસંવેદ્યમ્ ॥
તસ્મિન્નાધાય મનઃ સ્ફુરદખિલં ચિન્મયં જગત્પશ્યન્ ।
ઉત્સન્નકર્મબન્ધો બ્રહ્મત્વમિહૈવ ચાપ્નોતિ ॥
અસ્તં હિ યાન્તિ વિષયાઃ પ્રાણાંસ્ત્વન્તઃ પ્રશામ્યન્તિ ।
"ન સ્ફુરિતે દુઃખસુખે ચિદ્બોધ (વિ?)ધ્વસ્તમોહાનામ્ ॥
રાગદ્વેષવિમુક્તાઃ સત્યાશ્ચાઽહન્તયા રહિતાઃ ।
સર્વત્ર નિર્વિશઙ્કા ભવન્તિ ચિદ્બ્રહ્મસંસ્પર્શાત્ ॥
તિષ્ઠન્ત્યણિમાદિયુતા દેહેઽસ્મિન્ લબ્ધસચ્ચિદાનન્દાઃ ।
બ્રહ્મસ્વભાવમમૃતં સમ્પ્રાપ્તાશ્ચૈવ કૃતકૃત્યાઃ ॥
આયતનં વિદ્યાનાં મૂલં ધર્માર્થકામમોક્ષાણામ્ ।
શ્રેયઃ પરં કિમન્યત્ શરીરમજરામરં વિહાયૈકમ્ ॥
ઇતિ । સુરેશ્વરવાર્તિકેચ તથા-
અપામાર્ગલતેવાયં વિરુદ્ધફલદો ભવઃ ।
પ્રત્યગ્દૃશાં વિમોક્ષાય સંસારાય પરાગ્દૃશામ્ ॥
ઇતિ । એતદેવ અવિમુક્તે પ્રસિદ્ધે યોજનીયમ્ । યજ્ઞદાનાદિભિર્બહુજન્મસુસમ્પાદિતસુકૃતસંસ્કારનિચયખચિતચરમશરીરસ્ય શમદમાદિસાધનચતુષ્ટયસમ્પન્નસ્ય પૂર્વતાપિનીયોક્તસગુણોપાસનપ્રસાદલબ્ધચિત્તસ્થૈર્યસ્ય શ્રવણમનનનિદિધ્યાસનજનિતસાક્ષ સકલકર્મસન્યાસપૂર્વકદેહાભિમાનગલિતસ્ય યત્ર કુત્રચિદ્વર્તમાનસ્ય ભ્રુવોર્ઘ્રાણસ્ય સન્ધાવવિમુક્તોપાસનં નિર્ગુણં શ્રીરામોપાસનાભિધેયમેવમુચિતં નાન્યદિતિ સર્વશાસ્ત્રાર્થપરિસમાપ્તિઃ । એવમ્ભૂતશ્રીરામાત્મોપાસક એવ ત્રૈલોક્યગુરુર્ભવતીતિ । ઉપાસનફલમાહ-સોઽવિમુક્તં જ્ઞાનમાચષ્ટે યો ચૈતદેવં વેદેતિ । યઃ-ઉપાસકઃ, વૈ

ઇતિનિશ્ચયેનએતત્-ઉપાસનં એવં-ઉક્તપ્રકારેણ વેદ-જાનાતિ, સઃ અવિમુક્તં-તુરીયાખ્યં સન્ધિં જ્ઞાનં આચષ્ટે-કથયતિ । તદુક્તઙ્ગીતાસુ-

“ઉપદેક્ષ્યન્તિ તે જ્ઞાનં જ્ઞાનિનસ્તત્ત્વદર્શિનઃ”

ઇતિ । શિક્ષાર્હસ્ય શિષ્યસ્યાઽતિરહસ્યત્વાત્તત્ક્ષણમેવ સઙ્ક્રમણેન બોધમુત્પાદયતીત્યર્થઃ । સર્વત્ર ઇતિશબ્દાઃ પ્રશ્નસમાપ્તૌ તદુત્તરસમાપ્તૌ ચ જ્ઞાતવ્યાઃ ।

શિષ્યસ્ય સમ્મુખીકરણાય આખ્યાયિકામાહ-અથ તં પ્રત્યુવાચેતિ ।

અથ તં પ્રત્યુવાચ સ્વયમેવ યાજ્ઞવલ્ક્યઃ-

શ્રીરામસ્ય મનું કાશ્યાં જજાપ વૃષભધ્વજઃ ।

મન્વન્તરસહસ્રૈસ્તુ જપહોમાર્ચનાદિભિઃ ॥

તતઃ પ્રસન્નો ભગવાન્ શ્રીરામઃ પ્રાહ શઙ્કરમ્ ।

વૃણીષ્વ યદભીષ્ટં તદ્દાસ્યામિ પરમેશ્વર ॥

ઇતિ । સ હોવાચ-

મણિકર્ણ્યાં મમ ક્ષેત્રે ગઙ્ગાયાં વા તટે પુનઃ ।

મ્રિયતે દેહિ તજ્જન્તોર્મુક્તિં નાતો વરાન્તરમ્ ॥

ઇતિ । અથ સ હોવાચ શ્રીરામઃ-

ક્ષેત્રેઽત્ર તવ દેવેશ યત્ર કુત્રાપિ વા મૃતાઃ ।

કૃમિકીટાદયોઽપ્યાશુ મુક્તાઃ સન્તુ ન ચાન્યથા ॥

અવિમુક્તે તવ ક્ષેત્રે સર્વેષાં મુક્તિસિદ્ધયે ।

અહં સન્નિહિતસ્તત્ર પાષાણપ્રતિમાદિષુ ॥

ક્ષેત્રેઽસ્મિન્યોઽર્ચયેદ્ભક્ત્યા મન્ત્રેણાનેન માં શિવ ।

બ્રહ્મહત્યાદિપાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ॥

ત્વત્તો વા બ્રહ્મણો વાપિ યે લભન્તે ષડક્ષરમ્ ।

જીવન્તો મન્ત્રસિદ્ધાઃ સ્યુર્મુક્તા માં પ્રાપ્નુવન્તિ તે ॥

મુમૂર્ષોર્દક્ષિણે કર્ણે યસ્ય કસ્યાપિ વા સ્વયમ્ ।

ઉપદેક્ષ્યસિ મન્મન્ત્રં સ મુક્તો ભવિતા શિવ ॥

ઇતિ શ્રીરામચન્દ્રેણોક્તં યોઽવિમુક્તં પશ્યતિ । સ જન્માન્તરિતાન્ દોષાન્ નાશયતિ ।

ઇતિ ચતુર્થકણ્ડિકા ।

તુરીયસન્ધૌ શ્રુતાયામપિ શ્રદ્ધાવિત્તરહિતસ્ય બધિરાર્પિતગુહ્યમિવભવતીતિ । અથ-તદનન્તરં તં-અત્રિં પ્રતિ ઉવાચ સ્વયમેવ યાજ્ઞવલ્ક્યઃ । કિમુવાચ તદાહ-શ્રીરામસ્યેત્યાદિના-’ત્વત્તો વા બ્રહ્મણો વાઽપિ” ઇત્યનેન શિવાદિબ્રહ્માદિસમ્પ્રદાયદ્વયં દર્શિતમ્ । અન્યત્ સ્પષ્ટમ્ । જ્ઞાનસૌલભ્યાદવિમુક્તસેવકસ્ય યદવાન્તરફલમ્, તદાહ-શ્રીરામચન્દ્રેણોક્તમિતિ ।’જન્માન્તરિતા’નિતિ પ્રારબ્ધકર્મવ્યતિરેકેણ ઇહજન્મકૃતકર્મોપલક્ષણાર્થમ્ । શેષં

સ્પષ્ટમ્ । અવિમુક્તોપાસનયાऽનાયાસતઃ શ્રીરામસાક્ષાત્કારો યસ્માત્ તસ્માદવિમુક્તત્યાગે પરમપુરુષાર્થહાનિઃ સ્યાદિતિ ભાવઃ । તથાચબ્રહ્માણ્ડે-
મોક્ષં સુદુર્લભં જ્ઞાત્વા સંસારં ચાऽતિભીષણમ્ ।
અવિમુક્તં સમાસાદ્ય તત્રૈવ નિધનં વ્રજેત્ ॥
ઇતિ ।
અધિભૂતં સાધિદૈવમધ્યાત્મમવિમુક્તકમ્ ।
આત્મા કાશી ભ્રુવોર્મધ્યે સૌલભ્યં તૂત્તરોત્તરમ્ ॥
સમષ્ટિવ્યષ્ટિગમ્પૂર્વં સમષ્ટાવેવ ચોત્તરમ્ ।
વ્યષ્ટામેવ તૃતીયં સ્યાત્ ત્રિષુ ચૈકં નસન્ત્યજેત્ ॥
ઇતિ સઙ્ગ્રહઃ ॥ ૪॥

ઇતિ આનન્દનિધિટીકાયાં ચતુર્થકણ્ડિકા સમાપ્તા ।

## અથ પઞ્ચમકણ્ડિકા ।

"તતઃ પ્રસન્નો ભગવાન્ શ્રીરામઃ પ્રાહ શઙ્કરમ્"
ઇતિ પૂર્વોક્તં શ્રુત્વા કેન પ્રકારેણ ભગવાન્ પ્રસીદતીતિ તં પ્રશ્નં પ્રષ્ટું પઞ્ચમકણ્ડિકારમ્ભઃ । શ્રીરામપ્રસન્નકરણોપાયમ્પૃચ્છતિ, ઈશ્વરાનુગૃહીતસ્યબ્રહ્મવિદ્યાસમ્ભવાત્ । તદુક્તમ્-
ઈશ્વરાનુગ્રહાદેવ પુંસામદ્વૈતવાસના ।
મહાભયપરિત્રાણાદ્વિત્રાણામેવજાયતે ॥
ઇતિ । અથેતિ ।
અથ હૈનં ભરદ્વાજો યાજ્ઞવલ્ક્યમુવાચ-અથ કૈર્મન્ત્રૈઃ સ્તુતઃ શ્રીરામઃ પ્રીતો ભવતિ સ્વાત્માનં દર્શયતિ, તન્નો બ્રૂહિ ભગવન્નિતિ ।
સ હોવાચ યાજ્ઞવલ્ક્યઃ-શ્રીરામેણૈવં શિક્ષિતો બ્રહ્મા પુનરેતયા ગાથયા નમસ્કરોતિ ।
વિશ્વાધારં મહાવિષ્ણું નારાયણમનામયમ્ ।
પૂર્ણાનન્દૈકવિજ્ઞાનં પરઞ્જ્યોતિઃ સ્વરૂપિણમ્ ।
મનસા સંસ્મરન્ બ્રહ્મા તુષ્ટાવ પરમેશ્વરમ્ ॥
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાનદ્વૈતપરમાનન્દાત્મા, યઃ પરં બ્રહ્મ ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચાऽખણ્ડૈકરસાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ બ્રહ્માનન્દામૃતં ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યસ્તારકં બ્રહ્મ ભૂર્ભુવસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ બ્રહ્મા વિષ્ણુરીશ્વરો યઃ સર્વદેવાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે સર્વે વેદાઃ સાઙ્ગાઃ સશાખાઃ સપુરાણા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।

ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યો જીવાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ સર્વભૂતાન્તરાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે દેવાસુરમનુષ્યાદિભાવા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે મત્સ્યકૂર્માદ્યવતારાઃ ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ પ્રાણો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યોઽન્તઃકરણચતુષ્ટયાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ યમો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચાન્તકો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ મૃત્યુર્ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચામૃતં ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યાનિ પઞ્ચ મહાભૂતાનિ ભૂર્ભુવઃ સ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યઃ સ્થાવરજઙ્ગમાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે પઞ્ચાગ્નયો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યઃ સપ્તવ્યાહૃતયો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભવગાન્ યા વિદ્યા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યા સરસ્વતી ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યા લક્ષ્મીર્ભૂર્ભુવઃ સ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યા ગૌરી ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યા જાનકી ભૂર્ભુવઃસ્તસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યચ્ચ ત્રૈલોક્યં ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ સૂર્યો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ સોમો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યાનિ નક્ષત્રાણિ ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે ચ નવગ્રહા ભર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે ચાષ્ટૌ વસવો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે ચાષ્ટૌ લોકપાલા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે ચૈકાદશ રુદ્રા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યે દ્વાદશાદિત્યા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ ભૂતં ભવ્યં ભવિષ્યત્ ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યો બ્રહ્માણ્ડસ્યાઽન્તર્બહિર્વ્યાપ્નોતિ વિરાટ્ ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યો હિરણ્યગર્ભો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યા પ્રકૃતિર્ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।

ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચોઙ્કારો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો શ્રીરામચન્દ્રઃ સ ભગવાન્ યાશ્ચતસ્રોઽર્ધમાત્રા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ પરમપુરુષો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ મહેશ્વરો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યશ્ચ મહાદેવો ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ ય ॐ નમોભગવતે વાસુદેવાય મહાવિષ્ણુર્ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યઃ પરમાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યો જ્ઞાનાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ યો વૈ શ્રીરામચન્દ્રઃ સ ભગવાન્ યઃ સચ્ચિદાનન્દાદ્વૈતૈકરસાત્મા ભૂર્ભુવઃસ્વસ્તસ્મૈ વૈ નમો નમઃ ॥
ઇત્યેતૈર્બ્રહ્મા સપ્તચત્વારિંશન્મન્ત્રૈર્નિત્યં દેવં સ્તૌતિ તત્ર તસ્ય દેવઃ પ્રીતો ભવતિ, સ્વાત્માનં દર્શયતિ ।
તસ્માદ્ય એતૈર્મન્ત્રૈર્નિત્યં દેવં સ્તૌતિ સ દેવં પશ્યતિ, સોઽમૃતત્વં ગચ્છતિ સોઽમૃતત્વં ગચ્છતીતિ ॥
ઇત્યથર્વણરહસ્યે શ્રીરામોત્તરતાપનીયોપનિષત્ સમાપ્તા ।

એતે મન્ત્રાઃ શ્રીનૃસિંહપૂર્વતાપિનીયે દ્વાત્રિંશવ્યૂહે । તથા અથર્વણશિરસિ રુદ્રોપનિષદિ અત્રાપિ નાનાપાઠક્રમા દૃષ્ટાઃ શ્રીરામચન્દ્રાનુગ્રહવદ્ભિર્બહુધા પરિશોધિતાઃ પાઠક્રમભઙ્ગભયાલ્લિખિતા વિજ્ઞેયાઃ । એભિસ્તુ સર્વાત્મકત્વં શ્રીરામચન્દ્રસ્યોચ્યતે ।

તત્ર તસ્યેતિ, તસ્ય-બ્રહ્મણઃ । સ દેવં પશ્યતીતિ, દેવં-શ્રીરામં સાક્ષાદાત્મનિ કૃપયા બહિરપિ ચ પશ્યતિ । અમૃતત્વમિતિ, મોક્ષં ગચ્છતિ-પ્રાપ્નોતિ । ગ્રન્થસમાપ્તિં દર્શયતિ-ઇત્યર્થવણરહસ્યે શ્રીરામોત્તરતાપિનીયોપનિષત્સમાપ્તેતિ ॥

સમ્મન્ત્ર્યામલતારકેણમનુનાદિગ્બન્ધદૃષ્ટ્યાઽઽર્હિયા રુદ્રોપેન્દ્રમરુદ્ગણાદિસહિતૈર્ગોપ્યા વિરિઞ્ચ્યાદિભિઃ ।
વ્યક્તાઽઽનન્દવનોદ્ધૃતાઽઽશુ પરમાનન્દેન યા સમ્ભૃતા તામાનન્દનિધિં નિધાય હૃદયે નન્દન્તુરામપ્રિયાઃ ॥
યસ્યાં ભક્તિર્વિરક્તિર્વિવિધશમદમપ્રાપ્તિરપ્રાપ્તિરન્તર્દુઃખસ્યૈતાનિ રત્નાન્યખિલસુકૃતિનાં યાન્તિ લાભાય ભૂપૌ ।
વિદ્યાઽમ્ભોધિપ્રવૃદ્ધિપ્રવરતરમહાબોધચન્દ્રોદયાદ્યામાનન્દાઽઽદ્યાં નિધિં તાં નિદધતુ હૃદયે તદ્વિદઃ સર્વકાલમ્ ॥
વિશ્વેશપાદપદ્મોત્થમકરન્દૌઘબિન્દુભિઃ ।
રઞ્જિતાયાં સદા કાશ્યાં ટીકાઽઽનન્દબનૈઃ કૃતા ॥
યસ્યોપદેશદીધિત્યા તારકં બ્રહ્મ કાશતે ।
કાશ્યાં કાશીનિવાસાય નમસ્તસ્મૈ પિનાકિને ॥
નાહં માંસં નચાઽસ્થીનિ દેહાદન્યોઽપરો હ્યહમ્ ।
ઇતિ ભાવાનુરૂપેણ વ્યવહારેણમુચ્યતે ॥

ઇતિ શ્રીરામચન્દ્રચરણાનુગૃહીતપરમહંસપરિવ્રાજકાચાર્યાનન્દવનવિરચિતા
શ્રીરામોત્તરતાપિનીયોપનિષદાનન્દનિધિટીકા સમાપ્તા ।
॥ સમાપ્તશ્ચાઽયં ગ્રન્થઃ ॥

Swami Anandavana has not commented on the last chapter of Ramauttaratapini upanishad, i.e. Mantraraj Mahatmya.

Encoded and proofread by Mrityunjay Pandey

*shrIrAmatApinIyopaniShadAnandanidhiTIkA by Anandavana*

pdf was typeset on October 30, 2025

Please send corrections to *sanskrit@cheerful.com*